# श्रीराम मंदिर,अयोध्या

**प्राण प्रतिष्ठा-22.01.2024**






आर वि द्वारा संकलित

# श्रीराम श्लोक संग्रह:


@Krishna_the_infinite





# श्लोक सूची


| | श्लोक | पृ अंक |
|---|---|---|
| 1 | अप्रमेय स्तोत्रं | 1 |
| 2 | अष्टाक्षरश्रीराममन्त्रस्तोत्रम् | 2 |
| 3 | एकश्लोकि रामायणम् १ | 7 |
| 4 | कल्याणरामनामावलिः | 8 |
| 5 | श्रीकोदण्डपाणिसुप्रभातम् | 10 |
| 6 | चतुर्विंशतिनाम प्रतिपादक चूर्णिका | 14 |
| 7 | श्रीचिरञ्जीविरामायणम् | 19 |
| 8 | नामरामायणम् | 21 |
| 9 | भद्राचलराममङ्गलम् | 25 |
| 10 | श्रीभद्राद्रिरामसुप्रभातस्तोत्रम् | 27 |
| 11 | श्री भद्राद्रीराम शरणागतिः | 35 |
| 12 | श्रीमङ्गलश्लोकरामायणम् | 39 |
| 13 | श्रीरघुनाथमङ्गलस्तोत्रम् | 43 |
| 14 | श्रीराघवस्तोत्रम् | 46 |
| 15 | राघवाष्टकम् | 48 |

| | | |
|---|---|---|
| 16 | श्रीराम आपदुद्धारकस्तोत्रम् | 51 |
| 17 | श्रीरामचालीसा | 57 |
| 18 | श्री राम स्तुति | 60 |
| 19 | श्री रामाष्टकः | 61 |
| 20 | श्रीरामदण्डकम् | 62 |
| 21 | श्रीरामद्वादशनामस्तोत्रम् | 67 |
| 22 | रामनामाष्टोत्तरशतरामायणं | 69 |
| 23 | श्रीरामपादुकास्तोत्रम् | 75 |
| 24 | श्रीरामप्रातःस्मरणम् | 79 |
| 25 | श्रीरामप्रातःस्मरणम् श्रीरामपञ्चकम् | 81 |
| 26 | श्रीरामभद्रमङ्गलाशासनम् | 83 |
| 27 | श्रीरामभुजङ्गस्तोत्र | 84 |
| 28 | श्रीराममङ्गलशासनम् | 92 |
| 29 | श्रीरामरक्षास्तोत्रम् | 94 |
| 30 | श्रीरामविश्वरूपस्तवः | 96 |
| 31 | श्रीरामषट्पदी | 104 |
| 32 | श्रीरामसप्तर्षिस्तोत्रम् | 105 |
| 33 | श्रीरामसहस्रनामस्तोत्रम् | 108 |
| 34 | श्रीरामसहस्रनामावलिः | 125 |
| 35 | श्रीरामसुप्रभातम् | 190 |

| | | |
|---|---|---|
| 36 | इन्द्रकृतं रामस्तोत्रम् | 192 |
| 37 | श्रीरामस्तोत्रं | 194 |
| 38 | श्रीरामहृदयम् | 196 |
| 39 | श्रीमद्रामायणपठनोपक्रमोपसंहारक्रमः | 198 |
| 40 | श्रीमद्रामायणपारायणसमापनक्रमः | 204 |
| 41 | श्रीरामाष्टकम् ४ | 207 |
| 42 | रामाष्टकम् | 210 |
| 43 | श्रीरामाष्टोत्तरशतनामस्तोत्रम् | 212 |
| 44 | रामाष्टोत्तरशतनामावली | 215 |
| 45 | श्रीरामाक्षरमालास्तोत्रम् | 222 |
| 46 | श्रीरामोदन्तम् | 226 |
| 47 | श्रीवीरराघवप्रपत्तिः | 253 |
| 48 | सप्तर्षिरामायणम् | 256 |
| 49 | श्रीसीताकवचम् | 259 |
| 50 | सीतारामस्तोत्र | 265 |







Source: https://sanskritdocuments.org/sanskrit/raama/

Our grateful thanks

# अप्रमेय स्तोत्रं

नमोऽप्रमेयाय वरप्रदाय सौम्याय नित्याय रघोत्तमाय ।

वीराय धीराय मनोपराय देवाधिदेवाय नमो नमस्ते ॥ १ ॥

भवाब्धिपूतं भुवनैकनाथं कृपासमुद्रं शरदिन्दुवासम् ।

देवाधिदेवं प्रणतैकबन्धुं नमामि ओमीश्वरमप्रमेयम् ॥ २॥

अप्रमेयाय देवाय दिव्यमङ्गलमूर्तये ।

वरप्रदाय सौम्याय नमः कारुण्यरूपिणे ॥ ३ ॥

आस्तिकार्थित कल्पाय कौस्तुभालङ्कृतोरसे ।

ज्ञानशक्त्यादिपूर्णाय देवदेवाय ते नमः ॥ ४ ॥

अप्रमेयाय देवाय मेघश्यामल मूर्तये ।

विश्वम्भराय नित्याय नमस्तेऽनन्तशक्तये ॥ ५॥

भक्तिवर्धनवासाय पद्मवल्लिप्रियाय च ।

अप्रमेयाय देवाय नित्यश्री नित्यमङ्गलम् ॥ ६ ॥

इति अप्रमेयस्तोत्रं सम्पूर्णम् ।



# अष्टाक्षरश्रीराममन्त्रस्तोत्रम्

लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥
स सर्वं सिद्धिमासाद्य ह्यन्ते रामपदं व्रजेत् ।
चिन्तयेच्चेतसा नित्यं श्रीरामःशरणं मम ॥ १॥
विश्वस्य चात्मनोनित्यं पारतन्त्र्यं विचिन्त्य च ।
चिन्तयेच्चेतसा नित्यं श्रीरामःशरणं मम ॥ २॥
अचिन्त्योऽपि शरीरादेः स्वातन्त्र्येनैव विद्यते ।
चिन्तयेच्चेतसा नित्यं श्रीरामःशरणं मम ॥ ३॥
आत्माधारं स्वतन्त्रं च सर्वशक्तिं विचिन्त्य च ।
चिन्तयेच्चेतसा नित्यं श्रीरामःशरणं मम ॥ ४॥
नित्यात्म गुण संयुक्तो नित्यात्मतनुमण्डितः ।
नित्यात्मकेलिनिरतः श्रीरामःशरणं मम ॥ ५॥
गुणलीलास्वरूपैश्च मितिर्यस्य न विद्यते ।
अतोवाङ्मनसा वेद्यः श्रीरामःशरणं मम ॥ ६॥
कर्ता सर्वस्य जगतो भर्ता सर्वस्य सर्वगः ।
आहर्ता कार्य जातस्य श्रीरामःशरणं मम ॥ ७॥

वासुदेवादिमूर्तीनां चतुर्णां कारणं परम् ।

चतुर्विंशति मूर्तीनां श्रीरामःशरणं मम ॥ ८॥

नित्यमुक्तजनैर्जुष्टो निविष्टः परमे पदे ।

पदं परमभक्तानां श्रीरामः शरणं मम ॥ ९॥

महदादिस्वरूपेण संस्थितः प्राकृते पदे ।

ब्रह्मादिदेवरूपैश्च श्रीरामः शरणं मम ॥ १०॥

मन्वादिनृपरूपेण श्रुतिमार्गं बिभर्तियः ।

याःप्राकृत स्वरूपेण श्रीरामःशरणं मम ॥ ११॥

ऋषिरूपेण यो देवो वन्यवृत्तिमपालयत् ।

योऽन्तरात्मा च सर्वेषां श्रीरामःशरणं मम ॥ १२॥

योऽसौ सर्वतनुः सर्वः सर्वनामा सनातनः ।

आस्थितः सर्वभावेषु श्रीरामःशरणं मम ॥ १३॥

बहिर्मत्स्यादिरूपेण सद्धर्ममनुपालयन् ।

परिपाति जनान्दीनान् श्रीरामःशरणं मम ॥ १४॥

यश्चात्मानं पृथक्कृत्य भावेन पुरुषोत्तमः ।

आर्चायामास्थितो देवः श्रीरामःशरणं मम ॥ १५॥

अर्चावतार रूपेण दर्शनस्पर्शनादिभिः ।

दीनानुद्धरते योऽसौ श्रीरामःशरणं मम ॥ १६॥

कौशल्या शुक्तिसञ्जातो जानकी कण्ठभूषणः ।

मुक्ताफलसमो योऽसौ श्रीरामःशरणं मम ॥ १७॥

विश्वामित्रमखत्राता ताडकागतिदायकः ।

अहल्याशाप शमनः श्रीरामःशरणं मम ॥ १८॥

पिनाकभञ्जनः श्रीमान् जानकीप्रेमपालकः ।

जामदग्न्यप्रतापघ्नः श्रीरामःशरणं मम ॥ १९॥

राज्याभिषेकसंहृष्टः कैकेयी वचनात्पुनः ।

पित्रदत्तवनक्रीडः श्रीरामःशरणं मम ॥ २०॥

जटाचीरधरोधन्वी जानकीलक्ष्मणान्वितः ।

चित्रकूटकृतावासः श्रीरामःशरणं मम ॥ २१॥

महापञ्चवटीलीला सञ्जातपरमोत्सवः ।

दण्डकारण्य सञ्चारी श्रीरामःशरणं मम ॥ २२॥

खरदूषणविच्छेदी दुष्टराक्षस भञ्जनः ।

हृतशूर्पनखाशोभः श्रीरामःशरणं मम ॥ २३॥

मायामृग विभेत्ता च हृतसीतानुतापकृत् ।

जानकीविरहाक्रोशी श्रीरामःशरणं मम ॥ २४॥

लक्ष्मणानुचरोधन्वी लोकयात्रविडम्बकृत् ।

पम्पातीर कृतान्वेषः श्रीरामःशरणं मम ॥ २५॥

जटायुगति दाता च कबन्धगतिदायकः ।

हनुमत्कृतसाहित्य श्रीरामःशरणं मम ॥ २६॥

सुग्रीवराज्यदः श्रीशो बालिनिग्रह कारकः ।

अङ्गदाश्वासनकरः श्रीरामःशरणं मम ॥ २७॥

सीतान्वेषणनिर्मुक्त हनुमत्प्रमुखव्रजः ।

मुद्रानिवेशितबलः श्रीरामःशरणं मम ॥ २८॥

हेलोत्तरितपाथोधिर्बलनिर्धूतराक्षसः ।

लङ्कादाहकरो धीरः श्रीरामःशरणं मम ॥ २९॥

रोषसम्बद्धपाथोधिर्लङ्काप्रासादरोधकः ।

रावणादिप्रभेत्ता च श्रीरामःशरणं मम ॥ ३०॥

जानकी जीवनत्राता विभीषणसमृद्धिदः ।

पुष्पकारोहणासक्तः श्रीरामःशरणं मम ॥ ३१॥

राज्यसिंहासनारूढः कौशल्यानन्दवर्द्धनः ।

नामनिर्धूतनिरयः श्रीरामःशरणं मम ॥ ३२॥

यज्ञकर्ता यज्ञभोक्ता यज्ञभर्तामहेश्वरः ।

अयोध्यामुक्तिदः शास्ता श्रीरामःशरणं मम ॥ ३३॥

प्रपठेद्यः शुभं स्तोत्रं मुच्येत भवबन्धनात् ।

मन्त्रश्चाष्टाक्षरो देवः श्रीरामःशरणं मम ॥ ३४॥

प्रपन्न सर्वधर्मेभ्योः मामेकं शरणं गतः ।

पठेन्निदं मम स्तोत्रं मुच्यते भव बन्धनात् ॥ ३५॥

॥ इति अष्टाक्षर श्रीराममन्त्रस्तोत्रम् ॥

बृहद् ब्रह्मसंहितान्तर्गतम्

**************************************************



# एकश्लोकि रामायणम् १

**आदौ रामतपोवनादिगमनं हत्वा मृगं काञ्चनं**

**वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम् ।**

**वालीनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनं**

**पश्चाद्रावणकुम्भकर्णहननमेतद्धि रामायणम् ॥**

**इति एकश्लोकि रामायणं सम्पूर्णम् ॥**



# कल्याणरामनामावलिः

ॐ कल्याणोत्सवानन्दाय नमः।
ॐमहागुरुश्रीपादवन्दनाय नमः।
ॐ नृत्तगीतसमावृताय नमः ।
ॐ कल्याणवेदीप्रविष्टाय नमः।
ॐपरिणयरूपदिव्यार्चनमुदिताय नमः।
ॐ जनकराजसमर्पित दिव्यवस्त्राभरणभूषिताय नमः।
ॐ सीताकल्याणरामाय नमः ।
ॐ कल्याणविग्रहाय नमः ।
ॐ कल्याणदायिने नमः ।
ॐ भक्तजनसुलभाय नमः। १०
ॐ कल्याणगुणसहिताय नमः।
ॐ भक्तानुग्रहकाम्याय नमः ।
ॐजनकराजजन्मसाफल्याय नमः।
ॐयोगीन्द्रवृन्दवन्दिताय नमः।
ॐनामसङ्कीर्तनसन्तुष्टायनमः।
ॐ शरणशरण्याय नमः ।
ॐ रामाय नमः ।
ॐ प्रसन्नमुखपङ्कजाय नमः।
ॐ तुभ्यं नमः ।
ॐ विष्णवे नमः ।
ॐ ब्रह्मप्रार्थिताय नमः ।
ॐजन्मादिषड्भावरहिताय नमः
ॐ निर्विकाराय नमः ।
ॐ पूर्णाय नमः ।
ॐ गमनादिविवर्जिताय नमः
ॐ जगतान्नाथाय नमः ।
ॐ भक्तिभावनाय नमः ।
ॐ कारुणिकाय नमः ।
ॐ अनन्ताय नमः ।
ॐ रामचन्द्राय नमः ।
ॐ रामाय नमः । ४०
ॐ करुणामयाय नमः ।
ॐ मधुसूदनाय नमः ।

| | |
|---|---|
| ॐ महात्मने नमः । | ॐ लक्ष्मणभरतरिपुघ्नसहिताय नमः । |
| ॐ दीनबान्धवाय नमः । | ॐ मातापितृसंहृष्टाय नमः । |
| ॐ अयोध्यामहोत्सुकाय नमः। | ॐ श्रियासहिताय नमः । |
| ॐ विद्युत्पुञ्जसमप्रभवे नमः। | ॐ वैकुण्ठाय नमः । |
| ॐ रामाय नमः । | ॐ सीतासमेताय नमः । |
| ॐ दाशरथाय नमः । | ॐअखिलजनान्दनकराय नमः। |
| ॐ महाबाहवे नमः । | ॐ नित्यश्रीप्रदाय नमः । |
| ॐ महापुरुषाय नमः । | ॐ विकाररहिताय नमः:। ५० |
| ॐ विष्णवे नमः । | ॐ निरवधिकविभवायनमः । |
| | ॐ मायानिरापाय नमः । |
| | ॐ अखिलदेवेश्वराय नमः । |
| | ॐ कल्याणरामाय नमः। ५४ |

इति कल्याणरामनामावलिः समाप्ता ।



# श्रीकोदण्डपाणिसुप्रभातम्

वन्दे वेङ्कटशेषार्यवत्सवंशशिरोमणिम् ।

वात्स्यश्रीवरदाचार्यतनयं करुणानिधिम् ॥

श्रीरामचन्द्र करुणावरुणालय श्री-सीतामुखाम्बुज विकासक बालसूर्य!।

सौमित्रिमित्र ! भरताभिरताप्तमित्र !

शत्रुघ्न हे ! रघुपते ! तव सुप्रभातम् ॥ १॥

भास्वानुदेति विकचानि सरोरुहाणि

पश्य स्मरन् मधुरकूजितषड्पदानि ।

त्वद्वीक्षणोन्मिषितनाभिसरोजवेधो

वेदध्वनेः रघुपते ! तव सुप्रभातम् ॥ २॥

त्वां बोधयन्ति परितः श्रुतयः श्रुतीनां

सारेण सानुज! भवत्प्रतिबोधकेन ।

श्लोकेन कौशिक मुखोद्गलितेन कर्ण-

पीयूषवद्रघुपते ! तव सुप्रभातम् ॥ ३॥

त्वां बोधयन्ति विबुधाः श्रुतिभोग्यवेणु-

वीणामृदङ्गपणवादिततानुवादैः ।

स्तोत्रैर्धरासुरवरस्तुतिघोषमित्रैः

आकर्ण्यतां रघुपते ! तव सुप्रभातम् ॥ ४॥

उद्यानवासरसिकाः शुकशारिकाद्याः

हृद्या हरेहरिरिति द्विजघोषहृद्यैः ।

हृद्यां मुदं विदधतीह तवापदान-

पद्यैर्द्विजाः रघुपते ! तव सुप्रभातम् ॥ ५॥

ब्रह्मा शिवश्शतमखश्च मखाशनौघैः

त्वद्धाम गोपुरभुवि प्रतिपालयन्ति ।

त्वत्पादपङ्कजसिषेविषवोऽविशेष-

भक्तैर्द्विजै रघुपते ! तव सुप्रभातम् ॥ ६॥

सूर्येन्दुसन्निधिवशादिव देवसङ्घः

सोत्फुल्लवक्त्रकमलाञ्जलिकुड्मलोकैः ।

मन्दारसुन्दरकरैः प्रतिपाल्यतेऽर्चा-

बद्धादरैः रघुपते ! तव सुप्रभातम् ॥ ७॥

तीर्थाभिषेकपरिशुद्धधियोऽर्चकास्ते

पूर्णाभिषेककलशाः परिचारकाश्च ।

स्तुत्वा भवन्तमभिषेकमुखोपचार-

चर्योत्सुका रघुपते ! तव सुप्रभातम् ॥ ८॥

सीतामुखेन्दुसविधेऽपि सदा प्रसन्नं

मन्दस्मितेन मधुरं सुधयेव लोकैः ।

लम्बाळकाळिललितं तव वक्त्रपद्मं

संशोभतां रघुपते ! तव सुप्रभातम् ॥ ९॥

श्रीकोसलेश्वरपुराकृतभाग्यराशे !

श्रीकोसलेन्द्रतनयानयनाभिराम!।

साकेतसाधुकुलकाङ्क्षितकल्पकश्रीः !

सीतामनोहरमणे ! तव सुप्रभातम् ॥ १०॥

उद्दण्डशौण्डभुजखण्डितखण्डपर्शु-

कोदण्डचण्डरवपिण्डितसाण्डजाण्ड!।

कोदण्डदण्डवरमण्डितबाहुदण्ड !

श्रीखण्डचर्चिततनो ! तव सुप्रभातम् ॥ ११॥

इत्थं वेङ्कटशेषेण सुप्रभातस्तुतिः कृता ।

श्रीरामचरणाम्भोजयुगभूषा समर्पिता ॥ १२॥

नीलोत्पलानि सरसीष्विह सङ्कुचन्ति

सापत्रपाणि तव दृग्तुलयोर्विलासे ।

धामानि ते च विकचानि सरोरुहाणि

श्रीरामचन्द्रदयिते ! तव सुप्रभातम् ॥ १३॥

प्रातस्सुवर्णमणिदर्पणनायिकास्य

वीक्षां वदन्ति सुधियः शुभमेव पत्युः ।

सर्वं त्वदाननविलोकनतोऽस्य सिध्येत्

उत्तिष्ठ मैथिलसुते ! तव सुप्रभातम् ॥ १४॥

॥ इति श्रीकोदण्डपाणिसुप्रभातं समाप्तम् ।



# चतुर्विंशतिनाम प्रतिपादक चूर्णिका

**॥ श्री भद्राचल रामदास कृत चतुर्विंशतिनाम प्रतिपादक चूर्णिका ॥**

श्रीमदखिलाण्ड कोटि ब्रह्माण्ड भाण्ड
दाण्डोपदण्ड मण्डल सान्दोत्दीपित सगुण निर्गुणातीत
सच्चिदानन्द परात्पर तारक ब्रह्माख्य दशदिशा
प्रकाशं, सकल चराचराधीशं कमल संभव
सचीधव प्रमुख निखिल बृन्दारक बृन्द वन्द्यमान
सन्दीप्त दिव्यचरणारविन्दं, श्री मुकुन्दम् ।
तुष्ट निग्रह शिष्ट परिपालनोत्कट कपट नाटक सूत्र
चरित्राञ्चित बहुविधावतारं, श्री रघुवीरम् ।
कौसल्या दशरथ मनोरथानन्द कन्दळित
निरूढ क्रीडा विलोलन शैशवं श्री केशवम् ।
विश्वामित्र यज्ञ विघ्नकारणोत्कट ताटकाचर सुबाहुबाहुबल
विदलन बाणप्रवीण पारायणं श्रीमन्नारायणम् ।
निजपाद जलज घनस्पर्शनीय शिलारूप शाप
विकृत गौतम सती विनुत महीधवं, श्री माधवम् ।

खण्डेन्तुदर प्रचण्ड कोदण्ड खण्डनोत्दण्ड

गोदण्ड कौशिक लोचनोत्सव जनक चक्रेश्वर

समर्पित सीता विवाहोत्सवानन्दं श्री गोविन्दम् ।

परशुराम भुजगर्व दर्प निर्वापण तानुगतरण विजय वर्धिष्णुं,
श्री विष्णुम् ।

पितृवाक्य परिपालनोत्कट जटावल्कलोपेत सीतालक्ष्मण सहित

महित राज्याभितमत द्दढव्रत कलित प्रयाण

रङ्ग गङ्गावतरण साधनं, श्री मधुसूदनम् ।

भरद्वाजोपचार निवारित मार्गश्रम निराघाट

चित्रकूट प्रवेशक्रमं, श्री त्रिविक्रमम् ।

जनक नियोग शोकाकुलित भरतशत्रुघ्न ललनानुकूल बन्धु
पादुका प्रदान सीता निर्मितान्तः करण दुष्ट चेष्टायमान

क्रूर काकासुर गर्वोपशमनं, श्री वामनम् ।

दण्डका गमन निरोध क्रोध विराटानल

ज्वाला जलधरं, श्री श्रीधरम् ।

शरभङ्ग सुतीक्ष्णात्रीदर्शनाशीर्वाद निर्व्याज

कुम्भलसंभव कृपालप्ध महादिव्य दिव्यास्त्र

समुदयार्चित प्रकाशं, श्री हृषीकेशम् ।

पञ्चवटीतट सङ्घटित विशालपर्णशालागत शूर्पणखा नासिकाः

छेदन मानावबोधन महाहवारंभ विजृम्भण रावण

नियोग माया मृगसंहार कार्यार्थ लाभं, श्री पद्मनाभम् ।

रात्रिञ्चर पर वञ्चनाहृत सीतान्वेषण रतपङ्क्ति रथक्षोभ

शिथीलीकृत पक्ष जटायु मोक्ष बन्धुप्रियावसान निर्यन्तिता

कबन्द वक्त्रोदरशरीर निरोधरं, श्री दामोदरम् ।

शबर्युपदे शपंपातटगमन हनुमद् सग्रीव संभाषण बन्धुरात्

बन्धुर दुन्दुभि कळेबरोत्पतन, सप्तसालः छेदन, वालि विदारण

प्रपन्न सुग्रीव साम्राज्य सुखहर्षणं, श्री सङ्कर्षणम् ।

सुग्रीवाङ्गत नील जाम्बवश्च नलकेसरि प्रमुख

निखिल कपिनायक सेवा समुदयार्चित देवं, श्री वासुदेवम् ।

निजदत्त मुद्रिकाजाग्रत् समग्राञ्जनेय विनय वचन

रचनाम्बुधि लङ्घनोल्लङ्घित लङ्किणी प्राणोल्ललङ्घन

जनकजा दर्शनाक्ष कुमार हरण, लङ्कापुरि दहण

प्रतिष्टित, शुक प्रशङ्ग दिरुष्टद्युम्नं, श्री प्रद्युम्नम् ।

अग्र पोदक्र महोग्र निग्रह बलाय मानापमाननीय
निजशरण्यागण्य पुण्योदय विभीषणाभय प्रधानानिरुद्दं,
श्रीमदनिरुद्दम् ।

अपार लवण पारावार समुज्रुंभितोत्कर्षण गर्व निर्वापणदीक्षा
समर्थसेतु निर्वाण प्रवीणाखिल स्थिर चरोत्तमं, श्री पुरुषोत्तमम् ।

निस्तुल प्रहस्त कुम्भकर्णेन्द्रजित् कुम्भ निकुम्भाग्नि
वर्णातिकाय महोदर महापार्श्वादि दनुज धनुखण्डनायमान
कोदण्ड गुणश्रवण शोषणा हताशेष राक्षस प्रजम् ,
श्री अधोक्षजम् ।

अकुण्डित रणोत् कण्ठ दशकण्ठ दनुज
कण्ठीरवकण्ठलुण्डनायमान जयावहं श्री नारसिंहम् ।

दशग्रीवानुज भट्ट भद्र द्वजाख्य विभव लङ्कापुरि
स्पुरण सकल साम्राज्य सुखोज्जितं, श्रीमदच्युतम् ।

सकल सुरासुराद्भुत प्रज्वलित पावक मुखभूदायमान
सीतालक्ष्मणाङ्गत महनीय पुष्पकाधि रोहण
नन्दिग्राम स्थित भ्रात्रुभिर्युत जटा वल्कल विसर्जनांफर
भूषणालङ्कृत श्रेयो विवर्धनं, श्री जनार्दनम् ।

अयोध्या नगर पट्टाभिषेक विशेष महोत्सव निरन्तर दिगन्त

विश्रान्त हारहीर कर्पूर पयः पारावार भारत वाणी कुन्देन्दु मन्दाकिनी चन्दन सुरदेनु शरदम्बु तालीवर धम्पोलि शत दानाश्व सुभकीर्तिःश् षडाक्षर पाण्डु भूत सभा विभ्राजमान निखिल भुवनैक यशः सान्द्रं श्री उपेन्द्रम् ।

भक्तजन संरक्षण दीक्षण कटाक्ष शोभाद्य समुत्तरिं श्री हरिम् ।

केशवादि चतुर्विंशति नाम गर्भ सन्दर्पित निज गथाङ्गीकृत मेधा वर्तिष्णुं श्री कृष्णम् ।

सर्व सुपर्व पार्वती हृदय कमल तारक ब्रह्मनामं

सम्पूर्णकामं पवतरणानु कन सान्द्रं भवजनित भयोःछेदः छिद्रमछिद्रं भक्तजन मनोरथोन्निद्रं,

भद्राचल रामभद्रं रामदास प्रपन्नं भजेऽहं भजेऽहम् ॥

॥ इति श्री भद्राचल रामदास कृत केशवादि

चतुर्विंशति प्रतिपादक चूर्णिका सम्पूर्णम् ॥



# श्रीचिरञ्जीविरामायणम्

पायात् क्षीराब्धिशायी कमलभवनुतः कोसलेन्द्रस्य पुत्रो
रामः सौमित्रियुक्तः कुशिकसुतगिरा ताटकाप्राणहारी ।
यज्ञं निर्वर्त्य गङ्गासुचरितमुदितः पावयंस्तामहल्यां
सीतामुद्वाह्य जित्वा पथि भृगुतनयं प्राप्य हर्षादयोध्याम् ॥१
श्रीरामं नौमि कैकेय्यभिलषितवरात् खिन्नमालोक्य तातं
तद्वाचा त्यक्तराज्यं झटिति वनगतं मैथिलीलक्ष्मणाभ्याम् ।
स्वर्गस्थे राज्ञि शोकात् कृतनुतिभरतप्रार्थनात् पादुके स्वे
दत्त्वास्मै तन्निवृत्त्या स्थितमनुजयुतं सेवितं चित्रकूटे ॥ २॥
हत्वारण्ये विराधं मुनिनिकरमुदे पञ्चवट्यामुषित्वा
वैरूप्यात् शूर्पणख्या(:)निशित (कुपित)खरमुखान्
ध्वंसयित्वार्धयामम् ।
मारीचं मर्दयित्वा दशवदनहृतां तत्र सीतामदृष्ट्वा
दग्ध्वा क्रुद्धं कबन्धं शबरिवनितया पूजितं राममीडे ॥ ३॥
पम्पातीरे हनूमत्पटुतरवचनाद्दृश्यमूकं च गत्वा
कृत्वा सुग्रीवसख्यं निशितशरवरैः सप्तसालांश्च भित्त्वा ।
हत्वा सुत्रामपुत्रं दिनकरजनुषस्तस्य राज्यं च दत्त्वा

तेनानीतैः कपीशैर्विदित(विचित)सकलभूमण्डलं राममीडे ॥ ४॥

सेतुं बद्ध्वा समुद्रे सकलबलयुतं रावणं कुम्भकर्णं

हत्वा तत्पुत्रवर्गं तदनुजमभिषिच्याथ लङ्काधिनाथम् ।

सीतां लब्ध्वाग्निशुद्धां सकलसुरनुतं पुष्पयानाधिरूढं

सुग्रीवाद्यैरुपेतं रघुपतिमनिशं प्राप्तराज्यं नमामि ॥ ५॥

सकृदपि यदि रामेत्युच्चरन् यस्तु मर्त्यः

सकलदुरितसङ्घैः संयुतो वापि नूनम् ।

न निवसति स मातुर्गर्भवासी कदाचि-

न्निवसति हरिलोके नास्ति सन्देहलेशः ॥ ६॥

इति श्रीचिरञ्जीविरामायणं सम्पूर्णम् ।



# नामरामायण

शुद्धब्रह्मपरात्पर राम । कालात्मकपरमेश्वर राम ।

शेषतल्पसुखनिद्रित राम । ब्रह्माद्यमरप्रार्थित राम ।

चण्डकिरणकुलमण्डन राम । श्रीमद्दशरथनन्दन राम ।

कौसल्यासुखवर्धन राम । विश्वामित्रप्रियधन राम ।

घोरताटकाघातक राम । मारीचादिनिपातक राम । १०

कौशिकमखसंरक्षक राम । श्रीमदहल्योद्धारक राम ।

गौतममुनिसम्पूजित राम । सुरमुनिवरगणसंस्तुत राम ।

नाविकधाविकमृदुपद राम । मिथिलापुरजनमोहक राम ।

विदेहमानसरञ्जक राम । त्र्यम्बककार्मुखभञ्जक राम ।

सीतार्पितवरमालिक राम । कृतवैवाहिककौतुक राम । २०

भार्गवदर्पविनाशक राम । श्रीमदयोध्यापालक राम ॥

राम राम जय राजा राम । राम राम जय सीता राम ॥

॥ अयोध्याकाण्डः ॥

अगणितगुणगणभूषित राम ।अवनीतनयाकामित राम ।

राकाचन्द्रसमानन राम ।पितृवाक्याश्रितकानन राम ।

प्रियगुहविनिवेदितपद राम ।तत्क्षालितनिजमृदुपद राम ।

भरद्वाजमुखानन्दक राम ।चित्रकूटाद्रिनिकेतन राम । ३०

दशरथसन्ततचिन्तित राम ।कैकेयीतनयार्पित राम ।

विरचितनिजपितृकर्मक राम ।भरतार्पितनिजपादुक राम ॥

राम राम जय राजा राम ।राम राम जय सीता राम ॥

॥ अरण्यकाण्डः ॥

दण्डकावनजनपावन राम ।दुष्टविराधविनाशन राम ।

शरभङ्गसुतीक्ष्णार्चित राम ।अगस्त्यानुग्रहवर्दित राम ।

गृध्राधिपसंसेवित राम ।पञ्चवटीतटसुस्थित राम । ४०

शूर्पणखार्त्तिविधायक राम ।खरदूषणमुखसूदक राम ।

सीताप्रियहरिणानुग राम ।मारीचार्तिकृताशुग राम ।

विनष्टसीतान्वेषक राम ।गृध्राधिपगतिदायक राम ।

शबरीदत्तफलाशन राम ।कबन्धबाहुच्छेदन राम ॥

राम राम जय राजा राम ।राम राम जय सीता राम ॥

॥ किष्किन्धाकाण्डः ॥

हनुमत्सेवितनिजपद राम ।नतसुग्रीवाभीष्टद राम । ५०

गर्वितवालिसंहारक राम ।वानरदूतप्रेषक राम ।

हितकरलक्ष्मणसंयुत राम ।राम राम जय राजा राम ।

राम राम जय सीता राम ।

## ॥ सुन्दरकाण्डः ॥

कपिवरसन्ततसंस्मृत राम ।तद्गतिविघ्नध्वंसक राम ।

सीताप्राणाधारक राम । दुष्टदशाननदूषित राम ।

शिष्टहनूमद्भूषित राम ।सीतावेदितकाकावन राम ।

कृतचूडामणिदर्शन राम । ६० कपिवरवचनाश्वासित राम ॥
राम राम जय राजा राम । राम राम जय सीता राम ॥

## ॥ युद्धकाण्डः ॥

रावणनिधनप्रस्थित राम ।वानरसैन्यसमावृत राम ।

शोषितशरदीशार्त्तित राम ।विभीष्णाभयदायक राम ।

पर्वतसेतुनिबन्धक राम ।कुम्भकर्णशिरश्छेदक राम ।

राक्षससङ्घविमर्धक राम ।अहिमहिरावणचारण राम ।

संहृतदशमुखरावण राम । ७०विधिभवमुखसुरसंस्तुत राम ।

खःस्थितदशरथवीक्षित राम ।सीतादर्शनमोदित राम ।

अभिषिक्तविभीषणनुत राम ।

पुष्पकयानारोहण राम ।भरद्वाजादिनिषेवण राम ।

भरतप्राणप्रियकर राम ।साकेतपुरीभूषण राम ।

सकलस्वीयसमानत राम ।रत्नलसत्पीठास्थित राम । ८०

पट्टाभिषेकालंकृत राम ।पार्थिवकुलसम्मानित राम ।

विभीषणार्पितरङ्गक राम ।कीशकुलानुग्रहकर राम ।

सकलजीवसंरक्षक राम ।समस्तलोकाधारक राम ॥

राम राम जय राजा राम ।राम राम जय सीता राम ॥

आगत मुनिगण संस्तुत राम ।विश्रुतदशकण्ठोद्भव राम ।

सीतालिङ्गननिर्वृत राम ।नीतिसुरक्षितजनपद राम । ९०

विपिनत्याजितजनकज राम ।कारितलवणासुरवध राम ।

स्वर्गतशम्बुक संस्तुत राम ।स्वतनयकुशलवनन्दित राम ।

अश्वमेधक्रतुदीक्षित राम ।कालावेदितसुरपद राम ।

आयोध्यकजनमुक्तित राम ।विधिमुखविभुदानन्दक राम ।

तेजोमयनिजरूपक राम ।संसृतिबन्धविमोचक राम । १००

धर्मस्थापनतत्पर राम ।भक्तिपरायणमुक्तिद राम ।

सर्वचराचरपालक राम ।सर्वभवामयवारक राम ।

वैकुण्ठालयसंस्तित राम ।नित्यनन्दपदस्तित राम ॥

राम राम जय राजा राम ॥राम राम जय सीता राम ॥ १०८

इति श्रीलक्ष्मणाचार्यविरचितं नामरामायणं सम्पूर्णम् ।

# भद्राचलराममङ्गलम्

रामचन्द्राय जनकराजजा मनोहराय

मामकाभीष्टदाय महित मङ्गलम् ॥ पल्लवि॥

कोसलेन्द्राय मन्दहासदासपोषणाय

वासवादि विनुत सर्वदाय मङ्गलम् ॥ १॥

चारुकुंकुमोपेतचन्दनादिचर्चिताय

भानकटक शोभिताय भूरिमङ्गलम् ॥ २॥

ललितरत्नकुण्डलाय तुलसीवनमालिकाय

जलजसदृशदेहाय चारुमङ्गलम् ॥ ३॥

देवकीसुपुत्राय देवदेवोत्तमाय चावजातगुरुवराय
भव्यमङ्गलम्॥४॥

पुण्डरीकाक्षाय पूर्णचन्द्राननाय अण्डजातवाहनाय
अतुलमङ्गलम्॥

विमलरूपाय विविधवेदान्तवेद्याय

सुमुखचित्तकामिताय शुभदमङ्गलम् ॥ ६॥

रामदासाय मृदुलहृदयकमलवासाय
स्वामि भद्रगिरिवराय सर्वमङ्गलम् ॥ ७॥

नवसरोजलोचनाय नटजनानुग्रहाय

पवनतनयसन्नुताय परममङ्गलम् ॥

नगसुतादि भानुकुलनामज्ञेयमन्त्राय

निगमचिदसुरुचिराय नित्यमङ्गलम् ॥

सामगानप्रियाय सकललोकपालनाय

सदयहृदयपरमहंसाय मङ्गलम् ॥

इति श्रीभद्रगिरिरामदासविरचितं श्रीभद्राचलराममङ्गलम् ।



# श्रीभद्राद्रिरामसुप्रभातस्तोत्रम्

वामाङ्कस्थितजानकीपरिलसत्कोदण्डदण्डं करे

चक्रं चोर्ध्वकरेण बाहुयुगले शङ्खं शरं दक्षिणे ।

बिभ्राणं जलजातपत्रनयनं भद्राद्रिमूर्धस्थितं

केयूरादिविभूषितं रघुपतिं सौमित्रियुक्तं भजे ॥ १॥

श्रीमच्चन्दनचर्चितोन्नतकुचव्यालोलमालाङ्कितां

ताटङ्कद्युतिसत्कपोलयुगलां पीताम्बरालङ्कृताम् ।

काञ्चीकङ्कणहारनूपुरलसत्कल्याणदामान्वितां

श्री वामाङ्कगतां सरोरुहकरां सीतां मृगाक्षीं भजे ॥ २॥

द्विभुजं स्वर्णवपुषं पद्मपत्रनिभेक्षणम् ।

धनुर्बाणधरं धीरं रामानुजमहं भजे ॥ ३॥

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते ।

उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ ४॥

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज ।

उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गलं कुरु ॥ ५॥

वन्दे श्रीरघुनन्दनं जनकजानेत्रासिताम्भोरुहं

प्रालेयाम्बुमनल्पमञ्जुलगुणं पद्मासनोद्भासिनम् ।

चक्राब्जेषुशरासनानि दधतं हस्तारविन्दोत्तमैः

श्रीमन्मारुतिपूजिताङ्घ्रियुगलं भद्राद्रिचिन्तामणिम् ॥ ६॥

श्रीरामचन्द्रवरकौमुदि भक्तलोक

कल्पाख्यवल्लरिविनतजनैकबन्धो ।

विनम्रजनैकबन्धो कारुण्यपूरपरिपूरितसत्कटाक्षे

भद्राद्रिनाधदयिते तव सुप्रभातम् ॥ ७॥

अम्लानभक्तिकुसुमा मलिनाः प्रदीपाः

सौधान् जयत्यविरलागुरुधूमराजिः ।

नाकं स्वृशन्ति धरणीसुरवेदनादाः

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ ८॥

सान्द्रोडुरम्यसुषमा न विभातिराजा

दीनो यथा गतवसुर्मलिनान्तरङ्गः ।

दैन्यं गता कुमुदिनी प्रियविप्रयोगात्

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ ९॥

पूर्वाद्रिपीठमधितिष्ठति भानुबिम्बं

गाढं प्रयाति तिमिरं ककुभः प्रसन्नाः ।

त्वत्स्वागतं खगरुतैः कथयन्ति मन्द्रं

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ १०॥

आदित्यलोलकरलालनजातहर्षा

सा पद्मिनी त्यजति मा सकृदास्यमुद्राम् ।

भृङ्गावली विशति चाटुवचास्सरोजं

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ ११॥

प्रालेयबिन्दुनिकरा नवपल्लवेषु

बिम्बाधरे स्मितरुचिं तव संवदन्ति ।

आयान्ति चक्रमिथुनानि गृहस्थभावं

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ १२॥

आनेतुमास्यपवनं तव सत्सुगन्धी

माल्यानि जातिकुसुमानि सरोरुहाणि ।

आमर्दयन् सुरभिगन्धमहो भिवाति

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ १३॥

गोपीकराकलितमन्थनरम्यनादाः

गोपालवेणुनिनदेन समं प्रवृत्ताः ।

धुन्वन्ति हंसमिथुनानि तुषारपक्षान्

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ १४॥

स्तम्भे रमा उभयपक्षविनीतनिद्राः

कर्षन्ति ते कलितघीङ्कृतिशृङ्खलानि ।

वाद्या मुखोष्ममलिनीकृतसैन्धवांशाः

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ १५॥

श्रीवन्दिनस्तव पठन्ति च मञ्जुकण्ठैः

रम्यावधानचरितान्यमृतोपमानि ।

मन्द्रं नदन्ति मुरजाश्शुभशङ्खनादैः

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ १६॥

उत्तानकेतनरता रवयो महेशाः

शुद्धोक्षवाहनगता वसवोऽपि सिद्धाः ।

द्वारे वसन्ति तव दर्शनलालसास्ते

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ १७॥

चक्राङ्गवाहविधिरेष सुरेश्वरोऽयं

देवर्षिभिर्मुनिगणैस्सह लोकपालैः ।

रत्नोपदाञ्जलिभरोऽभिमुखं समास्ते

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ १९॥

दातुं भवान् विविधगोधनरत्नपूगान्

आलोकनाय मुकुरादि शुभार्थपुञ्जान् ।

आदाय देहलितले त्रिदशा निषण्णाः

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ १९॥

गोदावरीविमलवारिसमुद्भवानि

निर्हारिपुष्पविसराणि मुदा हरन्तः ।

शुश्रूषया तव बुधाः प्रतिपालयन्ति

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ २०॥

एलालवङ्गवरकुङ्कुमकेसराद्यैः

पुन्नागनागतुलसीवकुलादिपुष्पैः ।

नीतास्सुतीर्थकलशा अभिषेचनाय

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ २१॥

कस्तूरिकासुरभिचन्दनपद्ममालाः

पीताम्बरं च तडिदाभमनल्पमूल्यम् ।

सज्जीकृतानि रघुनायक मञ्जुलानि

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ २२॥

केयूरकङ्कणकलापकिरीटदेव

छन्दाङ्गुलीयकमुखा नवरत्नभूषाः ।

राजन्ति तावकपुरो रविकान्तिकान्ताः

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ २३॥

गोदावरीसलिलसम्प्लवनिर्मलाङ्गाः

दीप्तोर्ध्वपुण्ड्रतुलसीनलिनाक्षमालाः ।

श्रीवैष्णवास्तव पठन्ति विबोधगाथाः

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ २४॥

स्वर्लोकवारवनितास्सुरलोकतोऽमी

रम्भादयो विमलमङ्गलकुम्भदीपैः ।

सङ्घीभवन्ति भवदङ्गणपूर्वभागे

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ २५॥

सीताप्रवालसुमनोहरपाणियुग्म-संवाहितात्मपदपङ्कजपद्मनेत्र ।

सौमित्रिसादरसमर्पितसौम्यशय्या

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ २६॥

श्रीशेषतल्प शरणागतरक्षकार्क-

वंशे निशाचरवधाय कृतावतार ।

पादाब्जरेणुहृतगौतमदारशाप

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ २७॥

पाठीनकूर्मकिटिमानुषसिंहवेष

कुब्जावतार भृगुनन्दन राघवेन्द्र ।

तालाङ्ककृष्णयवनान्तकबुद्धरूप

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ २८॥

ब्रह्मादिसर्वविबुधांस्तव पादभक्तान्

सम्फुल्लतामरसभासुरलोचनाद्यैः ।

आनन्दयस्व रिपुशोधन चापधारिन्

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ २९॥

तल्पं विहाय कृपया वरभद्रपीठं

आस्थाय पूजनमशेषमिदं गृहीत्वा ।

भक्तानशेषभुवनानि च पालयस्व

भद्राद्रिशेखर विभो तव सुप्रभातम् ॥ ३०॥

कुन्दसुन्दरदन्तपङ्क्तिविभासमानमुखाम्बुजं

नीलनीरदकायशोभितजानकीतडिदुज्ज्वलम् ।

शङ्खचक्रशरासनेषुविराजमानकराम्बुजं

भद्रभूधरशेखरं प्रणमामि रामसुधाकरम् ॥ ३१॥

अब्जसम्भवशङ्करादिभिरर्चिताङ्घ्रिपयोरुहं

मेरुनन्दनभद्रतापसमानसाब्जदिवाकरम् ।

नम्रभक्तजनेष्टदायकपद्मपीठसमास्थितं

गौतमीक्षणलालसं प्रणमामि रामसुधाकरम् ॥ ३२॥

भीतभानुतनूभवार्तिनिवारणातिविशारदं

पादनम्रविभीषणाहितवैरिराज्यविभूतिकम् ।

भीमरावणमत्तवारणसिंहमुत्तमविग्रहं

भद्रभूधरशेखरं प्रणमामि रामसुधाकरम् ॥ ३३॥

घोरसंसृतिदुस्तराम्बुधि कुम्भवसम्भवसन्निभं

योगिवृन्दमनोऽरविन्दसुकेसरोज्ज्वलषट्पदम् ।

भक्तलोकविलोचनामृतवर्तिकायितविग्रहं

भद्रभूधरशेखरं प्रणमामि रामसुधाकरम् ॥ ३४॥

भूसुताचिररोचिषं वरसत्पथैकविहारिणं

तापनाशनदीक्षितं नतचातकावलिरक्षकम् ।

चित्रचापकृपाम्बुमण्डलनीलविग्रहभासुरं

भद्रभूधरशेखरं प्रणमामि रामपयोधरम् ॥ ३५॥

इति भद्राद्रिराम (भद्राचलराम) सुप्रभातस्तोत्रं सम्पूर्णम् ।

*****

# श्री भद्राद्रीराम शरणागतिः

श्रीमत्पयोरुहसुधाकलशातपत्र

मत्स्यध्वजाङ्कुशधरादिमहार्षचिह्नौ ।

पद्मप्रवालमणिविद्रुममञ्जुशोभौ

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ १॥

वामाङ्कहस्तधृतभूमिसुतारथाङ्ग

सङ्खाशुगप्रणयिसव्यकराऽब्जनेत्र ।

पार्श्वस्थचापधरलक्ष्मण तावकीनौ

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ २॥

फुल्लारविन्दरुचिरा वनिशं लसन्तौ

संवर्तिकालिसमताललिताङ्गुलीकौ ।

तत्सूतमौक्तिकफलायितसन्निभौ ते

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ ३॥

भक्त्यर्पितस्फुरदुदारसरोरुहाली

सम्यग्विलग्नमकरन्दलवाभिशङ्काम् ।

पादाङ्गुलीनखमिषात् परिकल्पयन्तौ

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ ४॥

मुक्तावली लसति विष्णुपदे तवेति

वेदः प्रबोधयति तां नखरालिरक्ष्यात् ।

प्रत्यक्षतः प्रकटनेन ततोऽदिकौ ते

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ ५॥

नीहारबिन्दुदलशोभितनालपद्मे

भास्वन्नखाङ्गुलिसुजङ्घतया विजित्य ।

विध्यर्चितै रिव सुमैर्विहिताट्टहासौ

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ ६॥

पूर्णः कलङ्करहितो विधु रानानात्म

सूर्यप्रभाऽभिभवमुक्तमति प्रसन्नाम् ।

तारावली मिव नखावलि मावहस्तौ

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ ७॥

श्रुत्यङ्गनाकचभरान्तरराजमान

सिन्दूररेणुमिलना दिव भक्ताहृत्सु ।

वासातिरेकवशतः किल जातरागौ

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ ८॥

कोटीरकोटिघटना दिव देवतानां

कोपादिवाम्बुरुहविद्रुमपल्लवेषु ।

भक्तालिवैरिकलना दतिमात्ररक्तौ

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ ९॥

भेदोऽस्ति नैव खलु दारुशिलादिकानां

आलोच्य चैव मखिलाकरचूर्णभाजौ ।

संक्षालितौ सुमनसा तरिजीविना ते

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ १०॥

नैकनिघ्नमुनिमानसवासकाले

सक्तानुरागयुतसत्यगुणैकशङ्काम् ।

भक्तावलेर्नखरुचा परिकल्पयन्तौ

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ ११॥

उन्मार्गकर्षिमुनिमानसवारणानां

शब्दादिभोगमदवारिमलीमसानाम् ।

आलानपाददृढताकरकीलगुल्फौ

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ १२॥

मायामृगार्थ मवनीतनयानियोगात्

आयासपूर्व मटवीतटदूरचारात् ।

आरक्तकोकनदकोमलकान्तिभाजौ

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ १३॥

भूमीसुताकरतलोदरराजमान

काश्मीरकान्तिमिलना दिव रागवन्तौ ।

भक्तौघरक्षणकलातिविचक्षणौ ते

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ १४॥

पाथोधिजन्मपरिकल्पितपाद्यधारौ

फालाक्षमूर्धधऽतपावनतीर्थहेतू ।

पाषाण मेणनयनाविभवं नयन्तौ

भद्राद्रिरामचरणौ शरणं प्रपद्ये ॥ १५॥

श्री वेङ्कटार्यपदपङ्कजसेवकेन

श्री श्रीनिवास चरमावधिकिङ्क रेण ।

प्रोक्ता प्रपत्तिविनुतिं पठतां जनानां

भद्राद्रिराड्दिशतु भद्र मनिद्रमेव ॥ १६॥

इति श्री भद्राद्रीराम शरणागतिः समाप्ता ।

******

# श्रीमङ्गलश्लोकरामायणम्

सर्वलोकशरण्याय साकेतपुरवासिने ।

सत्सेविताय रामाय ससीतायास्तु मङ्गलम् ॥ १॥

कौसल्यायां दशरथाज्जाताय परमात्मने ।

सदा भरतसौमित्रिशत्रुघ्नेशाय मङ्गलम् ॥ २॥

कौशिकक्रतुरक्षार्थं कृत्वा मारीचमर्दनम् ।

अहल्यापापनाशाय रघुनाथाय मङ्गलम् ॥ ३॥

जित्वा (भङ्क्त्वा) शैवं पुरा चापं प्राप्य सीतामनुत्तमाम् ।

अयोध्यामागतायास्तु गुणपूर्णाय मङ्गलम् ॥ ४॥

पितुः सत्यप्रतिज्ञायै कैकेय्या वचनादपि ।

चित्रकूटनिवासाय सीतारामाय मङ्गलम् ॥ ५॥

पादुके भरते याते दत्त्वा राज्यस्य पालने ।

दण्डकारण्यवासाय धैर्ययुक्ताय मङ्गलम् ॥ ६॥

हत्वा विराधं बलिनं मुनीनां भावितात्मनाम् ।

दत्ताभयाय रामाय पद्माक्षायास्तु मङ्गलम् ॥ ७॥

चतुर्दशसहस्राणां रक्षसां क्रूरकर्मणाम् ।

खरदूषणमुख्यानां हारिणेऽस्तु सुमङ्गलम् ॥ ८॥

सीतादर्शनयुक्ताय गृध्रमोक्षप्रकाशिने ।

कबन्धहारिणे तस्मै राघवायास्तु मङ्गलम् ॥ ९॥

शबर्या दत्तपूजाय सेविताय हनूमता ।

सुग्रीवकृतसख्याय धैर्ययुक्ताय मङ्गलम् ॥ १०॥

वालिनं बलिनं हत्वा सुग्रीवमभिषिच्य च ।

वर्षरात्रनिवासाय रामचन्द्राय मङ्गलम् ॥ ११॥

कालातिक्रमणाच्चैव कुपिताय महात्मने ।

आगते सति सुग्रीवे प्रसन्नायास्तु मङ्गलम् ॥ १२॥

अङ्गुलीयप्रदात्रे च हनूमति महात्मने ।

सीतां दृष्ट्वागते तस्मिन् हर्षयुक्ताय मङ्गलम् ॥ १३॥

अशोकवनिकामध्ये श्रुत्वा सीतां हनूमता ।

सुग्रीवकृतयानाय रघुनाथाय मङ्गलम् ॥ १४॥

अथागतं महात्मानमभिषिच्य विभीषणम् ।

कृतसागरबन्धाय सानुजायास्तु मङ्गलम् ॥ १५॥

सेतुना सुखमासाद्य लङ्कां रावणपालिताम् ।

सुवेलगिरिवासाय रणधीराय मङ्गलम् ॥ १६॥

सुग्रीवेण दशग्रीवे मुष्टियुद्धेन मूर्छिते ।

इन्द्रजिन्नागबद्धाय विमुक्तायास्तु मङ्गलम् ॥ १७॥

धूम्राक्षे वायुपुत्रेण वज्रदंष्ट्रेऽङ्गदेन च ।

प्रहस्ते नीलनिहते हर्षयुक्ताय मङ्गलम् ॥ १८॥

नयत्यौषधिशैलेन्द्रं हनूमति महात्मने ।

ब्रह्मास्त्रबन्धयुक्ताय विमुक्तायास्तु मङ्गलम् ॥ १९॥

रावणिं च हतं श्रुत्वा लक्ष्मणेन महाबलम् ।

निहत्य मकराक्षं च प्रसन्नायास्तु मङ्गलम् ॥ २०॥

जित्वा रावणकोटीरं कुम्भकर्णं निहत्य च ।

अतिकायं हतं श्रुत्वा प्रीतियुक्ताय मङ्गलम् ॥ २१॥

ततो मूलबलं हत्वा रावणं च महाबलात् ।

विजयं प्राप्य हृष्टाय रघुनाथाय मङ्गलम् ॥ २२॥

ततोऽग्निवचनात् सीतां प्राप्य हृष्टां यशस्विनीम् ।

ब्रह्मस्तुत्या प्रहृष्टाय रामभद्राय मङ्गलम् ॥ २३॥

विभीषणं महात्मानं लङ्कायामभिषिच्य च ।

वानरै राक्षसैः सार्धं पुष्पकस्थाय मङ्गलम् ॥ २४॥

मदनाकृतये तस्मै मधुरापुरवासिने ।

मनुवंशप्रदीपाय मानवेन्द्राय मङ्गलम् ॥ २५॥

प्राप्यायोध्यां च भरतं गङ्गातोयैः सुगन्धिभिः ।

अभिषिक्ताय रामाय ससीतायास्तु मङ्गलम् ॥ २६॥

मधुरापुरवासाय वसुदेवसुतप्रभुः ।

श्रीराममङ्गलं नित्यं शृण्वतां सुकृतं भवेत् ॥ २७॥

एवं वाल्मीकिना प्रोक्तं रामायणकथामृतम् ।

यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥ २८॥

अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः ।

अधनाः सधनाः सन्तु जीवन्तु शरदां शतम् ॥ २९॥

इति श्रीमङ्गलश्लोकरामायणं सम्पूर्णम् ।



# श्रीरघुनाथमङ्गलस्तोत्रम्

मङ्गलं लोकरामाय रघुरामाय मङ्गलम् ।

मङ्गलं पद्मवक्त्राय रामभद्राय मङ्गलम् ॥ १॥

मङ्गलं कोसलेन्द्राय रामचन्द्राय मङ्गलम् ।

मङ्गलं मम नाथाय रघुनाथाय मङ्गलम् ॥ २॥

मङ्गलं रणधीराय रघुवीराय मङ्गलम् ।

मङ्गलं सत्यसन्धाय राजसिंहाय मङ्गलम् ॥ ३॥

मङ्गलं निरवद्याय वेदवेद्याय मङ्गलम् ।

मङ्गलं मुक्तिमूलाय मेघनीलाय मङ्गलम् ॥ ४॥

मङ्गलं सत्वरध्वस्तरुद्रचापाय मङ्गलम् ।

मङ्गलं जानकीनेत्रपूर्णपात्राय मङ्गलम् ॥ ५॥

मङ्गलं मिथिलानाथमौलिरत्नाय मङ्गलम् ।

मङ्गलं निस्सपत्नाय मङ्गलं नीलशालिने ॥ ६॥

मङ्गलं मैथिलीधन्यवनवासाय मङ्गलम् ।

मङ्गलं लक्ष्मणोपात्तभृत्यकृत्याय मङ्गलम् ॥ ७॥

मङ्गलं गुहसङ्गेन गङ्गाकूलनिवासिने ।

मङ्गलं गौतमीतीरपारिजाताय मङ्गलम् ॥ ८॥

मङ्गलं दण्डकारण्यवासिनिर्वातचेतसे ।

मङ्गलं शबरीदत्तफलमूलाभिलाषिणे ॥ ९॥

मङ्गलं सद्गुणारोपचापहस्ताय मङ्गलम् ।

मङ्गलं वायुपुत्रेण वन्दनीयाय मङ्गलम् ॥ १०॥

मङ्गलं वालिसुग्रीवहर्षशोकाभिघातिने ।

मङ्गलं मैथिलीमौलिमणिरञ्जितवक्षसे ॥ ११॥

मङ्गलं सर्वलोकानां शरण्याय महीयसे ।

मङ्गलं सागरोत्साहशृङ्गभङ्गविधायिने ॥ १२॥

मङ्गलं वासवामित्रमर्दनोवृत्तबाहवे ।

मङ्गलं विश्वमित्राय विद्रावणदयादृशे ॥ १३॥

मङ्गलं वीक्षमाणाय मैथिलीवदनाम्बुजम् ।

मङ्गलं विनिवृत्ताय पुरं पौरनिवृत्तये ॥ १४॥

मङ्गलं भरतप्रीतिप्राप्तराज्याय मङ्गलम् ।

मङ्गलं मैथिलीयोगमहनीयाय मङ्गलम् ॥ १५॥

मङ्गलं हारकोटीरपादपीठाय मङ्गलम् ।

मङ्गलं रणधुर्याय तुङ्गपन्नगशायिने ॥ १६॥

मङ्गलं सहृयजामात्यसान्निध्यकृतचेतसे ।

मङ्गलं मानुषे लोके वैकुण्ठमिति तिष्ठते ॥ १७॥

शेषशैलनिवासाय श्रीनिवासाय मङ्गलम् ।

मङ्गलं वेधसो वेदिमेदिनीग्रहमेधिने ॥ १८॥

वरदाय दयाधाम्ने वीरोदाराय मङ्गलम् ।

मङ्गलं धनदादानदत्तसक्तिषि सम्पदे (?) ॥ १९॥

मङ्गलं नारसिंहाय नरसिंहाय मङ्गलम् ।

मङ्गलं मामहीनीलानित्यमुक्तैकचक्षुषे ॥ २०॥

य इदं कीर्तयेन्नित्यं मङ्गलं मङ्गलस्तवम् ।

वर्तयेत् पुरतस्तस्य मङ्गलायतनं हरिः ॥ २१॥

इति श्रीरघुनाथमङ्गलं सम्पूर्णम् ।



# श्रीराघवस्तोत्रम्

इन्द्रनीलाचलश्याममिन्दीवरदृगुज्ज्वलम् ।

इन्द्रादिदैवतैः सेव्यमीडे राघवनन्दनम् ॥ १॥

पालिताखिलदेवौघं पद्मगर्भं सनातनम् ।

पीनवक्षःस्थलं वन्दे पूर्णं राघवनन्दनम् ॥ २॥

दशग्रीवरिपुं भद्रं दावतुल्यं सुरद्विषाम् ।

दण्डकामुनिमुख्यानां दत्ताभयमुपास्महे ॥ ३॥

कस्तूरीतिलकाभासं कर्पूरनिकराकृतिम् ।

कातरीकृतदैत्यौघं कलये रघुनन्दनम् ॥ ४॥

खरदूषणहन्तारं खरवीर्यभुजोज्ज्वलम् ।

खरकोदण्डहस्तं च खस्वरूपमुपास्महे ॥ ५॥

गजविक्रान्तगमनं गजार्तिहरतेजसम् ।

गम्भीरसत्त्वमैक्ष्वाकं गच्छामि शरणं सदा ॥ ६॥

घनराजिलसद्देहं घनपीताम्बरोज्ज्वलम् ।

घूत्कारद्रुतरक्षौघं प्रपद्ये रघुनन्दनम् ॥ ७॥

चलपीताम्बराभासं चलत्किङ्किणिभूषितम् ।

चन्द्रबिम्बमुखं वन्दे चतुरं रघुनन्दनम् ॥ ८॥

सुस्मिताञ्चितवक्त्राब्जं सुनू पुरपदद्वयम् ।
सुदीर्घबाहुयुगलं सुनाभिं राघवं भजे ॥ ९॥
हसिताञ्चितनेत्राब्जं हताखिलसुरद्विषम् ।
हरिं रविकुलोद्भूतं हाटकालङ्कृतं भजे ॥ १०॥
रविकोटिनिभं शान्तं राघवाणामलङ्कृतिम् ।
रक्षोगणयुगान्ताग्निं रामचन्द्रमुपास्महे ॥ ११॥
लक्ष्मीसमाश्रितोरस्कं लावण्यमधुराकृतिम् ।
लसदिन्दीवरश्यामं लक्ष्मणाग्रजमाश्रये ॥ १२॥
वालिप्रमथनाकारं वालिसूनुसहायिनम् ।
वरपीताम्बराभासं वन्दे राघवभूषणम् ॥ १३॥
शमिताखिलपापौघं शान्त्यादिगुणवारिधिम् ।
शतपत्रदृशं वन्दे शुभं दशरथात्मजम् ॥ १४॥
कुन्दकुड्मलदन्ताभं कुङ्कुमाङ्कितवक्षसम् ।
कुसुम्भवस्त्रसंवीतं पुत्रं राघवमाश्रये ॥ १५॥
मल्लिकामालतीजातिमाधवीपुष्पशोभितम् ।
महनीयमहं वन्दे महतां कीर्तिवर्धनम् ॥ १६॥
इदं यो राघवस्तोत्रं नरः पठति भक्तिमान् ।
मुक्तः संसृतिबन्धादधि स याति परमं पदम् ॥ १७॥

इति श्रीराघवस्तोत्रं सम्पूर्णम् ।

# राघवाष्टकम्

राघवं करुणाकरं मुनि-सेवितं सुर-वन्दितं

जानकीवदनारविन्द-दिवाकरं गुणभाजनम् ।

वालिसूनु-हितैषिणं हनुमत्प्रियं कमलेक्षणं

यातुधान-भयंकरं प्रणमामि राघवकुञ्जरम् ॥ १॥

मैथिलीकुच-भूषणामल-नीलमौक्तिकमीश्वरं

रावणानुजपालनं रघुपुङ्गवं मम दैवतम् ।

नागरी-वनिताननांबुज-बोधनीय-कलेवरं

सूर्यवंशविवर्धनं प्रणमामि राघवकुञ्जरम् ॥ २॥

हेमकुण्डल-मण्डितामल-कण्ठदेशमरिन्दमं

शातकुंभ-मयूरनेत्र-विभूषणेन-विभूषितम् ।

चारुनूपुर-हार-कौस्तुभ-कर्णभूषण-भूषितं

भानुवंश-विवर्धनं प्रणमामि राघवकुञ्जरम् ॥ ३॥

दण्डकाख्यवने रतामर-सिद्धयोगि-गणाश्रयं

शिष्टपालन-तत्परं धृतिशालिपार्थ-कृतस्तुतिम् ।

कुंभकर्ण-भुजाभुजंगविकर्तने सुविशारदं

लक्ष्मणानुजवत्सलं प्रणमामि राघवकुञ्जरम् ॥ ४॥

केतकी-करवीर-जाति-सुगन्धिमाल्य-सुशोभितं

श्रीधरं मिथिलात्मजाकुच-कुंकुमारुण-वक्षसम् ।

देवदेवमशेषभूत-मनोहरं जगतां पतिं

दासभूतभयापहं प्रणमामि राघवकुञ्जरम् ॥ ५॥

यागदान-समाधि-होम-जपादिकर्मकरैर्द्विजैः

वेदपारगतैरहर्निशमादरेण सुपूजितम् ।

ताटकावधहेतुमंगदतात-वालि-निषूदनं

पैतृकोदितपालकं प्रणमामि राघवकुञ्जरम् ॥ ६॥

लीलया खरदूषणादि-निशाचराशु-विनाशनं

रावणान्तकमच्युतं हरियूथकोटि-गणाश्रयम् ।

नीरजाननमंबुजांघ्रियुगं हरिं भुवनाश्रयं

देवकार्य-विचक्षणं प्रणमामि राघवकुञ्जरम् ॥ ७॥

कौशिकेन सुशिक्षितास्त्र-कलापमायत-लोचनं

चारुहासमनाथ-बन्धुमशेषलोक-निवासिनम् ।

वासवादि-सुरारि-रावणशासनं च परांगतिं

नीलमेघ-निभाकृतिं प्रणमामि राघवकुञ्जरम् ॥ ८॥

राघवाष्टकमिष्टसिद्धिदमच्युताश्रय-साधकं

मुक्ति-भुक्तिफलप्रदं धन-धान्य-सिद्धि-विवर्धनम् ।

रामचन्द्र-कृपाकटाक्षदमादरेण सदा जपेत्

रामचन्द्र-पदांबुजद्वय-सन्ततार्पित-मानसः ॥ ९॥

राम राम नमोऽस्तु ते जय रामभद्र नमोऽस्तु ते

रामचन्द्र नमोऽस्तु ते जय राघवाय नमोऽस्तु ते ।

देवदेव नमोऽस्तु ते जय देवराज नमोऽस्तु ते

वासुदेव नमोऽस्तु ते जय वीरराज नमोऽस्तु ते ॥ १०॥

॥ इति श्रीराघवाष्टकं संपूर्णम् ॥



# श्रीराम आपदुद्धारकस्तोत्रम्

आपदामपहर्तारं दातारं सर्वसम्पदां

लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ।

नमः कोदण्डहस्ताय सन्धीकृतशराय च

दण्डिताखिलदैत्याय रामायापन्निवारिणे ॥ १॥

आपन्नजनरक्षैकदीक्षायामिततेजसे ।

नमोऽस्तु विष्णवे तुभ्यं रामायापन्निवारिणे ॥ २॥

पदाम्भोजरजस्पर्शपवित्रमुनियोषिते ।

नमोऽस्तु सीतापतये रामायापन्निवारिणे ॥ ३॥

दानवेन्द्रमहामत्तगजपञ्चास्यरूपिणे ।

नमोऽस्तु रघुनाथाय रामायापन्निवारिणे ॥ ४॥

महिजाकुचसंलग्नकुङ्कुमारुणवक्षसे ।

नमः कल्याणरूपाय रामायापन्निवारिणे ॥ ५॥

पद्मसम्भवभूतेशमुनिसंस्तुतकीर्तये ।

नमो मार्ताण्डवंश्याय रामायापन्निवारिणे ॥ ६॥

हरत्यार्तिं च लोकानां यो वा मधुनिषूदनः ।

नमोऽस्तु हरये तुभ्यं रामायापन्निवारिणे ॥ ७॥

तापकारणसंसारगजसिंहस्वरूपिणे ।

नमो वेदान्तवेद्याय रामायापन्निवारिणे ॥ ८॥

रङ्गत्तरङ्गजलधिगर्वहृच्छरधारिणे ।

नमः प्रतापरूपाय रामायापन्निवारिणे ॥ ९॥

दारोपहितचन्द्रावतंसध्यातस्वमूर्तये ।

नमः सत्यस्वरूपाय रामायापन्निवारिणे ॥ १०॥

तारानायकसङ्काशवदनाय महौजसे ।

नमोऽस्तु ताटकाहन्त्रे रामायापन्निवारिणे ॥ ११॥

रम्यसानुलसच्चित्रकूटाश्रमविहारिणे ।

नमस्सौमित्रिसेव्याय रामायापन्निवारिणे ॥ १२॥

सर्वदेवाहितासक्त दशाननविनाशिने ।

नमोऽस्तु दुःखध्वंसाय रामायापन्निवारिणे ॥ १३॥

रत्नसानुनिवासैक वन्द्यपादाम्बुजाय च ।

नमस्त्रैलोक्यनाथाय रामायापन्निवारिणे ॥ १४॥

संसारबन्ध मोक्षैकहेतुदामप्रकाशिने ।

नमः कलुषसंहर्त्रे रामायापन्निवारिणे ॥ १५॥

पवनाशुगसङ्क्षिप्तमारीचादिसुरारये ।

नमो मखपरित्रात्रे रामायापन्निवारिणे ॥ १६॥

दाम्भिकेतरभक्तौघमहानन्दप्रदायिने ।

नमः कमलनेत्राय रामायापन्निवारिणे ॥ १७॥

लोकत्रयोद्वेगकरकुम्भकर्णशिरश्छिदे ।

नमो नीरददेहाय रामायापन्निवारिणे ॥ १८॥

काकासुरैकनयनहरल्लीलास्त्रधारिणे ।

नमो भक्तैकवेद्याय रामायापन्निवारिणे ॥ १९॥

भिक्षुरूप समाक्रान्तबलिसर्वैकसम्पदे ।

नमो वामनरूपाय रामायापन्निवारिणे ॥ २०॥

राजीवनेत्रसुस्पन्दरुचिराङ्गसुरोचिषे ।

नमः कैवल्यनिधये रामायापन्निवारिणे ॥ २१॥

मन्दमारुतसंवीतमन्दारद्रुमवासिने ।

नमः पल्लवपादाय रामायापन्निवारिणे ॥ २२॥

श्रीकण्ठचापदलनधुरीणबलबाहवे ।

नमः सीतानुषक्ताय रामायापन्निवारिणे ॥ २३॥

राजराजसुहृद्योषार्चितमङ्गलमूर्तये ।

नम इक्ष्वाकुवंश्याय रामायापन्निवारिणे ॥ २४॥

मञ्जुलादर्शविप्रेक्षणोत्सुकैकविलासिने ।

नमः पालितभक्ताय रामायापन्निवारिणे ॥ २५॥

भूरिभूधरकोदण्डमूर्तिध्येयस्वरूपिणे ।

नमोऽस्तु तेजोनिधये रामायापन्निवारिणे ॥ २६॥

योगीन्द्रहृत्सरोजातमधुपाय महात्मने ।

नमो राजाधिराजाय रामायापन्निवारिणे ॥ २७॥

भूवराहस्वरूपाय नमो भूरिप्रदायिने ।

नमो हिरण्यगर्भाय रामायापन्निवारिणे ॥ २८॥

योषाञ्जलिविनिर्मुक्त लाजाञ्चितवपुष्मते ।

नमस्सौन्दर्यनिधये रामायापन्निवारिणे ॥ २९॥

नखकोटिविनिर्भिन्नदैत्याधिपतिवक्षसे ।

नमो नृसिंहरूपाय रामायापन्निवारिणे ॥ ३०॥

मायामानुषदेहाय वेदोद्धरणहेतवे ।

नमोऽस्तु मत्स्यरूपाय रामायापन्निवारिणे ॥ ३१॥

मितिशून्य महादिव्यमहिम्ने मानितात्मने ।

नमो ब्रह्मस्वरूपाय रामायापन्निवारिणे ॥ ३२॥

अहङ्कारेतरजनस्वान्तसौधविहारिणे ।

नमोऽस्तु चित्स्वरूपाय रामायापन्निवारिणे ॥ ३३॥

सीतालक्ष्मणसंशोभिपार्श्वाय परमात्मने ।

नमः पट्टाभिषिक्ताय रामायापन्निवारिणे ॥ ३४॥

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।

लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ ३५॥

## फलश्रुति

इमं स्तवं भगवतः पठेद्यः प्रीतमानसः ।

प्रभाते वा प्रदोषे वा रामस्य परमात्मनः ॥ १॥

स तु तीर्त्वा भवाम्भोधिमापदस्सकला अपि ।

रामसायुज्यमाप्नोति देवदेवप्रसादतः ॥ २॥

कारागृहादिबाधासु सम्प्राप्ते बहुसङ्कटे ।

अपन्निवारकस्तोत्रं पठेद्यस्तु यथाविधि ॥ ३॥

संयोज्यानुष्टुभं मन्त्रमनुश्लोकं स्मरन् विभुम् ।

सप्ताहात्सर्वबाधाभ्यो मुच्यते नात्र संशयः ॥ ४॥

द्वात्रिंशद्वारजपतः प्रत्यहं तु दृढव्रतः ।

वैशाखे भानुमालोक्य प्रत्यहं शतसङ्ख्यया ॥ ५॥

धनवान् धनदप्रख्यस्स भवेन्नात्र संशयः ।

बहुनात्र किमुक्तेन यं यं कामयते नरः ॥ ६॥

तं तं काममवाप्नोति स्तोत्रेणानेन मानवः ।

यन्त्रपूजाविधानेन जपहोमादितर्पणैः ॥ ७॥

यस्तु कुर्वीत सहसा सर्वान् कामानवाप्नुयात् ।

इह लोके सुखी भूत्वा परे मुक्तो भविष्यति ॥ ८॥



# श्रीरामचालीसा

श्री रघुबीर भक्त हितकारी । सुनि लीजै प्रभु अरज हमारी ॥

निशि दिन ध्यान धरै जो कोई।ता सम भक्त और नहिं होई ॥

ध्यान धरे शिवजी मन माहीं । ब्रह्मा इन्द्र पार नहिं पाहीं ॥

जय जय जय रघुनाथ कृपाला । सदा करो सन्तन प्रतिपाला ॥

दूत तुम्हार वीर हनुमाना । जासु प्रभाव तिहूँ पुर जाना ॥

तुव भुजदण्ड प्रचण्ड कृपाला । रावण मारि सुरन प्रतिपाला ॥

तुम अनाथ के नाथ गोसाईं । दीनन के हो सदा सहाई ॥

ब्रह्मादिक तव पार न पावैं । सदा ईश तुम्हरो यश गावैं ॥

चारिउ वेद भरत हैं साखी । तुम भक्तन की लज्जा राखी ॥

गुण गावत शारद मन माहीं । सुरपति ताको पार न पाहीं ॥

नाम तुम्हार लेत जो कोई । ता सम धन्य और नहिं होई ॥

राम नाम है अपरम्पारा । चारिहु वेदन जाहि पुकारा ॥

गणपति नाम तुम्हारो लीन्हों।तिनको प्रथम पूज्यतुम कीन्हों ॥

शेष रटत नित नाम तुम्हारा । महि को भार शीश पर धारा ॥

फूल समान रहत सो भारा । पावत कोउ न तुम्हरो पारा ॥

भरत नाम तुम्हरो उर धारो । तासों कबहुँ न रण में हारो ॥

नाम शत्रुहन हृदय प्रकाशा । सुमिरत होत शत्रु कर नाशा ॥

लषन तुम्हारे आज्ञाकारी । सदा करत सन्तन रखवारी ॥

ताते रण जीते नहिं कोई । युद्ध जुरे यमहूँ किन होई ॥

महा लक्श्मी धर अवतारा । सब विधि करत पाप को छारा ॥

सीता राम पुनीता गायो । भुवनेश्वरी प्रभाव दिखायो ॥

घट सों प्रकट भई सो आई । जाको देखत चन्द्र लजाई ॥

सो तुमरे नित पांव पलोटत ।नवो निद्धि चरणन में लोटत ॥

सिद्धि अठारह मंगल कारी । सो तुम पर जावै बलिहारी ॥

औरहु जो अनेक प्रभुताई । सो सीतापति तुमहिं बनाई ॥

इच्छा ते कोटिन संसारा । रचत न लागत पल की बारा ॥

जो तुम्हरे चरनन चित लावै । ताको मुक्ति अवसि हो जावै ॥

सुनहु राम तुम तात हमारे । तुमहिं भरत कुल-पूज्य प्रचारे ॥

तुमहिं देव कुल देव हमारे । तुम गुरु देव प्राण के प्यारे ॥

जो कुछ हो सो तुमहीं राजा।जय जय जय प्रभु राखो लाजा ॥

रामा आत्मा पोषण हारे । जय जय जय दशरथ के प्यारे ॥

जय जय जय प्रभु ज्योति स्वरूपा।निगुण ब्रह्म अखण्ड
अनूपा॥

सत्य सत्य जय सत्य-ब्रत स्वामी। सत्य सनातन अन्तर्यामी ॥

सत्य भजन तुम्हरो जो गावै । सो निश्चय चारों फल पावै ॥

सत्य शपथ गौरीपति कीन्हीं।तुमनेभक्तहिं सबसिद्धि दीन्हीं ॥

ज्ञान हृदय दो ज्ञान स्वरूपा । नमो नमो जय जापति भूपा ॥

धन्य धन्य तुम धन्य प्रतापा । नाम तुम्हार हरत संतापा ॥

सत्य शुद्ध देवन मुख गाया । बजी दुन्दुभी शंख बजाया ॥

सत्य सत्य तुम सत्य सनातन।तुमहीं हो हमरे तन मन धन ॥

याको पाठ करे जो कोई । ज्ञान प्रकट ताके उर होई ॥

आवागमन मिटै तिहि केरा । सत्य वचन माने शिव मेरा ॥

और आस मन में जो ल्यावै । तुलसी दल अरु फूल चढ़ावै ॥

साग पत्र सो भोग लगावै । सो नर सकल सिद्धता पावै ॥

अन्त समय रघुबर पुर जाई । जहाँ जन्म हरि भक्त कहाई ॥

श्री हरि दास कहै अरु गावै । सो वैकुण्ठ धाम को पावै ॥

सात दिवस जो नेम कर पाठ करे चित लाय ।

हरिदास हरिकृपा से अवसि भक्ति को पाय ॥

राम चालीसा जो पढ़े रामचरण चित लाय ।

जो इच्छा मन में करै सकल सिद्ध हो जाय ॥

# ॥ श्री राम स्तुति ॥

श्री रामचन्द्र कृपालु भजु मन हरण भव भय दारुणं ।

नवकंज-लोचन कंज मुख कर कंज पद कंजारुणं ॥

कन्दर्प अगणित अमित छवि नवनील-नीरद सुन्दर ।

पटपीत मानहु तड़ित रुचि शुचि नौमि जनक सुतावरं ॥

भजु दीन बन्धु दिनेश दानव दैत्यवंश-निकन्दनं ।

रघुनन्द आनन्द कंद कौशलचन्द दशरथ्-नन्दनं ॥

सिर मुकुट कुण्डल तिलक चारु उदारु अंग विभूषणं ।

आजानु-भुज-शर-चाप-धर- संग्राम जित-खरदूषणं ॥

इति वदति तुलसीदास शंकर-शेष-मुनि-मन-रंजन ।

मम हृदय-कंज निवास कुरु कामादि खलदल-गंजन ॥

मनु जाहिं राचेऊ मिलिहि सो बरु सहज सुंदर साँवरो ।

करुणानिधानु सुजान सीलु सनेहु जानत रावरो ॥

एहि भाँति गौरि असीस सुनि सिय सहित हियँ हरषी अली ।

तुलसी भवानिहि पूजि पुनि पुनि मुदित मन मंदिर चली ॥

दोहा :: जानि गौरी अनुकूअ सिय हिय हरषु न जाइ कहि ।

मंजुल मंगल मूल बाम अंग फरकन लगे ॥

# ॥ श्री रामाष्टकः ॥

हे रामा पुरुषोत्तमा नरहरे नारायणा केशवा ।

गोविन्दा गरुडध्वजा गुणनिधे दामोदरा माधवा ॥

हे कृष्ण कमलापते यदुपते सीतापते श्रीपते ।

वैकुण्ठाधिपते चराचरपते लक्श्मीपते पाहि माम् ॥

आदौ रामतपोवनादि गमनं हत्वा मृगं कांचनम् ।

वैदेही हरणं जटायु मरणं सुग्रीव सम्भाषणम् ॥

वालीनिर्दलनं समुद्रतरणं लंकापुरीदाहनम् ।

पश्चाद्रावण कुम्भकर्णहननं एतद्धि रामायणम् ॥

## ॥ आरती श्रीरामचन्द्रजी की ॥

जगमग जगमग जोत जली है । राम आरती होन लगी है ॥

भक्ति का दीपक प्रेम की बाती। आरती संत करें दिन राती ॥

आनन्द की सरिता उभरी है। जगमग जगमग जोत जली है ॥

कनक सिंहासन सिया समेता । बैठहिं राम होई चित चेता ॥

वाम भाग में जनक लली है। जगमग जगमग जोत जली है ॥

आरती हनुमत के मन भावे । राम कथा नित शंकर गावे ॥

संतों की ये भीड़ लगी है । जगमग जगमग जोत जली है ॥

# श्रीरामदण्डकम्

## श्रीरामध्यानम् ।

हत्वा युद्धे दशास्यं त्रिभुवनविषमं वामहस्तेन चापं

भूमौ विष्टभ्य तिष्ठन्नितरकरधृतं भ्रामयन्बाणमेकम् ।

आरक्तोपान्तनेत्रः शरदलितवपुः कोटिसूर्यप्रकाशो

वीरश्रीबन्धुराङ्गस्त्रिदशपतिनुतः पातु मां वीररामः ॥

अथ श्रीरामदण्डकं स्तोत्रम् । ॐ श्रीरामपरब्रह्मणे नमः ।

श्रीमदखिलाण्डकोटिब्रह्माण्डभाण्डदण्डोपदण्डकरण्डमला

शान्तोद्दीपित-

सगुणनिर्गुणातीतसच्चिदानन्दपरात्परतारकब्रह्माह्वयदशदिक्
प्रकाशं, सकलचराचराधीशम् ॥ १॥

कमलसम्भवशचीधवप्रमुखनिखिलवृन्दारकवृन्दवन्द्यमानसन्दी
प्त-दिव्यचारणारविन्दं, श्रीमुकुन्दम् ॥ २॥

दुष्टनिग्रहशिष्टपरिपालनोत्कट

कपटनाटकसूत्रचरित्रारञ्जितबहुविधावतारं, श्रीरघुवीरम् ॥ ३॥

कौसल्यादाशरथमनोरथामन्दानन्दकन्दलिताधिरूढक्रीडा-

विलोलनशैशवं श्रीकेशवम् ॥ ४॥

विश्वामित्रयज्ञविघ्नकारणोत्कटताटकासुवाहुबाहुबलविदलन-

बाणप्रवीणकोपपरायणं, श्रीमन्नारायणम् ॥ ५॥

निजपादजलजरजः कणस्पर्शनीयशिलारूपशापविमुक्त-

गौतमसतीविनुतमहीधवं, श्रीमाधवम्! ॥ ६॥

खण्डेन्दुधरप्रचण्डकोदण्डखण्डनोद्दण्डदर्द्दण्डकौशिक-

लोचनोत्सवजनकचक्रेश्वरसमर्पितसीताविवाहोत्सवानन्दं,

श्रीगोविन्दम् ॥ ७॥

परशुरामभूजाखर्वगर्वनिर्वापणपदानुगतरणविजयवर्तिष्णुं

श्रीविष्णुम् ॥ ८॥

पितृवाक्यपरिपालनोत्कटजटावल्कलोद्यतसीतालक्ष्मणसहित-

महितराज्याभिमतदृढव्रतसङ्कलितप्रयाणरङ्गगाङ्गावतरणसाधनं

श्रीमधुसूदनम् ॥ ९॥

भरद्वाजोपचारनिवारितश्रमक्रमनिराघाटचित्रकूटप्रवेशकक्रमं,

श्रीत्रिविक्रमम् ॥ १०॥

जनकवियोगशोकाकुलितभरतशत्रुघ्नलालनानुकूल-

भरतपादुकाप्रदानसुधानिर्मितान्तःकरणदुष्टचेष्टायमान-

क्रूरकाकासुरगर्वोपशमनं, श्रीवामनम् ॥ ११॥

दण्डकागमनविरोधक्रोधविराधानलज्वालाजलधरं श्रीधरम् ॥ १२॥

शरभङ्गसुतीक्ष्णात्रिदर्शनाशीर्वादनिर्व्याजकुम्भसम्भव-

कृपालब्धमहादिव्यास्त्रसमुदायार्जितप्रकाशं, श्रीहृषीकेशम् ॥ १३॥

पञ्चवटीतटीसङ्घटितविशालपर्णशालागतशूर्पणखानासिकाच्छेदन-

मानावबोधनमहाहवारम्भणविजृम्भणरावणनियोगमायामृगसंहार-

कार्यार्थलाभं, श्रीपद्मनाभम् ॥ १४॥

रात्रिञ्चरवरवञ्चनापहृतसीतान्वेषणरतपङ्क्तिकन्थरक्षोभ-

शिथिलीकृतपक्षजटायुर्मोक्षबन्धुक्रियावसाननिर्बन्धनकबन्ध-

वक्त्रोदरशरीरनिरादरं, श्रीमद्दामोदरम् ॥ १५॥

शबर्योपदेशपम्पातटहनुमत्सुग्रीवसम्भाषित बन्धुराद्वन्ददुन्दुभि-

कलेबरोत्पतनसप्तसालच्छेदनबालिविदारणप्रसन्नयुग्रीव-

साम्राज्यसुखमर्षणं, श्रीसङ्कर्षणम् ॥ १६॥

सुग्रीवाङ्गदनीलजाम्बवत्पनसकेसरिप्रमुखनिखिलकपिनायकसेना-

समुदायार्चितसेवं, श्रीवासुदेवम् ॥ १७॥

निजदत्तमुद्रिकाजाग्रत्समुग्राञ्जनेयविनयवचनरचनाम्बुधि-

लङ्घितलङ्किणीप्राणोल्लङ्घनजनकजादर्शनाक्षकुमारमारण

लङ्कापुरीदहनतत्प्रतिष्ठित-सुखप्रसङ्गधृष्टद्युम्नं,
श्रीप्रद्युम्नम् ॥ १८॥

अग्रजोदग्रमहोग्रनिग्रहपलायमानापमाननीयनिजशरण्यागण्य
पुण्योदय-विभीषणाभयप्रदानानिरुद्धं, श्रीमदनिरुद्धम् ॥ १९॥

अपारलवणपारावारसमुज्जृम्भितोत्करणगर्वनिर्वापणदीक्षासमर्थ-
सेतुनिर्माणप्रवीणाखिलनरसुरोत्तमं, श्रीपुरुषोत्तमम् ॥ २०॥

निस्तुलप्रहस्तकुम्भकर्णेन्द्रजित्कुम्भनिकुम्भाग्निवर्णातिकायमहो
दर-महापार्श्वादिदनुजतनुखण्डनायमानकोदण्डगुणश्रवणशोषणहत
शेष-राक्षसव्रजं, श्री अधोक्षजम् ॥ २१॥

अकुण्ठितरणोपकण्ठदशकण्ठदनुजकण्ठीरवकण्ठलुण्ठनायमानज
यार्हं, श्रीनारसिंहम् ॥ २२॥

दशग्रीवानुजपट्टभद्रत्वशक्यविभवलङ्कापुरीस्फुरणसकलसाम्राज्य
-सुखोर्जितं, श्रीमदच्युतम् ॥ २३॥

सकलसुरासुराद्भुतप्रज्वलितपावकमुखपूतायमानसीतालक्ष्मणानुग
त-महनीयपुष्पकाधिरोहण नन्दिग्रामस्थितभ्रातृभिर्युतजटावत्कल-
विसर्जनाम्बरभूषणालङ्कृतश्रेयोविवर्धनं, श्रीजनार्द्दनम् ॥ २४॥

अयोध्यानगरपट्टाभिषेकविशेषमहोत्सवनिरन्तरदिगन्तविश्रान्तहा
रहीर-कर्पूरपयःपारावारापाराभवाणी
कुन्देन्दुमन्दाकिनीचन्दनसुरधेनु-

शरदम्बुदालीशरदम्भोली शतधाराधावल्यशुभकीर्त्तिच्छटान्तर-

पाण्डुरीभूतसभाविभ्राजमाननिखिलभुवनैकसान्द्रयशस्सान्द्रं,

श्री उपेन्द्रम् ॥ २५॥

भक्तजनसंरक्षणदीक्षाकटाक्षसुखोदयसमुत्सारिं, श्रीहरिम् ॥ २६॥

केशवादि चतुर्विंशतिनामगर्भसन्दर्भोचितनिज-

कथाङ्गीकृतमेधावतिष्णं, श्रीकृष्णम् ॥ २७॥

सर्वसुपर्वपार्वतीहृदयकमलतारकब्रह्मनामं, श्रीसम्पूर्णकामम्॥ २८

भवतरणानुयशस्सान्द्रं भवजनितभयोच्छेदविच्छात्रमच्छिद्रं

भक्तजनमनोरथोन्निद्रं, श्रीभद्राचलरामभद्रम् ॥ २९॥

ॐ श्रीरामभद्राय नमः । इति श्रीरामदण्डकं समाप्तम् ।



# श्रीरामद्वादशनामस्तोत्रम्

अस्य श्रीरामद्वादशनामस्तोत्रमहामन्त्रस्य, निटिलाक्षो भगवान् ऋषिः, अनुष्टुप्छन्दः, श्रीरामचन्द्रो देवता, श्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः ।

ॐ प्रथमं श्रीधरं विद्याद्द्वितीयं रघुनायकम् ।
तृतीयं रामचन्द्रं च चतुर्थं रावणान्तकम् ॥ १॥
पञ्चमं लोकपूज्यं च षष्ठमं जानकीपतिम् ।
सप्तमं वासुदेवं च श्रीरामं चाष्टमं तथा ॥ २॥
नवमं दूर्वादलश्यामं दशमं लक्ष्मणाग्रजम् ।
एकादशं च गोविन्दं द्वादशं सेतुबन्धनम् ॥ ३॥
द्वादशैतानि नामानि यः पठेच्छ्रद्धयान्वितः ।
अर्धरात्रे तु द्वादश्यां कुष्ठदारिद्र्यनाशनम् ॥ ४॥
अरण्ये चैव सङ्ग्रामे अग्नौ भयनिवारणम् ।
ब्रह्महत्या सुरापानं गोहत्याऽऽदि निवारणम् ॥ ५॥
सप्तवारं पठेन्नित्यं सर्वारिष्टनिवारणम् ।
ग्रहणे च जले स्थित्वा नदीतीरे विशेषतः ।
अश्वमेधशतं पुण्यं ब्रह्मलोके गमिष्यति ॥ ६॥

इति श्री स्कन्दपुराणे उत्तरखण्डे श्रीउमामहेश्वरसंवादे

श्रीरामद्वादशनामस्तोत्रं सम्पूर्णम् ।

ॐ प्रथमं श्रीकरं नित्यं द्वितीयं दशरथात्मजम् ।

तृतीयं रामचन्द्रं च चतुर्थं रावणान्तकम् ॥ १॥

पञ्चमं लोकपूज्यं च षष्ठमं जानकीप्रियम् ।

सप्तमं वासुदेवं च श्रीरामं चाष्टमं तथा ॥ २॥

नवमं दूर्वादलश्यामं दशमं लक्ष्मणाग्रजम् ।

एकादशं च गोविन्दं द्वादशं सेतुबन्धनम् ॥ ३॥

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।

दारिद्र्यदोषनिर्मुक्तो धनधान्यसमृद्धिकम् ॥ ४॥

सर्वसम्पत्प्रदं श्रेष्ठं सर्वकार्यवशीकरम् ।

दिव्यदेहमवाप्नोति दीर्घमायुष्यवर्धनम् ॥ ५॥

ग्रहरोग(दोष)विनाशं च सर्वकार्यफलप्रदम् ।

अरण्ये देवसङ्ग्रामे महाभयनिवारणम् ॥ ६॥

अर्धरात्रं जपेत् स्थित्वा सर्वारिष्टनिवारणम् ।

इहजन्मसुखी भूत्वा तद्विष्णोःपरमंपदम् ॥ ७॥

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे श्रीरामद्वादशनामस्तोत्रं सम्पूर्णम् ।

# रामनामाष्टोत्तरशतरामायणं

श्रीपतिः शेषशयनो रक्ष(१)स्त्रस्तसुरस्तुतः ।

वितीर्णेष्टाभयवरः सत्यसन्धः सुराश्रयः ॥ १॥

ऋष्यशृङ्गेष्टिसम्भूतः सूर्यवंशविभूषणः ।

चतु(२)र्मूतिर्दाशरथिः कौसल्येयोऽतिसुन्दरः ॥ २॥

कैकेयीनन्दनो रामः सुमित्रानन्दवर्धनः ।

लक्ष्मणानुचरो विद्वान् वसिष्ठच्छात्रसत्तमः ॥ ३॥

कौशिकात्तधनुर्वेदः सर्वशस्त्रास्त्रविद्वरः ।

ताडका(३)स्वनिलाहीषुर्मखप्रत्यूहनाशनः ॥ ४॥

सुबाहुप्राणसंहर्ता मारीच(४)स्मयभञ्जनः ।

अहल्यांहो(५)नगपविः शतानन्दस्तवाञ्चितः ॥ ५॥

महेश्वरधनुर्भेत्ता जानकीप्राणवल्लभः ।

जामदग्न्याहङ्कृतिघ्नः पितृचित्तप्रसाधकः ॥ ६॥

गुर्वर्थत्यक्तराज्यश्रीर्दारानुजसमन्वितः ।

सुमन्त्रसूतः सत्वाढ्यो वल्कली गुहसत्कृतः ॥ ७॥

भरद्वाजाभ्यनुज्ञातश्चित्रकूटकृतस्थितिः ।

निवापविधि(६)सन्निष्ठो भरतार्पितपादुकः ॥ ८॥

लब्धात्रिसत्कृतिः श्रीमान् मुनिप्रणतिसादरः ।

विराधोद्धरणोत्साही शरभङ्ग(७)सभाजितः ॥ ९॥

सुतीक्ष्णकृतसत्कारः कुम्भसम्भवपूजितः ।

कृतपञ्चवटीवासो जटायुर्विहितादरः ॥ १०॥

छिन्नशूर्पणखाघ्राणः खरघ्नो दूषणान्तकः ।

मायास्वर्णैणमारीचरक्षःप्राणापहारकः ॥ ११॥

यतिच्छद्मदशग्रीव(८)हृतप्राणप्रियाङ्गनः ।

दयिताविरहात्यार्त(९)सर्वकामिविडम्बकः ॥ १२॥

स्वतातसखगृध्रेन्द्रसुदुरापगतिप्रदः ।

कबन्धबाहुबन्धच्छित् शबरीक्षण निर्वृतः ॥ १३॥

पम्पातीरस्मृतप्राणप्रेयसीशोकविह्वलः ।

हनूमद्दर्शनप्रीतः सुग्रीवकृतसौहृदः ॥ १४॥

प्रियोत्तरीयभूषेक्षास्पर्शानन्दनिमीलितः ।

सप्ततालभिदुद्दामवालिहृद्भेदनिष्टुरः ॥ १५॥

सुग्रीवार्पितराज्यश्रीरङ्गजाङ्गदवत्सलः ।

प्रियान्वेषणनु(१०)न्नर्क्षकुञ्जरप्लवगर्षभः ॥ १६॥

(११)स्तुततीर्णाब्धिदृष्टार्थदग्धलङ्काञ्जनाङ्गजः ।

नैकर्क्षवानरचमूशतकम्पितभूनगः ॥ १७॥

शरण्यः शरणप्राप्तबिभीषणकृतोदयः ।

सेतुकृत्तीर्णवार्राशिः सामार्थप्रहिताङ्गदः ॥ १८॥

रक्षःकक्षमहादावो मेघनादान्तकानुजः ।

कुम्भकर्णाद्रिवज्रेषुर्दशास्यगजकेसरिः ॥ १९॥

दत्तदिव्यप्रियोपेतः पुष्पकाक्रमिताम्बरः ।

गुहविश्लेषतापघ्नो भरद्वाजाप्तसद्वरः ॥ २०॥

भरतप्रियकृद्राजपौरगुर्वभिषेचितः ।

अगस्त्यादिमहर्षीड्यः सर्वप्राणिहितोद्यतः ॥ २१॥

कृतप्रजातिकल्याणो व्य(१२)सुविप्रात्मजासुदः ।

शत्रुघ्नघातितात्युग्रद्विजारिलवणासुरः ॥ २२॥

त्रिजगद्गीतसत्कीर्तिरेकदुर्मतिनिन्दितः ।

संत्यक्त(१३)सत्वसम्पन्नोदारदारसमागमः ॥ २३॥

प्राचेतसाश्रमप्राप्ततेजःकुशलवात्मजः ।

अश्वमेधोत्सवावाप्तवाल्मीकिच्छात्रनन्दनः ॥ २४॥

भूयोदिव्यमहीमग्नमहिलाविरहातुरः ।

पुत्राष्टकपृथग्दत्तराज्यः प्राज्यप्रसादकृत् ॥ २५॥

शासना(१४)तिक्रमत्यक्तप्राणात्यधिकलक्ष्मणः ।

विहितस्वयशस्तुल्यप्रभञ्जनसुतस्थितिः ॥ २६॥

आर्केन्दु(१५)भूमि स्वकथाबिभीषणकृताभयः ।

सुहृद्भरतशत्रुघ्नसुग्रीवात्मगतिप्रदः ॥ २७॥

सर्वसत्वप्रियः पौरस्थितिसन्तानलोककृत् ।

विमानारोपिताशेषराष्ट्रायोध्याजनः प्रभुः ॥ २८॥

पवित्रसेव्यचरितो निगमाद्य(१६)कविस्तुतः ।

नमन्(१७)मयूरमुदिरः पुण्यश्लोकशिखामणिः ॥ २९॥

इति श्रीरामभद्रस्य नाम्नामष्टोत्तरं शतम् ।

रामायणपयोराशेरुद्धृतं परमामृतम् ॥ ३०॥

श्रीरामः जयति ॥

इति श्रीरामनन्दनमयूरेश्वरकृतं रामनामाष्टोत्तरशतरामायणं सम्पूर्णम् ।

## Footnotes

१. रक्षोभ्यः त्रस्ताः सुराः तैः स्तुतः ।

२. चतस्रः रामलक्ष्मणभरतशत्रुघ्नरूपा मूर्तयो यस्य सः ।

३. ताडकायाः अस्वनिलः प्राणवायुः तस्य अहिरिव सर्प इव इषुर्बाणो यस्य सः ।

४. स्मयो दर्पः।

५. अहल्याया अंहांसि दुरितानि तेषां नगः पर्वतः महान् समूह इत्यर्थः, तस्य पविः वज्रमिव ।

६. निवापः पितृभ्यो जलाञ्जलिदानम्, तस्य विधिः तस्मिन् सती निरतिशया निष्ठा यस्य सः ।

७. शरभङ्गेण मुनिना सभाजितः पूजितः ।

८. यतिच्छद्मना कपटयतिवेषेण रावणेन हृता प्राणेभ्योऽपि प्रिया अङ्गना यस्य सः ।

९. दयिताया विरहेण नितरां पीडिताः ये निखिलाः कामिनस्तान् विडम्बयतीति तादृशः ।

१०. प्रियान्वेषणार्थं नुन्नः प्रेरितः ऋक्षकुञ्जरो जाम्बवान् प्लवगर्षभाः वानरश्रेष्ठाश्च हनूमत्प्रभृतयो येन ।

११. स्तुतः तीर्णाब्धिः दृष्टसीतारूपार्थः दग्धलङ्कश्च अञ्जनाङ्गजो हनूमान् येन ।

१२. व्यसवे मृताय विप्रात्मजाय असून् ददातीति तादृशः ।

१३. सन्त्यक्तः परित्यक्तः सत्वसम्पन्नानां आपन्नसत्वानामुदाराणां च दाराणां सीताया इति यावत् भार्यायाः समागमो येन सः ।

१४. शासनातिक्रमादाज्ञाभङ्गाद्धेतोः त्यक्तः प्राणेभ्योऽपि गरीयान् लक्ष्मणः येन । दृश्यतां कथाविज्ञानाय रामायणस्योत्तरकाण्डस्य पञ्चाधिकशततमः सर्गः ।

१५. आर्केन्दुभूमि यावत् सूर्यः चन्द्रमाः पृथिवी च तिष्ठन्ति तावदित्यर्थः ।

१६. निगमैः ऋगादिभिः आद्यकविना च स्तुतः ।

१७. नमन्तः भक्ता एव मयूरास्तेषां मुदिर इव मेघ इव निरतिशयानन्दजननः । अथवा कविपक्षे । नमन प्रणतो यो मयूरकविस्तं मोदयतीति तच्छीलः ।



# श्रीरामपादुकास्तोत्रम्

## (श्रीवेदान्तदेशिककृतम्)

सन्तः श्रीरङ्ग-पृथ्वीश-चरणत्राण-शेखराः ।

जयन्ति भुवन-त्राणपदपङ्कज-रेणवः ॥ १॥

वन्दे विष्णुपदासक्तं तमृषिं तां च पादुकाम् ।

यथार्था शठजित्संज्ञा मच्चित्तविजयाद्ययोः ॥ २॥

वन्दे तद्रङ्गनाथस्य मान्यं पादुकयोर्युगम् ।

उन्नतानामवनतिः नतानां यत्र चोन्नतिः ॥ ३॥

भजामः पादुके याभ्यां भरतस्याग्रजस्तदा ।

प्रायः प्रति-प्रयाणाय प्रास्थानिकमकल्पयत् ॥ ४॥

प्रशस्ते रामपादाभ्यां पादुके पर्युपास्महे ।

आनृशंस्यं ययोरासीदाश्रितेष्वनवग्रहम् ॥ ५॥

अधीष्टे पादुका सा मे यस्याः साकेतवासिभिः ।

अन्वयव्यतिरेकाभ्यामन्वमीयत वैभवम् ॥ ६॥

पाहि नः पादुके यस्याः विधास्यन्नभिषेचनम् ।

आभिषेचनिकं भाण्डं चक्रे रामः प्रदक्षिणम् ॥ ७॥

अभिषेकोत्सवात्तस्माद्यस्या निर्यातनोत्सवः ।

अत्यरिच्यत तां वन्दे भव्यां भरतदेवताम् ॥ ८॥

नमस्ते पादुके  पुंसां संसारार्णवसेतवे ।

पदारोहस्य वेदान्ताः वन्दिवैतालिकाः स्वयम् ॥ ९॥

शौरेः शृङ्गारचेष्टानां प्रसूतिं पादुकां भजे ।

यामेष भुङ्क्ते शुद्धान्तात्पूर्वं पश्चादपि प्रभुः ॥ १०॥

अग्रतस्ते गमिष्यामि मृद्नन्ती कुश-कण्टकान् ।

इति सीताऽपि यद्वृत्तिं इयेष प्रणमामि ताम् ॥ ११॥

शौरेः सञ्चारकालेषु पुष्पवृष्टिर्दिवश्च्युता ।

पर्यवस्यति यत्रैव प्रपद्ये तां पदावनीम् ॥ १२॥

पान्तु वः पद्मनाभस्य पादुकाकेलिपांसवः ।

अहल्यादेहनिर्माणपर्यायपरमाणवः ॥ १३॥

श्रुतीनां भूषणानां ते शङ्के रङ्गेन्द्रपादुके ।

मिथः सङ्घर्षसञ्जातं रजः किमपि शिञ्जितम् ॥ १४॥

उदर्चिषस्ते रङ्गेन्द्रपदावनि  बहिर्मणीन् ।

अन्तर्मणिरवं श्रुत्वा मन्ये रोमाञ्चिताकृतीन् ॥ १५॥

मुखबाहूरूपादेभ्यो वर्णान् सृष्टवतः प्रभोः ।

प्रपद्ये पादुकां रत्नैर्व्यक्तवर्णव्यवस्थितिम् ॥ १६॥

प्रपद्ये रङ्गनाथस्य पादुकां पद्मरागिणीम् ।

पदेकनियतां तस्य पद्मवासामिवापराम् ॥ १७॥

बद्धानां यत्र नित्यानां मुक्तानामीश्वरस्य च ।

प्रत्यक्षं शेषशेषित्वं सा मे सिद्ध्यतु पादुका ॥ १८॥

वन्दे गारुत्मतीं वृत्त्या मणिस्तोमैश्च पादुकाम् ।

यया नित्यं तुलस्येव हरितत्वं प्रकाश्यते ॥ १९॥

हरिणा हरिनीलैश्च प्रतियत्नवतीं सदा ।

अयत्नलभ्यनिर्वाणामाश्रये मणिपादुकाम् ॥ २०॥

शौरेः शुद्धान्तनारीणां विहारमणिदर्पणम् ।

प्रसत्तेरिव संस्थानं पदत्राणमुपास्महे ॥ २१॥

कल्याणप्रकृतिं वन्दे भजन्तीं काञ्चनश्रियम् ।

पदार्हां पादुकां शौरेः पद एव निवेशिताम् ॥ २२॥

सृष्टं भूमावनन्तेन नित्यं शेषसमाधिना ।

अहं सम्भावयामि त्वामात्मानमिव पादुके ॥ २३॥

प्रपद्ये पादुकारूपं प्रणवस्य कलाद्वयम् ।

ओन्तं मितमिदं यस्मिन् अनन्तस्यापि तत्पदम् ॥ २४॥

अणोरणीयसीं विष्णोर्महतोऽपि महीयसीम् ।

प्रपद्ये पादुकां नित्यं तत्पदेनैव सम्मताम् ॥ २५॥

उदग्रयन्त्रकां वन्दे पादुकां यन्निवेशनात् ।

उपर्यपि पदं विष्णोः प्रत्यादिष्टप्रसाधनम् ॥ २६॥

सूचयन्तीं स्वरेखाभिरनालेख्यसरस्वतीम् ।

आलेखनीयसौन्दर्यामाश्रये शौरिपादुकाम् ॥ २७॥

कलासु काष्ठामातिष्ठन् भूम्ने सम्बन्धिनामपि ।

पादुका रङ्गधुर्यस्य भरताराध्यतां गता ॥ २८॥

विधौ प्रवृत्ते यद्द्रव्यं गुणसंस्कारनामभिः ।

श्रेयस्साधनमाम्नतं तत्पदत्रं तथास्तु मे ॥ २९॥

प्रतिष्ठां सर्वचित्राणां प्रपद्ये मणिपादुकाम् ।

विचित्रजगदाधारो विष्णुर्यत्र प्रतिष्ठितः ॥ ३०॥

प्रपद्ये पादुकां देवीं परविद्यामिव स्वयम् ।

यामर्पयति दीनानां दयमानो जगद्गुरुः ॥ ३१॥

उपाख्यातं तथात्वेन वसिष्ठाद्यैर्महर्षिभिः ।

उपायफलयोः काष्ठामुपासे रामपादुकाम् ॥ ३२॥

जयति यतिराजसूक्तिर्जयति मुकुन्दस्य पादुकायुगळी ।

तदुभयधनास्त्रिवेदीमवन्ध्ययन्तो जयन्ति भुवि सन्तः ॥ ३३॥

इति श्रीवेदान्तदेशिककृतं श्रीरामपादुकास्तोत्रं सम्पूर्णम् ।

# श्रीरामप्रातःस्मरणम्

प्रातः स्मरामि रघुनाथमुखारविन्दं

लम्बालकावलिमधुव्रतमुग्धशोभम् ।

मन्दस्मितांशुमहनीयमरालशोभं

कारुण्यपूरितकटाक्षकृतार्तरक्षम् ॥ १॥

प्रातः शृणोमि रघुनायकवाक्यजालं

दीनौघरक्षणमहाव्रतलब्धमूलम् ।

श्रोष्यामि येन न कथञ्चन कालदूत-

वक्त्रोद्गतं जहि विदारय ताडयेति ॥ २॥

प्रातर्भजामि रघुनायकवामहस्तं

कोदण्डदण्डपरिमण्डितमद्भुताभम् ।

यद्दर्शनाद्धृदयमाशरपुङ्गवानां

सद्यस्स्फुटत्यखिललोकजयोद्धतानाम् ॥ ३॥

प्रातश्श्रयामि रघुनायकदक्षहस्तं

साधुद्रुहां विदलनोत्सुकबाणयुक्तम् ।

आर्ताभयार्पणमहाव्रतबद्धदीक्षं

दीनाल्यभीष्टवरदानसुधाशनद्रुम् ॥ ४॥

प्रातर्नमामि रघुनाथपदारविन्दं

देवासुरोरगमुनीन्द्रमनुष्यवन्द्यम् ।

यत्स्पर्शभाग्यवशतो भरतप्रियार्थम् ।

साम्राज्यमाप किल दारु च पादुकाख्यम् ॥ ५॥

इति अगस्त्यमुनिकृतं श्रीरामप्रातःस्मरणं सम्पूर्णम् ।



# श्रीरामप्रातःस्मरणम् श्रीरामपञ्चकम्

प्रातः स्मरामि रघुनाथमुखारविन्दं

मन्दस्मितं मधुरभाषि विशालभालम् ।

कर्णावलम्बिचलकुण्डलशोभिगण्डं

कर्णान्तदीर्घनयनं नयनाभिरामम् ॥ १॥

प्रातर्भजामि रघुनाथकरारविन्दं

रक्षोगणाय भयदं वरदं निजेभ्यः ।

यद्राजसंसदि विभज्य महेशचापं

सीताकरग्रहणमङ्गलमाप सद्यः ॥ २॥

प्रातर्नमामि रघुनाथपदारविन्दं

वज्राङ्कुशादिशुभरेखि सुखावहं मे ।

योगीन्द्रमानसमधुव्रतसेव्यमानं

शापापहं सपदि गौतमधर्मपत्न्याः ॥ ३॥

प्रातर्वदामि वचसा रघुनाथ नाम

वाग्दोषहारि सकलं शमलं निहन्ति ।

यत्पार्वती स्वपतिना सह भोक्तुकामा

प्रीत्या सहस्रहरिनामसमं जजाप ॥ ४॥

प्रातः श्रये श्रुतिनुतां रघुनाथमूर्तिं

नीलाम्बुजोत्पलसितेतररत्ननीलाम् ।

आमुक्तमौक्तिकविशेषविभूषणाढ्यां

ध्येयां समस्तमुनिभिर्जनमुक्तिहेतुम् ॥ ५॥


यः श्लोकपञ्चकमिदं प्रयतः पठेद्धि

नित्यं प्रभातसमये पुरुषः प्रबुद्धः ।

श्रीरामकिङ्करजनेषु स एव मुख्यो

भूत्वा प्रयाति हरिलोकमनन्यलभ्यम् ॥

॥ इति श्रीरामकर्णामृतान्तर्गतम् श्रीरामप्रातःस्मरणम् ॥



# श्रीरामभद्रमङ्गलाशासनम्

शरणागतसन्त्राणनिपुणाय महात्मने ।
अयोध्याजनभाग्याय रामभद्रायमङ्गलम् ॥ १॥
कौसल्यानन्दकन्दाय कल्याणगुणसिन्धवे ।
शरण्याय वरेण्याय रामभद्राय मङ्गलम् ॥ २॥
कौशिकाख्यमहायोगिसन्देशसफलीकृतौ ।
कृतिने नतितुष्टाय रामभद्राय मङ्गलम् ॥ ३॥
वैदेहीवदनाम्भोजलोलम्बायितचेतसे ।
भद्राणामपि भद्राय रामभद्राय मङ्गलम् ॥ ४॥
गौतमाश्रमसाफल्यनिदानपदपांसवे ।
दाशकीशादिमित्राय रामभद्राय मङ्गलम् ॥ ५॥
महापातकनिर्मुक्तिहेतुसेतुविधायिने ।
शिक्षितासुरजालाय रामभद्राय मङ्गलम् ॥ ६॥
विभीषणपरित्राणसंहृष्टमनसेऽनिशम् ।
प्राप्तसीताय रामाय रामभद्राय मङ्गलम् ॥ ७॥
प्राप्तराज्याय रामाय भरताभीष्टदायिने ।
सर्वबन्धुसमेताय रामभद्राय मङ्गलम् ॥ ८॥
श्रीनिवासयतीन्द्रोक्तं सीतावल्लभमङ्गलम् ।
ये पठन्ति महात्मानस्तेषां भूयात्तु मङ्गलम् ॥ ९॥

इति श्रीरामभद्रमङ्गलाशासनं सम्पूर्णम् ॥

# श्रीरामभुजङ्गस्तोत्र

विशुद्धं परं सच्चिदानन्दरूपम्

गुणाधारमाधारहीनं वरेण्यम् ।

महान्तं विभान्तं गुहान्तं गुणान्तं

सुखान्तं स्वयं धाम रामं प्रपद्ये ॥ १ ॥

शिवं नित्यमेकं विभुं तारकाख्यं

सुखाकारमाकारशून्यं सुमान्यम् ।

महेशं कलेशं सुरेशं परेशं

नरेशं निरीशं महीशं प्रपद्ये ॥ २ ॥

यदावर्णयत्कर्णमूलेऽन्तकाले

शिवो राम रामेति रामेति काश्याम् ।

तदेकं परं तारकब्रह्मरूपं

भजेऽहं भजेऽहं भजेऽहं भजेऽहम् ॥ ३ ॥

(श्रीरामरामरामेति रमे रामे मनोरमे ।

सहस्रनाम तत्तुल्यं राम नाम वरानने ॥)

महारत्नपीठे शुभे कल्पमूले

सुखासीनमादित्यकोटिप्रकाशम् ।

सदा जानकीलक्ष्मणोपेतमेकं

सदा रामचन्द्रम् भजेऽहं भजेऽहम् ॥ ४ ॥

क्वणद्रत्नमञ्जीरपादारविन्दम्

लसन्मेखलाचारुपीताम्बराढ्यम् ।

महारत्नहारोल्लसत्कौस्तुभाङ्गं

नदच्चंचरीमंजरीलोलमालम् ॥ ५ ॥

लसच्चन्द्रिकास्मेरशोणाधराभम्

समुद्यत्पतङ्गेन्दुकोटिप्रकाशम् ।

नमद्ब्रह्मरुद्रादिकोटीररत्न-

स्फुरत्कान्तिनीराजनाराधितान्घ्रिम् ॥ ६ ॥

'कोटीरोज्ज्वल-रत्न-दीपकलिका-नीराजनम् कुर्वते'।

पुरः प्राञ्जलीनाञ्जनेयादिभक्तान्

स्वचिन्मुद्रया भद्रया बोधयन्तम् ।

भजेऽहं भजेऽहं सदा रामचन्द्रं

त्वदन्यं न मन्ये न मन्ये न मन्ये ॥ ७ ॥

यदा मत्समीपं कृतान्तः समेत्य

प्रचण्डप्रतापैर्भटैर्भीषयेन्माम् ।

तदाविष्करोषि त्वदीयं स्वरूपं

तदापत्प्रणाशं सकोदण्डबाणम् ॥ ८ ॥

निजे मानसे मन्दिरे संनिधेहि

प्रसीद प्रसीद प्रभो रामचन्द्र ।

ससौमित्रिणा कैकेयीनन्दनेन

स्वशक्त्यानुभक्त्या च संसेव्यमान ॥ ९ ॥

स्वभक्ताग्रगण्यैः कपीशैर्महीशै-

रनीकैरनेकैश्च राम प्रसीद ।

नमस्ते नमोऽस्त्वीश राम प्रसीद

प्रशाधि प्रशाधि प्रकाशं प्रभो माम् ॥ १० ॥

त्वमेवासि दैवं परं मे यदेकं

सुचैतन्यमेतत्त्वदन्यं न मन्ये ।

यतोऽभूदमेयं वियद्वायुतेजो-

जलोर्व्यादिकार्यं चरं चाचरं च ॥ ११ ॥

नमः सच्चिदानन्दरूपाय तस्मै

नमो देवदेवाय रामाय तुभ्यम् ।

नमो जानकीजीवितेशाय तुभ्यं

नमः पुण्डरीकायताक्षाय तुभ्यम् ॥ १२ ॥

नमो भक्तियुक्तानुरक्ताय तुभ्यं

नमः पुण्यपुञ्जैकलभ्याय तुभ्यम् ।

नमो वेदवेद्याय चाद्याय पुंसे

नमः सुन्दरायेन्दिरावल्लभाय ॥ १३ ॥

नमो विश्वकर्त्रे नमो विश्वहर्त्रे

नमो विश्वभोक्त्रे नमो विश्वमात्रे ।

नमो विश्वनेत्रे नमो विश्वजेत्रे

नमो विश्वपित्रे नमो विश्वमात्रे ॥ १४ ॥

नमस्ते नमस्ते समस्तप्रपञ्च-

प्रभोगप्रयोगप्रमाणप्रवीण ।

मदीयं मनस्त्वत्पदद्वन्द्वसेवां

विधातुं प्रवृत्तं सुचैतन्यसिद्ध्यै ॥ १५ ॥

शिलापि त्वदङ्घ्रिक्षमासङ्गिरेणु-

प्रसादाद्धि चैतन्यमाधत्त राम ।

नरस्त्वत्पदद्वन्द्वसेवाविधाना-

त्सुचैतन्यमेतेति किं चित्रमद्य ॥ १६ ॥

पवित्रं चरित्रं विचित्रं त्वदीयं

नरा ये स्मरन्त्यन्वहं रामचन्द्र ।

भवन्तं भवान्तं भरन्तं भजन्तो

लभन्ते कृतान्तं न पश्यन्त्यतोऽन्ते ॥ १७ ॥

'अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।

तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥'

स पुण्यः स गण्यः शरण्यो ममायं

नरो वेद यो देवचूडामणिं त्वाम् ।

सदाकारमेकं चिदानन्दरूपं

मनोवागगम्यं परन्धाम राम ॥ १८ ॥

प्रचण्डप्रतापप्रभावाभिभूत-

प्रभूतारिवीर प्रभो रामचन्द्र ।

बलं ते कथं वर्ण्यतेऽतीव बाल्ये

यतोऽखण्डि चण्डीशकोदण्डदण्डः ॥ १९ ॥

दशग्रीवमुग्रं सपुत्रं समित्रं

सरिद्दुर्गमध्यस्थरक्षोगणेशम् ।

भवन्तं विना राम वीरो नरो वा-

ऽसुरो वाऽमरो वा जयेत्कस्त्रिलोक्याम् ॥ २० ॥

सदा राम रामेति रामामृतं ते

सदाराममानन्दनिष्यन्दकन्दम् ।

पिबन्तं नमन्तं सुदन्तं हसन्तं

हनूमन्तमन्तर्भजे तं नितान्तम् ॥ २१ ॥

यत्र यत्र रघुनाथकीर्तनं

तत्र तत्र कृत-मस्तकाञ्जलिम् ।

बाष्पवारिपरिपूर्ण-लोचनं

मारुतिम् नमत राक्षसान्तकम् ॥

सदा राम रामेति रामामृतम् ते

सदाराममानन्दनिष्यन्दकन्दम् ।

पिबन्नन्वहं नन्वहं नैव मृत्यो-

र्बिभेमि प्रसादादसादात्तवैव ॥ २२ ॥

असीतासमेतैरकोदण्डभूशै-

रसौमित्रिवन्द्यैरचण्डप्रतापैः ।

अलङ्केशकालैरसुग्रीवमित्रै-

ररामाभिधेयैरलम् देवतैर्नः ॥ २३ ॥

अवीरासनस्थैरचिन्मुद्रिकाढ्यै-

रभक्ताञ्जनेयादितत्त्वप्रकाशैः ।

अमन्दारमूलैरमन्दारमालै-

ररामाभिधेयैरलम् देवतैर्नः ॥ २४ ॥

असिन्धुप्रकोपैरवन्द्यप्रतापै-

रबन्धुप्रयाणैरमन्दस्मिताढ्यैः ।

अदण्डप्रवासैरखण्डप्रबोधै-

ररामाभिदेयैरलम् देवतैर्नः ॥ २५ ॥

हरे राम सीतापते रावणारे

खरारे मुरारेऽसुरारे परेति ।

लपन्तं नयन्तं सदाकालमेव

समालोकयालोकयाशेषबन्धो ॥ २६ ॥

नमस्ते सुमित्रासुपुत्राभिवन्द्य

नमस्ते सदा कैकयीनन्दनेड्य ।

नमस्ते सदा वानराधीशवन्द्य

नमस्ते नमस्ते सदा रामचन्द्र ॥ २७ ॥

प्रसीद प्रसीद प्रचण्डप्रताप

प्रसीद प्रसीद प्रचण्डारिकाल ।

प्रसीद प्रसीद प्रपन्नानुकम्पिन्

प्रसीद प्रसीद प्रभो रामचन्द्र ॥ २८ ॥

भुजङ्गप्रयातं परं वेदसारं

मुदा रामचन्द्रस्य भक्त्या च नित्यम् ।

पठन् सन्ततं चिन्तयन् स्वान्तरङ्गे

स एव स्वयम् रामचन्द्रः स धन्यः ॥ २९ ॥

॥ इति श्रीशङ्कराचार्यविरचितम्

श्रीरामभुजङ्गप्रयातस्तोत्रम्  सम्पूर्णम्॥



# श्रीराममङ्गलशासनम्

मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये ।

चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥ १॥

वेदवेदान्तवेद्याय मेघश्यामलमूर्तये ।

पुंसां मोहनरूपाय पुण्यश्लोकाय मङ्गलम् ॥ २॥

विश्वामित्रान्तरङ्गाय मिथिलानगरीपतेः ।

भाग्यानां परिपाकाय भव्यरूपाय मङ्गलम् ॥ ३॥

पितृभक्ताय सततं भ्रातृभिः सह सीतया ।

नन्दिताखिललोकाय रामभद्राय मङ्गलम् ॥ ४॥

त्यक्तसाकेतवासाय चित्रकूटविहारिणे ।

सेव्याय सर्वयमिनां धीरोदाराय मङ्गलम् ॥ ५॥

सौमित्रिणा च जानक्या चापबाणासिधारिणे ।

संसेव्याय सदा भक्त्या स्वामिने मम मङ्गलम् ॥ ६॥

दण्डकारण्यवासाय खण्डितामरशत्रवे ।

गृध्रराजाय भक्ताय मुक्तिदायास्तु मङ्गलम् ॥ ७॥

सादरं शबरीदत्तफलमूलाभिलाषिणे ।

सौलभ्यपरिपूर्णाय सत्त्वोद्रिक्ताय मङ्गलम् ॥ ८॥

हनुमत्समवेताय हरीशाभीष्टदायिने ।

वालिप्रमथानायास्तु महाधीराय मङ्गलम् ॥ ९॥

श्रीमते रघुवीराय सेतूल्लङ्घितसिन्धवे ।

जितराक्षसराजाय रणधीराय मङ्गलम् ॥ १०॥

विभीषणकृते प्रीत्या लङ्काभीष्टप्रदायिने ।

सर्वलोकशरण्याय श्रीराघवाय मङ्गलम् ॥ ११॥

आसाद्य नगरीं दिव्यामभिषिक्ताय सीतया ।

राजाधिराजराजाय रामभद्राय मङ्गलम् ॥ १२॥

ब्रह्मादिदेवसेव्याय ब्रह्मण्याय महात्मने ।

जानकीप्राणनाथाय रघुनाथाय मङ्गलम् ॥ १३॥

श्रीसौम्यजामातृमुनेः कृपयास्मानुपेयुषे ।

महते मम नाथाय रघुनाथाय मङ्गलम् ॥ १४॥

मङ्गलाशासनपरैर्मदाचार्यपुरोगमैः ।

सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम् ॥ १५॥

रम्यजामातृमुनिना मङ्गलाशासनं कृतम् ।

त्रैलोक्याधिपतिः श्रीमान् करोतु मङ्गलं सदा ॥ १६॥

॥ इति श्रीवरवरमुनिस्वामिकृतश्रीराममङ्गलाशासनं सम्पूर्णम् ॥

# श्रीरामरक्षास्तोत्रम्

## पद्ममहापुराणान्तर्गतम्

इदं पवित्रं परमं भक्तानां वल्लभं सदा ।

ध्येयं हि दासभावेन भक्तिभावेन चेतसा ॥

परं सहस्रनामाख्यम् ये पठन्ति मनीषिणः ।

सर्वपापविनिर्मुक्ताः ते यान्ति हरिसन्निधौ ॥

महादेव उवाच ।

शृणु देवि प्रवक्ष्यामि माहात्म्यं केशवस्य तु ।

ये शृण्वन्ति नरश्रेष्ठाः ते पुण्याः पुण्यरूपिणः ॥

ॐ रामरक्षास्तोत्रस्य श्रीमहर्षिर्विश्वामित्रऋषिः ।

श्रीरामो देवता । अनुष्टुप्छन्दः ।

श्रीविष्णुप्रीत्यर्थे जपे विनियोगः ॥

अतसी पुष्पसङ्काशं पीतवास समच्युतम् ।

ध्यात्वा वै पुण्डरीकाक्षं श्रीरामं विष्णुमव्ययम् ॥ १॥

पातुवो हृदयं रामः श्रीकण्ठः कण्ठमेव च ।

नाभिं पातु मखत्राता कटिं मे विश्वरक्षकः ॥ २॥

करौ पातु दाशरथिः पादौ मे विश्वरूपधृक् ।

चक्षुषी पातु वै देव सीतापतिरनुत्तमः ॥ ३॥

शिखां मे पातु विश्वात्मा कर्णौ मे पातु कामदः ।

पार्श्वयोस्तु सुरत्राता कालकोटि दुरासदः ॥ ४॥

अनन्तः सर्वदा पातु शरीरं विश्वनायकः ।

जिह्वां मे पातु पापघ्नो लोकशिक्षाप्रवर्त्तकः ॥ ५॥

राघवः पातु मे दन्तान् केशान् रक्षतु केशवः ।

सक्थिनी पातु मे दत्तविजयोनाम विश्वसृक् ॥ ६॥

एतां रामबलोपेतां रक्षां यो वै पुमान् पठेत् ।

सचिरायुः सुखी विद्वान् लभते दिव्यसम्पदाम् ॥ ७॥

रक्षां करोति भूतेभ्यः सदा रक्षतु वैष्णवी ।

मेति रामभद्रेति रामचन्द्रेति यः स्मरेत् ॥ ८॥

विमुक्तः स नरः पापान् मुक्तिं प्राप्नोति शाश्वतीम् ।

वसिष्ठेन इदं प्रोक्तं गुरवे विष्णुरूपिणे ॥ ९॥

ततो मे ब्रह्मणः प्राप्तं मयोक्तं नारदं प्रति ।

नारदेन तु भूर्लोके प्रापितं सुजनेष्विह ॥ १०॥

सुप्त्वा वाऽथ गृहेवापि मार्गे गच्छेत एव वा ।

ये पठन्ति नरश्रेष्ठः ते नराः पुण्यभागिनः ॥ ११॥

इति श्रीपाद्मेमहापुराणे पञ्चपञ्चाशत्साहस्त्र्यां

संहितायामुत्तरखण्डे उमापतिनारदसंवादे

रामरक्षास्तोत्रं नामत्रिसप्ततितमोऽध्यायः ॥

# श्रीरामविश्वरूपस्तवः

सूत उवाच--

ततो बदरिकारण्यं पुण्यं प्राप्य सुधर्मधीः ।

व्यासं मुनिवरश्रेष्ठं नत्वा भीष्मोऽब्रवीद्वचः ॥ १॥

श्रीभीष्मः --

मया मुनिवरश्रेष्ठ विश्रुता हि सहस्रशः ।

गणेशशक्तिसूर्येशचक्रिणां स्तुतयोऽमलाः ॥ २॥

तेषु स्तोत्रेषु किं श्रेष्ठं ब्रूहि मे तन्मुनीश्वर ।

श्रीव्यासः --

त्वया निर्दिष्टदेवानां स्तोत्रेषु च परं वरम् ॥ ३॥

कोटिकोटिगुणाधिक्यं ब्रह्मणा कथितं पुरा ।

वैष्णवस्तोत्रवर्येषु सर्वेष्वपि नदीसुत ॥ ४॥

अनन्तपुण्यफलदा रामस्येयं महास्तुतिः ।

तामहं संप्रवक्ष्यामि शृणु भीष्म शुचिव्रत ॥ ५॥

सर्वपापप्रशमनीं मानसेप्सितदायिनीम् ।

निहत्य रावणं सङ्ख्ये त्रिलोकीजनदुर्जयम् ॥ ६॥

महामोहमिवोद्रिक्तं ब्रह्मदत्तमहावरम् ।

रामः परमधर्मात्मा मायामानुषविग्रहः ॥ ७॥

अयोध्यानगरीं प्राप्तो वृत्रहेवामरावतीम् ।

अथ तस्मिन् दिने पुण्ये शुभलग्ने शुभान्विते ॥ ८॥

राघवस्याभिषेकार्थं मङ्गलं चक्रिरे जनाः ।

वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः ॥ ९॥

मार्कण्डेयश्च मौद्गल्यः पर्वतो नारदस्तथा ।

एते महर्षयस्तत्र जपहोमपुरस्सरम् ॥ १०॥

अभिषेकं शुभं चक्रुः श्रीरामं रघुसत्तमम् ।

नानारत्नमये दिव्ये हेमपीठे शुभान्विते ॥ ११॥

निवेश्य सीतया तस्मिन् जनार्दनमिव श्रिया ।

सौवर्णकलशैर्दिव्यैर्नानारत्नमयैः शुभैः ॥ १२॥

सर्वतीर्थोदकैः पुण्यैर्मङ्गलद्रव्यसंयुतैः ।

दूर्वाग्रतुलसीपत्रगन्धपुष्पसमन्वितैः ॥ १३॥

मन्त्रपूतजलैः शुभ्रैर्मुनयः संशितव्रताः ।

जपन्तो वैष्णवान् मन्त्रांश्चतुर्वेदमयान् शुभान् ॥ १४॥

अभिषेकं शुभं चक्रुः काकुत्स्थं जगतां पतिम् ।

तस्मिन् शुभतरे लग्ने देवदुन्दुभयो दिवि ॥ १५॥

निनेदुः पुष्पवर्षाणि ववृषुश्च समन्ततः ।

दिव्याम्बरैर्भूषणैश्च दिव्यगन्धानुलेपनैः ॥ १६॥

पुष्पैर्नानाविधैर्दिव्यैर्देव्या सह रघूद्वहम् ।

अलङ्कृतः स शुशुभे मुनिभिर्वेदपारगैः ॥ १७॥

छत्रं च चामरं दिव्यं धृतवाँल्लक्ष्मणस्तदा ।

पार्श्वे भरतशत्रुघ्नौ तालवृन्तौ विवेजतुः ॥ १८॥

दर्पणं प्रददौ श्रीमान् राक्षसेन्द्रो विभीषणः ।

दधार पूर्णकलशं सुग्रीवो वानरेश्वरः ॥ १९॥

जाम्बवांश्च महातेजाः पुष्पमालां मनोरमाम् ।

वालिपुत्रस्तु ताम्बूलं सकर्पूरं ददौ प्रियात् ॥ २०॥

हनुमान् दीपिकां दिव्यां सुषेणस्तु ध्वजं शुभम् ।

परिवार्य महात्मानं मन्त्रिणःसमुपासिरे ॥ २१॥

धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्धनः ।

अकोपो धर्मपालश्च सुमन्त्रश्चाष्टमः स्मृतः ॥ २२॥

राजानश्च नरव्याघ्रा नानाजनपदेश्वराः ।

पौराश्च नैगमा वृद्धा राजानः पर्युपासते ॥ २३॥

ऋक्षैश्च वानरेन्द्रैश्च मन्त्रिभिः पृथिवीश्वरैः ।

राक्षसैर्द्विजमुख्यैश्च किङ्करैश्च समन्वितः ॥ २४॥

परव्योम्नि यथा नित्यैर्दैवतैः कमलापतिः ।

तथा नृपवरः श्रीमान् साकेते शुशुभे सदा ॥ २५॥

इन्दीवरदलश्यामं पद्मपत्रनिभेक्षणम् ।

आजानुबाहुं काकुत्स्थं पीतवस्त्रधरं हरिम् ॥ २६॥

कम्बुग्रीवं महोरस्कं विचित्राभरणैर्युतम् ।

देव्या सह समासीनमभिषिक्तं रघूत्तमम् ॥ २७॥

विमानस्थाः सुरगणा हर्षनिर्भरमानसाः ।

तुष्टुवुर्जयशब्दैश्च गन्धर्वाप्सरसां गणाः ॥ २८॥

अभिषिक्तस्तदा रामो वसिष्ठाद्यैः समन्त्रिभिः ।

शुशुभे सीतया देव्या नारायण इव श्रिया ॥ २९॥

अत्यमर्त्यतया रूपमुपमातीतमुज्ज्वलम् ।

दृष्ट्वा तुष्टाव हृष्टात्मा शङ्करो द्रष्टुमागतः ॥ ३०॥

कृताञ्जलिपुटो भूत्वा सानन्दो गद्गदाकुलः ।

हर्षयन् सकलान् देवान् मुनीनपि च मानवान् ॥ ३१॥

रुद्रः --नमो मूलप्रकृतये नित्याय परमात्मने ।

सच्चिदानन्दरूपाय विश्वरूपाय वेधसे ॥ ३२॥

नमो निरन्तरानन्दमूलकन्दाय विष्णवे ।

जगत्त्रयकृतानन्दमूर्तये दिव्यमूर्तये ॥ ३३॥

नमो ब्रह्मेशपूज्याय सर्वदेवमयाय च ।

नमो विष्णुस्वरूपाय सर्वरूपाय ते नरः ॥ ३४॥

उत्पत्तिस्थितिसंहारकारिणे त्रिगुणात्मने ।

नमोऽस्तु निर्गतोपाधिस्वरूपाय मुदात्मने ॥ ३५॥

अनया दिव्यया देव्या सीतयोपाधिधारिणे ।

नमः पुम्प्रकृतिभ्यां च युवाभ्यां जगतां कृते ॥ ३६॥

जगन्मातापितृभ्यां च सीतायै राघवाय च ।

नमः प्रपञ्चरूपिण्यै निष्प्रपञ्चस्वरूपिणे ॥ ३७॥

नमो ध्येयस्वरूपिण्यै योगिध्येयात्मधारिणे ।

परिणामापरीणामनित्याभ्यां च नमो नमः ॥ ३८॥

कूटस्थबीजरूपाभ्यां जानक्यै राघवाय च ।

सीता लक्ष्मीर्भवान् विष्णुः सीता गौरी भवान् शिवः ॥ ३९॥

सीता स्वयं हि सावित्री स्वयं ब्रह्मा चतुर्मुखः ।

सीता शची भवानिन्द्रः सीता भैमी नलो भवान् ॥ ४०॥

सीता संहारिणी देवी यमरूपधरो भवान् ।

सीता तु मानसी देवी निरृतिस्त्वं रघूत्तम ॥ ४१॥

सीता तु भार्गवी देवी वरुणो यादसां पतिः ।

सीता सदागतिर्देवी जगत्प्राणधरो भवान् ॥ ४२॥

सीता तु सर्वसम्पत्तिः कुबेरस्त्वं जगत्पते ।

सीता च देवी रुद्राणी भवान् रुद्रो महाबलः ॥ ४३॥

सीता तु रोहिणी देवी चन्द्रस्त्वं लोकसौख्यदः ।

सीता संज्ञा भवान् सूर्यः सीता रात्रिर्भवान् दिनम् ॥ ४४॥

सीता देवी महाकाली महाकालो भवान् खलु ।

स्त्रीलिङ्गं त्रिषु लोकेषु यत्तत्सर्वं हि जानकी ॥ ४॥

पुन्नामलाञ्छितं वस्तु यत्तत्सर्वं भवान् प्रभो ।

सर्वत्र सर्वदेहेषु सीता षट्चक्रधारिणी ॥ ४६॥

तथा त्वमपि च क्षान्तस्त्रीजातिर्विश्वभासिनी ।

तस्माद्विश्वमिदं प्रोक्तं युवाभ्यां परिचिह्नितम् ॥ ४७॥

चिह्नितं शिवशक्तिभ्यां शरीरं नान्तरा प्रभो ।

आवां राम जगत्पूज्यौ मम पूज्यौ युवां सदा ॥ ४८॥

त्वन्नामजापिनी गौरी त्वन्मन्त्रजपवानहम् ।

मुमुक्षोर्मणिकण्ठ्यन्धु रन्ध्रोदकनिवासिनः ॥ ४९॥

अहं दिशामि ते मन्त्रं तारकब्रह्मवाचकम् ।

श्रीरामरामरामेतीत्येतत्तारकमुच्यते ॥ ५०॥

अतस्त्वं जानकीनाथ परं ब्रह्मासि निश्चितम् ।

त्वन्मायामोहिताः सर्वे न त्वां जानन्ति तत्त्वतः ॥ ५१॥

इत्युक्तः शम्भुना रामः प्रसादप्रवणोऽभवत् ।

विश्वरूपधरः श्रीमानद्भुताकारदर्शनः ॥ ५२॥

तं तथारूपमालोक्य नरवानरदेवताः ।

न द्रष्टुमपि शक्तास्ते तैजसं महदद्भुतम् ॥ ५३॥

भयाद्वै त्रिदशश्रेष्ठाः प्रणेमुश्चातिभक्तितः ।

भीता विज्ञाय रामोऽपि नरवानरदेवताः ।

मायामानुषतां प्राप्य सर्वानेवाब्रवीद्वचः ॥ ५४॥

श्रीरामचन्द्रः --

शृणुध्वं देवता यो मां प्रत्यहं संस्तविष्यति ।

स्तवेन शम्भुनोक्तेन वेदतुल्येन मानवः ॥ ५५॥

विमुक्तः सर्वपापेभ्यो मत्सारूप्यं समश्नुते ।

रणे जयमवाप्नोति न क्वचित् परिभूयते ॥ ५६॥

भूतवेतालकृत्यादिग्रहैश्चापि न बाध्यते ।

अपुत्रो लभते पुत्रं पतिं विन्दति कन्यका ॥ ५७॥

दरिद्रः श्रियमाप्नोति स प्रभूतामनश्वराम् ।

सर्वलोकप्रियो विद्वान् सर्वभूपालपूजितः ॥ ५८॥

आत्मनोऽपि प्रियः स्त्रीणां जायते नात्र संशयः ।

निर्विघ्नः सर्वकार्येषु सर्वारम्भो भवेन्नरः ॥ ५९॥

यं यं कामयते मर्त्यः सुदुर्लभमनोरथम् ।

षण्मासात्तं तमाप्नोति स्तवस्यास्य प्रकीर्तनात् ॥ ६०॥

सर्ववेदेषु यत्पुण्यं सर्वतीर्थवरेषु च ।

सर्वयज्ञेषु दानेषु तत्सर्वं लभते फलम् ॥ ६१॥

श्रीव्यासः-

इत्युक्त्वा रामचन्द्रोऽपि प्रपूज्य च महेश्वरम् ।

ब्रह्मादित्रिदशैः सर्वैर्विससर्ज समन्वितम् ॥ ६२॥

अर्चिता मानिताः सर्वानरवानर देवताः ।

विसृष्टा रामचन्द्रेण प्रीत्या परमया युताः ॥ ६३॥

इत्थं विसृष्टाः खलु ते च सर्वे स्वं स्वं पदं जग्मुरतीव तुष्टाः ।

हृष्टाःपठन्तः स्तवमीश्वरोक्तं रामं स्मरन्तो नरविश्वरूपम्॥ ६४

इति श्रीपाद्मपुराणे श्रीरामविश्वरूपसन्दर्शनस्तवः सम्पूर्णः ।

# श्रीरामषट्पदी

तरणिकुलजलतरणे तरुणतरणितेजसा विभातरणे ।

कृतविदशदशमुखमुखतिमिरगणेऽन्तस्तमो नुद मे ॥ १॥

शयविधृतशरशरासन निखिलखलोज्जासनप्रथितसुयशाः ।

मथितहृदयान्तरालं दुष्कृतिजालं ममापनय ॥ २॥

सुरुचिरमरीचिनिचयांश्चरणनखेन्दूनुदाय मम हृदये ।

हृदयेश विकलतापं स्वसकलतापं किलापहर ॥ ३॥

इन्दीवरदलसुन्दर वरदलसद्वामजानकीजाने ।

जाने त्वामखिलेशं लेशलसल्लोकलोकेशम् ॥ ४॥

शं कुरु शङ्करवल्लभ यल्लभतामाश्वयं त्वदंघ्रियुगे ।

अनुरक्तिदृढां भक्तिं चिरस्य चिन्ताब्धिभवभक्तिम् ॥ ५॥

वैराजराजराजोऽप्यभूत्सुसाकेतराजनरराजः ।

वानरराजसहायो लीलाकैवल्यमेतद्धि ॥ ६॥

जगदसुसुतासुपरवसुमुदे यदेषा स्तुतिः कृता स्फीता ।

सा रामषट्पदीयं विलसतु तत्पादजलजाते ॥ ७॥

॥ इति श्रीमन्मालवीयशुक्ल श्रीमन्मथुरानाथप्रणीता

रामषट्पदी समाप्ता ॥

# श्रीरामसप्तर्षिस्तोत्रम्

काश्यपः --

नित्यं किं धावसि चलविषयाननुभवितुं
सुखलेशाभासानुरुतरदुःखानति-
दुःसहानत्यन्तायासानंहोमूलानुग्रभयङ्कररौरवादिनारकगतिहेतूने
तानपि परिहर सीतापतिमाशु परिचरेशं भो चेतःश्रीरामं भज
शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः
श्रीरामं भज शरणम् ॥ १॥

अत्रिः --

बहुविधपापवशादिह नानायोनिषु जन्ममृतिर्यो देही
दैवादुत्तममानुषपूरुष विप्रदेहविद्यासम्पन्नोऽपि ब्रह्मणि परमे
विमुखो दुःखी दुर्विषयैषी नश्यति तृणकबलस्वीकरणे काले
पशुरिव रोमन्थं कुर्वन् भो चेतः श्रीरामं भज शरणम् ।

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः
श्रीरामं भज शरणम् ॥ २॥

भरद्वाजः--

उपर्युपरि मनोरथजालं विद्वानपि कामयते यतते
पुत्रमित्रकलत्रादिषु निर्वेदं नैति कामकामी
विद्यासम्पत्कुलधनसौभगयौवनगर्वपर्वताधिरूढो मूढः पश्चादन्धे तमसि पतेदवशोऽन्योऽन्धुमिव भो चेतः श्रीरामं भज शरणं भज रघुरामं शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ३॥

विश्वामित्रः --

अरिषड्वर्गं जहि तृष्णामपि मायाविलसितमिदमिति बुद्ध्वा
दुर्जनसङ्गतिमतिदूरीकुरु सज्जनमाश्रय भो परधनपरदाराभिरतिं त्यज पारलौकिकं धर्मं परिचिनु पद्मापतिपदपद्मं सेव(य)(स्व) बन्धविमुक्त्यै भो चेतः श्रीरामं भज शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ४॥

गौतमः --

कर्णाकर्णय वैदेहीवरवर्णनीयगुणवन्दितचरितं नयनालोकय
नयननलिनमुखसुन्दरेन्दुबिम्बं मस्तक संस्तुतमहिमानं नम
कस्तूरीनिकराकारं हस्तयुगार्चय हरिपदममलं
हृयवनीपालमिनकुलरत्नं भो चेतः श्रीरामं भज शरणं भज रघुरामं शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ५॥

जमदग्निः --

परापवादं परिहर जिह्वे पारुष्यं चानृतमपि मा वद सङ्कीर्तय केशव नारायण दामोदर कृष्ण नरहरे वैकुण्ठाधिप लक्ष्मीवल्लभ बुधजनमानसमन्दिर सीतानायक दशरथनन्दन इति सततं भो चेतः श्रीरामं भज शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ६॥

वसिष्टः --

नित्यानन्दं सत्यमनन्तं ब्रह्म परात्परमव्ययममलं नित्यं शुद्धं बुद्धं शाश्वतमप्रमेयमनाद्यन्तं सर्वासामुपनिषदामर्थोऽयं श्रीरामः सीतापतिरिति चतुराननशिवहैमवतीजपसर्वस्वं मन्त्रं भो चेतः श्रीरामं भज शरणं भज रघुरामं शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ७॥

एवं स्तुत्वा रामचन्द्रं मुनीन्द्राःप्रत्येकं ते भक्तिनम्रास्तदानीम् ।
आपन्नार्तिध्वान्तभानुं प्रपन्ना-स्तूष्णीमासन् रामपादैकनिष्ठाः॥

इति श्रीरामसप्तर्षिस्तोत्रं सम्पूर्णम् ।

# श्रीरामसहस्रनामस्तोत्रम्

श्रीराघवं दशरथात्मजमप्रमेयं सीतापतिं रघुकुलान्वयरत्नदीपम् ।

आजानुबाहुमरविन्ददलायताक्षं रामंनिशाचरविनाशकरं नमामि ॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे

मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम् ।

अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं

व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

पार्वत्युवाच-

श्रोतुमिच्छाम्यहं देव तदेवं सर्वकामदम् ।

नाम्नां सहस्रं रामस्य ब्रूहि यद्यस्ति मे दया ॥ १

श्रीमहादेव उवाच-

अथ वक्ष्यामि ते देवि रामनामसहस्रकम् ।

शृणु चैकमनाः स्तोत्रं गुह्यादुह्यतरं महत् ॥ २

अस्य श्रीरामसहस्रनामस्तोत्रमहामन्त्रस्य,भगवान् ईश्वर ऋषिः ।

अनुष्टुप्छन्दः । श्रीरामः परमात्मा देवता ।

श्रीमान्महाविष्णुरिति बीजम्।गुणभृन्निर्गुणो महानिति शक्तिः ।

संसारतारकोराम इति मन्त्रः।सच्चिदानन्दविग्रह इतिकीलकम् ।

अक्षयः पुरुषःसाक्षीति कवचम् । अजेयः सर्वभूतानां इत्यस्त्रम् ।

राजीवलोचनः श्रीमानिति ध्यानम् ।

श्रीरामप्रीत्यर्थे दिव्यसहस्रनामजपे विनियोगः ।

करन्यासः -

श्रीरामचन्द्रायेत्यङ्गुष्ठाभ्यां नमः ।

सीतापतये इति तर्जनीभ्यां नमः ।

रघुनाथायेति मध्यमाभ्यां नमः ।

भरताग्रजायेत्यनामिकाभ्यां नमः ।

दशरथात्मजायेति कनिष्ठिकाभ्यां नमः ।

हनुमत्प्रभवे इति करतलकरपृष्ठाभ्यां नमः ।

एवं हृदयादिन्यासः ।

ध्यानम्-

विज्ञानहेतुं विमलायताक्षं प्रज्ञानरूपं स्वसुखैकहेतुम् ।

श्रीरामचन्द्रं हरिमादिदेवं परात्परं राममहं भजामि ॥

तत्त्वस्वरूपं पुरुषं पुराणं स्वतेजसा पूरितविश्वमेकम् ।

राजाधिराजं रविमण्डलस्थं विश्वेश्वरं राममहं भजामि ।

लमित्यादिपञ्चपूजाः ।

ॐ रामः श्रीमान् महाविष्णुर्जिष्णुर्देवहितावहः ।

तत्त्वात्मा तारकं ब्रह्म शाश्वतः सर्वसिद्धिदः ॥

राजीवलोचनः श्रीमान् श्रीरामो रघुपुङ्गवः ।

रामभद्रः सदाचारो राजेन्द्रो जानकीपतिः ॥ १॥

अग्रगण्यो वरेण्यश्च वरदः परमेश्वरः ।

जनार्दनो जितामित्रः परार्थैकप्रयोजनः ॥ २॥

विश्वामित्रप्रियो दान्तः शत्रुजिच्छत्रुतापनः ।

सर्वज्ञः सर्वदेवादिः शरण्यो वालिमर्दनः ॥ ३॥

ज्ञानभाव्योऽपरिच्छेद्यो वाग्मी सत्यव्रतः शुचिः ।

ज्ञानगम्यो दृढप्रज्ञः खरध्वंसी प्रतापवान् ॥ ४॥

द्युतिमानात्मवान् वीरो जितक्रोधोऽरिमर्दनः ।

विश्वरूपो विशालाक्षः प्रभुः परिवृढो दृढः ॥ ५॥

ईशः खड्गधरः श्रीमान् कौसलेयोऽनसूयकः ।

विपुलांसो महोरस्कः परमेष्ठी परायणः ॥ ६॥

सत्यव्रतः सत्यसन्धो गुरुः परमधार्मिकः ।

लोकज्ञो लोकवन्द्यश्च लोकात्मा लोककृत्परः ॥ ७॥

अनादिर्भगवान् सेव्यो जितमायो रघूद्वहः ।

रामो दयाकरो दक्षः सर्वज्ञः सर्वपावनः ॥ ८॥

ब्रह्मण्यो नीतिमान् गोप्ता सर्वदेवमयो हरिः ।

सुन्दरः पीतवासाश्च सूत्रकारः पुरातनः ॥ ९॥

सौम्यो महर्षिः कोदण्डी सर्वज्ञः सर्वकोविदः ।

कविः सुग्रीववरदः सर्वपुण्याधिकप्रदः ॥ १०॥

भव्यो जितारिषड्वर्गो महोदारोऽघनाशनः ।

सुकीर्तिरादिपुरुषः कान्तः पुण्यकृतागमः ॥ ११॥

अकल्मषश्चतुर्बाहुः सर्वावासो दुरासदः ।

स्मितभाषी निवृत्तात्मा स्मृतिमान् वीर्यवान् प्रभुः ॥ १२॥

धीरो दान्तो घनश्यामः सर्वायुधविशारदः ।

अध्यात्मयोगनिलयः सुमना लक्ष्मणाग्रजः ॥ १३॥

सर्वतीर्थमयः शूरः सर्वयज्ञफलप्रदः ।

यज्ञस्वरूपी यज्ञेशो जरामरणवर्जितः ॥ १४॥

वर्णाश्रमकरो वर्णी शत्रुजित् पुरुषोत्तमः ।

विभीषणप्रतिष्ठाता परमात्मा परात्परः ॥ १५॥

प्रमाणभूतो दुर्ज्ञेयः पूर्णः परपुरञ्जयः ।

अनन्तदृष्टिरानन्दो धनुर्वेदो धनुर्धरः ॥ १६॥

गुणाकरो गुणश्रेष्ठः सच्चिदानन्दविग्रहः ।

अभिवन्द्यो महाकायो विश्वकर्मा विशारदः ॥ १७॥

विनीतात्मा वीतरागस्तपस्वीशो जनेश्वरः ।

कल्याणप्रकृतिः कल्पः सर्वेशः सर्वकामदः ॥ १८॥

अक्षयः पुरुषः साक्षी केशवः पुरुषोत्तमः ।

लोकाध्यक्षो महामायो विभीषणवरप्रदः ॥ १९॥

आनन्दविग्रहो ज्योतिर्हनुमत्प्रभुरव्ययः ।

भ्राजिष्णुः सहनो भोक्ता सत्यवादी बहुश्रुतः ॥ २०॥

सुखदः कारणं कर्ता भवबन्धविमोचनः ।

देवचूडामणिर्नेता ब्रह्मण्यो ब्रह्मवर्धनः ॥ २१॥

संसारोत्तारको रामः सर्वदुःखविमोक्षकृत् ।

विद्वत्तमो विश्वकर्ता विश्वहर्ता च विश्वकृत् ॥ २२॥

नित्यो नियतकल्याणः सीताशोकविनाशकृत् ।

काकुत्स्थः पुण्डरीकाक्षो विश्वामित्रभयापहः ॥ २३॥

मारीचमथनो रामो विराधवधपण्डितः ।

दुःस्वप्ननाशनो रम्यः किरीटी त्रिदशाधिपः ॥ २४॥

महाधनुर्महाकायो भीमो भीमपराक्रमः ।

तत्त्वस्वरूपी तत्त्वज्ञस्तत्त्ववादी सुविक्रमः ॥ २५॥

भूतात्मा भूतकृत्स्वामी कालज्ञानी महापटुः ।

अनिर्विण्णो गुणग्राही निष्कलङ्कः कलङ्कहा ॥ २६॥

स्वभावभद्रः शत्रुघ्नः केशवः स्थाणुरीश्वरः ।

भूतादिः शम्भुरादित्यः स्थविष्ठः शाश्वतो ध्रुवः ॥ २७॥

कवची कुण्डली चक्री खड्गी भक्तजनप्रियः ।

अमृत्युर्जन्मरहितः सर्वजित्सर्वगोचरः ॥ २८॥

अनुत्तमोऽप्रमेयात्मा सर्वादिर्गुणसागरः ।

समः समात्मा समगो जटामुकुटमण्डितः ॥ २९॥

अजेयः सर्वभूतात्मा विष्वक्सेनो महातपाः ।

लोकाध्यक्षो महाबाहुरमृतो वेदवित्तमः ॥ ३०॥

सहिष्णुः सद्गतिः शास्ता विश्वयोनिर्महाद्युतिः ।

अतीन्द्र ऊर्जितः प्रांशुरुपेन्द्रो वामनो बली ॥ ३१॥

धनुर्वेदो विधाता च ब्रह्मा विष्णुश्च शङ्करः ।

हंसो मरीचिर्गोविन्दो रत्नगर्भो महामतिः ॥ ३२॥

व्यासो वाचस्पतिः सर्वदर्पितासुरमर्दनः ।

जानकीवल्लभः पूज्यः प्रकटः प्रीतिवर्धनः ॥ ३३॥

सम्भवोऽतीन्द्रियो वेद्योऽनिर्देशो जाम्बवत्प्रभुः ।

मदनो मथनो व्यापी विश्वरूपो निरञ्जनः ॥ ३४॥

नारायणोऽग्रणीः साधुर्जटायुप्रीतिवर्धनः ।

नैकरूपो जगन्नाथः सुरकार्यहितः स्वभूः ॥ ३५॥

जितक्रोधो जितारातिः प्लवगाधिपराज्यदः ।

वसुदः सुभुजो नैकमायो भव्यप्रमोदनः ॥ ३६॥

चण्डांशुः सिद्धिदः कल्पः शरणागतवत्सलः ।

अगदो रोगहर्ता च मन्त्रज्ञो मन्त्रभावनः ॥ ३७॥

सौमित्रिवत्सलो धुर्यो व्यक्ताव्यक्तस्वरूपधृक् ।

वसिष्ठो ग्रामणीः श्रीमाननुकूलः प्रियंवदः ॥ ३८॥

अतुलः सात्त्विको धीरः शरासनविशारदः ।

ज्येष्ठः सर्वगुणोपेतः शक्तिमांस्ताटकान्तकः ॥ ३९॥

वैकुण्ठः प्राणिनां प्राणः कमठः कमलापतिः ।

गोवर्धनधरो मत्स्यरूपः कारुण्यसागरः ॥ ४०॥

कुम्भकर्णप्रभेत्ता च गोपीगोपालसंवृतः ।

मायावी व्यापको व्यापी रैणुकेयबलापहः ॥ ४१॥

पिनाकमथनो वन्द्यः समर्थो गरुडध्वजः ।

लोकत्रयाश्रयो लोकचरितो भरताग्रजः ॥ ४२॥

श्रीधरः सद्गतिर्लोकसाक्षी नारायणो बुधः ।

मनोवेगी मनोरूपी पूर्णः पुरुषपुङ्गवः ॥ ४३॥

यदुश्रेष्ठो यदुपतिर्भूतावासः सुविक्रमः ।

तेजोधरो धराधारश्चतुर्मूर्तिर्महानिधिः ॥ ४४॥

चाणूरमर्दनो दिव्यः शान्तो भरतवन्दितः ।

शब्दातिगो गभीरात्मा कोमलाङ्गः प्रजागरः ॥ ४५॥

लोकगर्भः शेषशायी क्षीराब्धिनिलयोऽमलः ।

आत्मयोनिरदीनात्मा सहस्राक्षः सहस्रपात् ॥ ४६॥

अमृतांशुर्महागर्भो निवृत्तविषयस्पृहः ।

त्रिकालज्ञो मुनिः साक्षी विहायसगतिः कृती ॥ ४७॥

पर्जन्यः कुमुदो भूतावासः कमललोचनः ।

श्रीवत्सवक्षाः श्रीवासो वीरहा लक्ष्मणाग्रजः ॥ ४८॥

लोकाभिरामो लोकारिमर्दनः सेवकप्रियः ।

सनातनतमो मेघश्यामलो राक्षसान्तकृत् ॥ ४९॥

दिव्यायुधधरः श्रीमानप्रमेयो जितेन्द्रियः ।

भूदेववन्द्यो जनकप्रियकृत्प्रपितामहः ॥ ५०॥

उत्तमः सात्त्विकः सत्यः सत्यसन्धस्त्रिविक्रमः ।

सुव्रतः सुलभः सूक्ष्मः सुघोषः सुखदः सुधीः ॥ ५१॥

दामोदरोऽच्युतः शार्ङ्गी वामनो मधुराधिपः ।

देवकीनन्दनः शौरिः शूरः कैटभमर्दनः ॥ ५२॥

सप्ततालप्रभेत्ता च मित्रवंशप्रवर्धनः ।

कालस्वरूपी कालात्माकालः कल्याणदःकविः ।

संवत्सर ऋतुः पक्षो ह्ययनं दिवसो युगः ॥ ५३॥

स्तव्यो विविक्तो निर्लेपः सर्वव्यापी निराकुलः ।

अनादिनिधनः सर्वलोकपूज्यो निरामयः ॥ ५४॥

रसो रसज्ञः सारज्ञो लोकसारो रसात्मकः ।

सर्वदुःखातिगो विद्याराशिः परमगोचरः ॥ ५५॥

शेषो विशेषो विगतकल्मषो रघुनायकः ।

वर्णश्रेष्ठो वर्णवाह्यो वर्ण्यो वर्ण्यगुणोज्ज्वलः ॥ ५६॥

कर्मसाक्ष्यमरश्रेष्ठो देवदेवः सुखप्रदः ।

देवाधिदेवो देवर्षिर्देवासुरनमस्कृतः ॥ ५७॥

सर्वदेवमयश्चक्री शार्ङ्गपाणी रघूत्तमः ।

मनो बुद्धिरहङ्कारः प्रकृतिः पुरुषोऽव्ययः ॥ ५८॥

अहल्यापावनः स्वामी पितृभक्तो वरप्रदः ।

न्यायो न्यायी नयी श्रीमान्नयो नगधरो ध्रुवः ॥ ५९॥

लक्ष्मीविश्वम्भराभर्ता देवेन्द्रो बलिमर्दनः ।

वाणारिमर्दनो यज्वानुत्तमो मुनिसेवितः ॥ ६०॥

देवाग्रणीः शिवध्यानतत्परः परमः परः ।

सामगेयः प्रियोऽक्रूरः पुण्यकीर्तिः सुलोचनः ॥ ६१॥

पुण्यः पुण्याधिकः पूर्वः पूर्णः पूरयिता रविः ।

जटिलः कल्मषध्वान्तप्रभञ्जनविभावसुः ॥ ६२॥

अव्यक्तलक्षणोऽव्यक्तो दशास्यद्विपकेसरी ।

कलानिधिः कलानाथो कमलानन्दवर्धनः ॥ ६३॥

जयी जितारिः सर्वादिः शमनो भवभञ्जनः ।

अलङ्करिष्णुरचलो रोचिष्णुर्विक्रमोत्तमः ॥ ६४॥

आशुः शब्दपतिः शब्दागोचरो रञ्जनो रघुः ।

निःशब्दः प्रणवो माली स्थूलः सूक्ष्मो विलक्षणः ॥ ६५॥

आत्मयोनिरयोनिश्च सप्तजिह्वः सहस्रपात् ।

सनातनतमः स्रग्वी पेशलो जविनां वरः ॥ ६६॥

शक्तिमाञ्शङ्खभृन्नाथः गदापद्मरथाङ्गभृत् ।

निरीहो निर्विकल्पश्च चिद्रूपो वीतसाध्वसः ॥ ६७॥

शताननः सहस्राक्षः शतमूर्तिर्धनप्रभः ।

हृत्पुण्डरीकशयनः कठिनो द्रव एव च ॥ ६८॥

उग्रो ग्रहपतिः श्रीमान् समर्थोऽनर्थनाशनः ।

अधर्मशत्रू रक्षोघ्नः पुरुहूतः पुरुष्टुतः ॥ ६९॥

ब्रह्मगर्भो बृहद्गर्भो धर्मधेनुर्धनागमः ।

हिरण्यगर्भो ज्योतिष्मान् सुललाटः सुविक्रमः ॥ ७०॥

शिवपूजारतः श्रीमान् भवानीप्रियकृद्वशी ।

नरो नारायणः श्यामः कपर्दी नीललोहितः ॥ ७१॥

रुद्रः पशुपतिः स्थाणुर्विश्वामित्रो द्विजेश्वरः ।

मातामहो मातरिश्वा विरिञ्चो विष्टरश्रवाः ॥ ७२॥

अक्षोभ्यः सर्वभूतानां चण्डः सत्यपराक्रमः ।

वालखिल्यो महाकल्पः कल्पवृक्षः कलाधरः ॥ ७३॥

निदाघस्तपनोऽमोघः श्लक्ष्णः परबलापहृत् ।

कबन्धमथनो दिव्यः कम्बुग्रीवशिवप्रियः ॥ ७४॥

शङ्खोऽनिलः सुनिष्पन्नः सुलभः शिशिरात्मकः ।

असंसृष्टोऽतिथिः शूरः प्रमाथी पापनाशकृत् ॥ ७५॥

वसुश्रवाः कव्यवाहः प्रतप्तो विश्वभोजनः ।

रामो नीलोत्पलश्यामो ज्ञानस्कन्धो महाद्युतिः ॥ ७६॥

पवित्रपादः पापारिर्मणिपूरो नभोगतिः ।

उत्तारणो दुष्कृतिहा दुर्धर्षो दुःसहोऽभयः ॥ ७७॥

अमृतेशोऽमृतवपुर्धर्मी धर्मः कृपाकरः ।

भर्गो विवस्वानादित्यो योगाचार्यो दिवस्पतिः ॥ ७८॥

उदारकीर्तिरुद्योगी वाङ्मयः सदसन्मयः ।

नक्षत्रमाली नाकेशः स्वाधिष्ठानः षडाश्रयः ॥ ७९॥

चतुर्वर्गफलो वर्णी शक्तित्रयफलं निधिः ।

निधानगर्भो निर्व्याजो गिरीशो व्यालमर्दनः ॥ ८०॥

श्रीवल्लभः शिवारम्भः शान्तिर्भद्रः समञ्जसः ।

भूशयो भूतिकृद्भूतिर्भूषणो भूतवाहनः ॥ ८१॥

अकायो भक्तकायस्थः कालज्ञानी महावटुः ।

परार्थवृत्तिरचलो विविक्तः श्रुतिसागरः ॥ ८२॥

स्वभावभद्रो मध्यस्थः संसारभयनाशनः ।

वेद्यो वैद्यो वियद्गोप्ता सर्वामरमुनीश्वरः ॥ ८३॥

सुरेन्द्रः करणं कर्म कर्मकृत्कर्म्यधोक्षजः ।

ध्येयो धुर्यो धराधीशः संकल्पः शर्वरीपतिः ॥ ८४॥

परमार्थगुरुर्वृद्‌धः शुचिराश्रितवत्सलः ।

विष्णुर्जिष्णुर्विभुर्वन्द्‌यो यज्ञेशो यज्ञपालकः ॥ ८५॥

प्रभविष्णुर्ग्रसिष्णुश्च लोकात्मा लोकभावनः ।

केशवः केशिहा काव्यः कविः कारणकारणम् ॥ ८६॥

कालकर्ता कालशेषो वासुदेवः पुरुष्टुतः ।

आदिकर्ता वराहश्च माधवो मधुसूदनः ॥ ८७॥

नारायणो नरो हंसो विष्वक्सेनो जनार्दनः ।

विश्वकर्ता महायज्ञो ज्योतिष्मान् पुरुषोत्तमः ॥ ८८॥

वैकुण्ठः पुण्डरीकाक्षः कृष्णः सूर्यः सुरार्चितः ।

नारसिंहो महाभीमो वक्रदंष्ट्रो नखायुधः ॥ ८९॥

आदिदेवो जगत्कर्ता योगीशो गरुडध्वजः ।

गोविन्दो गोपतिर्गोप्ता भूपतिर्भुवनेश्वरः ॥ ९०॥

पद्‌मनाभो हृषीकेशो धाता दामोदरः प्रभुः ।

त्रिविक्रमस्त्रिलोकेशो ब्रह्मेशः प्रीतिवर्धनः ॥ ९१॥

वामनो दुष्टदमनो गोविन्दो गोपवल्लभः ।

भक्तप्रियोऽच्युतः सत्यः सत्यकीर्तिर्धृतिः स्मृतिः ॥ ९२॥

कारुण्यं करुणो व्यासः पापहा शान्तिवर्धनः ।

संन्यासी शास्त्रतत्त्वज्ञो मन्दराद्रिनिकेतनः ॥ ९३॥

बदरीनिलयः शान्तस्तपस्वी वैद्युतप्रभः ।

भूतावासो गुहावासः श्रीनिवासः श्रियः पतिः ॥ ९४॥

तपोवासो मुदावासः सत्यवासः सनातनः ।

पुरुषः पुष्करः पुण्यः पुष्कराक्षो महेश्वरः ॥ ९५॥

पूर्णमूर्तिः पुराणज्ञः पुण्यदः प्रीतिवर्धनः ।

शङ्खी चक्री गदी शार्ङ्गी लाङ्गली मुसली हली ॥ ९६॥

किरीटी कुण्डली हारी मेखली कवची ध्वजी ।

योद्धा जेता महावीर्यः शत्रुजिच्छत्रुतापनः ॥ ९७॥

शास्ता शास्त्रकरः शास्त्रं शङ्करः शङ्करस्तुतः ।

सारथिः सात्त्विकः स्वामी सामवेदप्रियः समः ॥ ९८॥

पवनः संहतः शक्तिः सम्पूर्णाङ्गः समृद्धिमान् ।

स्वर्गदः कामदः श्रीदः कीर्तिदोऽकीर्तिनाशनः ॥ ९९॥

मोक्षदः पुण्डरीकाक्षः क्षीराब्धिकृतकेतनः ।

सर्वात्मा सर्वलोकेशः प्रेरकः पापनाशनः ॥ १००॥

सर्वव्यापी जगन्नाथः सर्वलोकमहेश्वरः ।

सर्गस्थित्यन्तकृद्देवः सर्वलोकसुखावहः ॥ १०१॥

अक्षय्यः शाश्वतोऽनन्तः क्षयवृद्धिविवर्जितः ।

निर्लेपो निर्गुणः सूक्ष्मो निर्विकारो निरञ्जनः ॥ १०२॥

सर्वोपाधिविनिर्मुक्तः सत्तामात्रव्यवस्थितः ।

अधिकारी विभुर्नित्यः परमात्मा सनातनः ॥ १०३॥

अचलो निर्मलो व्यापी नित्यतृप्तो निराश्रयः ।

श्यामो युवा लोहिताक्षो दीप्तास्यो मितभाषणः ॥ १०४॥

आजानुबाहुः सुमुखः सिंहस्कन्धो महाभुजः ।

सत्यवान् गुणसम्पन्नः स्वयन्तेजाः सुदीप्तिमान् ॥ १०५॥

कालात्मा भगवान् कालः कालचक्रप्रवर्तकः ।

नारायणः परञ्ज्योतिः परमात्मा सनातनः ॥ १०६॥

विश्वसृड् विश्वगोप्ता च विश्वभोक्ता च शाश्वतः ।

विश्वेश्वरो विश्वमूर्तिर्विश्वात्मा विश्वभावनः ॥ १०७॥

सर्वभूतसुहृच्छान्तः सर्वभूतानुकम्पनः ।

सर्वेश्वरेश्वरः सर्वः श्रीमानाश्रितवत्सलः ॥ १०८॥

सर्वगः सर्वभूतेशः सर्वभूताशयस्थितः ।

अभ्यन्तरस्थस्तमसश्छेत्ता नारायणः परः ॥ १०९॥

अनादिनिधनः स्रष्टा प्रजापतिपतिर्हरिः ।

नरसिंहो हृषीकेशः सर्वात्मा सर्वदृग्वशी ॥ ११०॥

जगतस्तस्थुषश्चैव प्रभुर्नेता सनातनः ।

कर्ता धाता विधाता च सर्वेषां प्रभुरीश्वरः ॥ १११॥

सहस्रमूर्तिर्विश्वात्मा विष्णुर्विश्वदृगव्ययः ।

पुराणपुरुषः स्रष्टा सहस्राक्षः सहस्रपात् ॥ ११२॥

तत्त्वं नारायणो विष्णुर्वासुदेवः सनातनः ।

परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः ॥ ११३॥

परञ्ज्योतिः परन्धामः पराकाशः परात्परः ।

अच्युतः पुरुषः कृष्णः शाश्वतः शिव ईश्वरः ॥ ११४॥

नित्यः सर्वगतः स्थाणुरुग्रः साक्षी प्रजापतिः ।

हिरण्यगर्भः सविता लोककृल्लोकभृद्विभुः ॥ ११५॥

रामः श्रीमान् महाविष्णुर्जिष्णुर्देवहितावहः ।

तत्त्वात्मा तारकं ब्रह्म शाश्वतः सर्वसिद्धिदः ॥ ११६॥

अकारवाच्यो भगवान् श्रीर्भू लीलापतिः पुमान् ।

सर्वलोकेश्वरः श्रीमान् सर्वज्ञः सर्वतोमुखः ॥ ११७॥

स्वामी सुशीलः सुलभः सर्वज्ञः सर्वशक्तिमान् ।

नित्यः सम्पूर्णकामश्च नैसर्गिकसुहृत्सुखी ॥ ११८॥

कृपापीयूषजलधिः शरण्यः सर्वदेहिनाम् ।

श्रीमान्नारायणः स्वामी जगतां पतिरीश्वरः ॥ ११९॥

श्रीशः शरण्यो भूतानां संश्रिताभीष्टदायकः ।

अनन्तः श्रीपती रामो गुणभृन्निर्गुणो महान् ॥ १२०॥

॥ इति श्रीरामसहस्रनामस्तोत्रं सम्पूर्णम् ॥



# श्रीरामसहस्रनामावलिः

## श्रीमदानन्दरामायणे

ॐ अस्य श्रीरामसहस्रनाममालामन्त्रस्य ।

विनायक ऋषिः । अनुष्टुप्छन्दः ।

श्रीरामो देवता । महाविष्णुरिति बीजम् ।

गुणभृन्निर्गुणो महानिति शक्तिः ।

सच्चिदानन्दविग्रह इति कीलकम् ।

श्रीरामप्रीत्यर्थे जपे विनियोगः ॥

अङ्गुलिन्यासः

ॐ श्रीरामचन्द्राय अङ्गुष्ठाभ्यां नमः ॥

सीतापतये तर्जनीभ्यां नमः ॥

रघुनाथाय मध्यमाभ्यां नमः ॥

भरताग्रजाय अनामिकाभ्यां नमः ॥

दशरथात्मजाय कनिष्ठिकाभ्यां नमः ॥

हनुमत्प्रभवे करतलकरपृष्ठाभ्यां नमः ॥

हृदयादिन्यासः

ॐ श्रीरामचन्द्राय हृदयाय नमः ॥

सीतापतये शिरसे स्वाहा ।

रघुनाथाय शिखायै वषट् ।

भरताग्रजाय कवचाय हुम् ।

दशरथात्मजाय नेत्रत्रयाय वौषट् ।

हनुमत्प्रभवे अस्त्राय फट् ॥

अथ ध्यानम् ।

ध्यायेदाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं

पीतं वासो वसानं नवकमलस्पर्धि नेत्रं प्रसन्नम् ।

वामाङ्कारूढसीतामुखकमलमिलल्लोचनं नीरदाभं

नानालङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ ३१॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे

मध्ये पुष्पकमासने मणिमये वीरासने संस्थितम् ।

अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं

व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥ ३२॥

सौवर्णमण्डपे दिव्ये पुष्पके सुविराजिते ।

मूले कल्पतरोः स्वर्णपीठे सिंहाष्टसंयुते ॥ ३३॥

मृदुश्लक्ष्णतरे तत्र जानक्या सह संस्थितम् ।

रामं नीलोत्पलश्यामं द्विभुजं पीतवाससम् ॥ ३४॥

स्मितवक्त्रं सुखासीनं पद्मपत्रनिभेक्षणम् ।

किरीटहारकेयूरकुण्डलैः कटकादिभिः ॥ ३५॥

भ्राजमानं ज्ञानमुद्राधरं वीरासनस्थितम् ।

स्पृशन्तं स्तनयोरग्रे जानक्याः सव्यपाणिना ॥ ३६॥

वसिष्ठवामदेवाद्यैः सेवितं लक्ष्मणादिभिः ।

अयोध्यानगरे रम्ये ह्यभिषिक्तं रघूद्वहम् ॥ ३७॥

एवं ध्यात्वा जपेन्नित्यं रामनामसहस्रकम् ।

हत्याकोटियुतो वापि मुच्यते नात्र संशयः ॥ ३८॥

अथ श्रीरामसहस्रनामावलिः ।

ॐ रामाय नमः ।

ॐ श्रीमते नमः ।

ॐ महाविष्णवे नमः ।

ॐ जिष्णवे नमः ।

ॐ देवहितावहाय नमः ।

ॐ तत्त्वात्मने नमः ।

ॐ तारकब्रह्मणे नमः ।

ॐ शाश्वताय नमः ।

ॐ सर्वसिद्धिदाय नमः ।

ॐ श्रीमते नमः ।

ॐ राजीवलोचनाय नमः ।

ॐ श्रीरामाय नमः ।

ॐ रघुपुङ्गवाय नमः ।

ॐ रामभद्राय नमः ।

ॐ सदाचाराय नमः ।

ॐ राजेन्द्राय नमः ।

ॐ जानकीपतये नमः ।

ॐ अग्रगण्याय नमः ।

ॐ वरेण्याय नमः ।

ॐ वरदाय नमः । २०

ॐ परमेश्वराय नमः ।

ॐ जनार्दनाय नमः ।

ॐ जितामित्राय नमः ।

ॐ परार्थैकप्रयोजनाय नमः ।

ॐ विश्वामित्रप्रियाय नमः ।

ॐ दात्रे नमः ।

ॐ शत्रुजिते नमः ।

ॐ शत्रुतापनाय नमः ।

ॐ सर्वज्ञाय नमः ।

ॐ सर्ववेदादये नमः ।

ॐ शरण्याय नमः ।

ॐ वालिमर्दनाय नमः ।

ॐ ज्ञानभव्याय नमः ।

ॐ अपरिच्छेद्याय नमः ।

ॐ वाग्मिने नमः ।

ॐ सत्यव्रताय नमः ।

ॐ शुचये नमः ।

ॐ ज्ञानगम्याय नमः ।

ॐ दृढप्रज्ञाय नमः ।

ॐ स्वरध्वंसिने नमः । ४०

ॐ प्रतापवते नमः ।

ॐ द्युतिमते नमः ।

ॐ आत्मवते नमः ।

ॐ वीराय नमः ।

ॐ जितक्रोधाय नमः ।

ॐ अरिमर्दनाय नमः ।

ॐ विश्वरूपाय नमः ।

ॐ विशालाक्षाय नमः ।

ॐ प्रभवे नमः ।

ॐ परिवृढाय नमः ।

ॐ दृढाय नमः ।

ॐ ईशाय नमः ।

ॐ खड्गधराय नमः ।

ॐ कौसल्येयाय नमः ।

ॐ अनसूयकाय नमः ।

ॐ विपुलांसाय नमः ।

ॐ महोरस्काय नमः ।

ॐ परमेष्ठिने नमः ।

ॐ परायणाय नमः ।

ॐ सत्यव्रताय नमः । ६०

ॐ सत्यसन्धाय नमः ।

ॐ गुरवे नमः ।

ॐ परमधार्मिकाय नमः ।

ॐ लोकेशाय नमः ।

ॐ लोकवन्द्याय नमः ।

ॐ लोकात्मने नमः ।

ॐ लोककृते नमः ।

ॐ विभवे नमः ।

ॐ अनादये नमः ।

ॐ भगवते नमः ।

ॐ सेव्याय नमः ।

ॐ जितमायाय नमः ।

ॐ रघूद्वहाय नमः ।

ॐ रामाय नमः ।

ॐ दयाकराय नमः ।

ॐ दक्षाय नमः ।

ॐ सर्वज्ञाय नमः ।

ॐ सर्वपावनाय नमः ।

ॐ ब्रह्मण्याय नमः ।

ॐ नीतिमते नमः । ८०

ॐ गोप्त्रे नमः ।

ॐ सर्वदेवमयाय नमः ।

ॐ हरये नमः ।

ॐ सुन्दराय नमः ।

ॐ पीतवाससे नमः ।

ॐ सूत्रकाराय नमः ।

ॐ पुरातनाय नमः ।

ॐ सौम्याय नमः ।

ॐ महर्षये नमः ।

ॐ कोदण्डाय नमः ।

ॐ सर्वज्ञाय नमः ।

ॐ सर्वकोविदाय नमः ।

ॐ कवये नमः ।

ॐ सुग्रीववरदाय नमः ।

ॐ सर्वपुण्याधिकप्रदाय नमः ।

ॐ भव्याय नमः ।

ॐ जितारिषड्वर्गाय नमः ।

ॐ महोदाराय नमः ।

ॐ अघनाशनाय नमः ।

ॐ सुकीर्तये नमः । १००

ॐ आदिपुरुषाय नमः ।

ॐ कान्ताय नमः ।

ॐ पुण्यकृतागमाय नमः ।

ॐ अकल्मषाय नमः ।

ॐ चतुर्बाहवे नमः ।

ॐ सर्वावासाय नमः ।

ॐ दुरासदाय नमः ।

ॐ स्मितभाषिणे नमः ।

ॐ निवृत्तात्मने नमः ।

ॐ स्मृतिमते नमः ।

ॐ वीर्यवते नमः ।

ॐ प्रभवे नमः ।

ॐ धीराय नमः ।

ॐ दान्ताय नमः ।

ॐ घनश्यामाय नमः ।

ॐ सर्वायुधविशारदाय नमः ।

ॐ अध्यात्मयोगनिलयाय नमः ।

ॐ सुमनसे नमः ।

ॐ लक्ष्मणाग्रजाय नमः ।

ॐ सर्वतीर्थमयाय नमः । १२०

ॐ शूराय नमः ।

ॐ सर्वयज्ञफलप्रदाय नमः ।

ॐ यज्ञस्वरूपाय नमः ।

ॐ यज्ञेशाय नमः ।

ॐ जरामरणवर्जिताय नमः ।

ॐ वर्णाश्रमगुरवे नमः ।

ॐ वेर्णिने नमः ।

ॐ शत्रुजिते नमः ।

ॐ पुरुषोत्तमाय नमः ।

ॐ शिवलिङ्गप्रतिष्ठात्रे नमः ।

ॐ परमात्मने नमः ।

ॐ परापराय नमः ।

ॐ प्रमाणभूताय नमः ।

ॐ दुर्ज्ञेयाय नमः ।

ॐ पूर्णाय नमः ।

ॐ परपुरञ्जयाय नमः ।

ॐ अनन्तदृष्टये नमः ।

ॐ आनन्दाय नमः ।

ॐ धनुर्वेदाय नमः ।

ॐ धनुर्धराय नमः । १४०

ॐ गुणाकराय नमः ।

ॐ गुणश्रेष्ठाय नमः ।

ॐ सच्चिदानन्दविग्रहाय नमः ।

ॐ अभिवाद्याय नमः ।

ॐ महाकायाय नमः ।

ॐ विश्वकर्मणे नमः ।

ॐ विशारदाय नमः ।

ॐ विनीतात्मने नमः ।

ॐ वीतरागाय नमः ।

ॐ तपस्वीशाय नमः ।

ॐ जनेश्वराय नमः ।

ॐ कल्याणाय नमः ।

ॐ प्रह्वतये नमः ।

ॐ कल्पाय नमः ।

ॐ सर्वेशाय नमः ।

ॐ सर्वकामदाय नमः ।

ॐ अक्षयाय नमः ।

ॐ पुरुषाय नमः ।

ॐ साक्षिणे नमः ।

ॐ केशवाय नमः । १६०

ॐ पुरुषोत्तमाय नमः ।

ॐ लोकाध्यक्षाय नमः ।

ॐ महाकार्याय नमः ।

ॐ विभीषणवरप्रदाय नमः ।

ॐ आनन्दविग्रहाय नमः ।

ॐ ज्योतिषे नमः ।

ॐ हनुमत्प्रभवे नमः ।

ॐ अव्ययाय नमः ।

ॐ भ्राजिष्णवे नमः ।

ॐ सहनाय नमः ।

ॐ भोक्त्रे नमः ।

ॐ सत्यवादिने नमः ।

ॐ बहुश्रुताय नमः ।

ॐ सुखदाय नमः ।

ॐ कारणाय नमः ।

ॐ कर्त्रे नमः ।

ॐ भवबन्धविमोचनाय नमः ।

ॐ देवचूडामणये नमः ।

ॐ नेत्रे नमः ।

ॐ ब्रह्मण्याय नमः । १८०

ॐ ब्रह्मवर्धनाय नमः ।

ॐ संसारतारकाय नमः ।

ॐ रामाय नमः ।

ॐ सर्वदुःखविमोक्षकृते नमः ।

ॐ विद्वत्तमाय नमः ।

ॐ विश्वकर्त्रे नमः ।

ॐ विश्वकृते नमः ।

ॐ विश्वकर्मणे नमः ।

ॐ नित्याय नमः ।

ॐ नियतकल्याणाय नमः ।

ॐ सीताशोकविनाशकृते नमः ।

ॐ काकुत्स्थाय नमः ।

ॐ पुण्डरीकाक्षाय नमः ।

ॐ विश्वामित्रभयापहाय नमः ।

ॐ मारीचमथनाय नमः ।

ॐ रामाय नमः ।

ॐ विराधवधपण्डिताय नमः ।

ॐ दुःस्वप्ननाशनाय नमः ।

ॐ रम्याय नमः ।

ॐ किरीटिने नमः । २००

ॐ त्रिदशाधिपाय नमः ।

ॐ महाधनुषे नमः ।

ॐ महाकायाय नमः ।

ॐ भीमाय नमः ।

ॐ भीमपराक्रमाय नमः ।

ॐ तत्त्वस्वरूपाय नमः ।

ॐ तत्त्वज्ञाय नमः ।

ॐ तत्त्ववादिने नमः ।

ॐ सुविक्रमाय नमः ।

ॐ भूतात्मने नमः ।

ॐ भूतकृते नमः ।

ॐ स्वामिने नमः ।

ॐ कालज्ञानिने नमः ।

ॐ महावपुषे नमः ।

ॐ अनिर्विण्णाय नमः ।

ॐ गुणग्रामाय नमः ।

ॐ निष्कलङ्काय नमः ।

ॐ कलङ्कहर्त्रे नमः ।

ॐ स्वभावभद्राय नमः ।

ॐ शत्रुघ्नाय नमः । २२०

ॐ केशवाय नमः ।

ॐ स्थाणवे नमः ।

ॐ ईश्वराय नमः ।

ॐ भूतादये नमः ।

ॐ शम्भवे नमः ।

ॐ आदित्याय नमः ।

ॐ स्थविष्ठाय नमः ।

ॐ शाश्वताय नमः ।

ॐ ध्रुवाय नमः ।

ॐ कवचिने नमः ।

ॐ कुण्डलिने नमः ।

ॐ चक्रिणे नमः ।

ॐ खड्गिने नमः ।

ॐ भक्तजनप्रियाय नमः ।

ॐ अमृत्यवे नमः ।

ॐ जन्मरहिताय नमः ।

ॐ सर्वजिते नमः ।

ॐ सर्वगोचराय नमः ।

ॐ अनुत्तमाय नमः ।

ॐ अप्रमेयात्मने नमः । २४०

ॐ सर्वात्मने नमः ।

ॐ गुणसागराय नमः ।

ॐ रामाय नमः ।

ॐ समात्मने नमः ।

ॐ समगाय नमः ।

ॐ जटामुकुटमण्डिताय नमः ।

ॐ अजेयाय नमः ।

ॐ सर्वभूतात्मने नमः ।

ॐ विष्वक्सेनाय नमः ।

ॐ महातपसे नमः ।

ॐ लोकाध्यक्षाय नमः ।

ॐ महाबाहवे नमः ।

ॐ अमृताय नमः ।

ॐ वेदवित्तमाय नमः ।

ॐ सहिष्णवे नमः ।

ॐ सद्गतये नमः ।

ॐ शास्त्रे नमः ।

ॐ विश्वयोनये नमः ।

ॐ महाद्युतये नमः ।

ॐ अतीन्द्राय नमः । २६०

ॐ ऊर्जिताय नमः ।

ॐ प्रांशवे नमः ।

ॐ उपेन्द्राय नमः ।

ॐ वामनाय नमः ।

ॐ बलये नमः ।

ॐ धनुर्वेदाय नमः ।

ॐ विधात्रे नमः ।

ॐ ब्रह्मणे नमः ।

ॐ विष्णवे नमः ।

ॐ शङ्कराय नमः ।

ॐ हंसाय नमः ।

ॐ मरीचये नमः ।

ॐ गोविन्दाय नमः ।

ॐ रत्नगर्भाय नमः ।

ॐ महद्द्युतये नमः ।

ॐ व्यासाय नमः ।

ॐ वाचस्पतये नमः ।

ॐ सर्वदर्पितासुरमर्दनाय नमः ।

ॐ जानकीवल्लभाय नमः ।

ॐ श्रीमते नमः । २८०

ॐ प्रकटाय नमः ।

ॐ प्रीतिवर्धनाय नमः ।

ॐ सम्भवाय नमः ।

ॐ अतीन्द्रियाय नमः ।

ॐ वेद्याय नमः ।

ॐ निर्देशाय नमः ।

ॐ जाम्बवत्प्रभवे नमः ।

ॐ मदनाय नमः ।

ॐ मन्मथाय नमः ।

ॐ व्यापिने नमः ।

ॐ विश्वरूपाय नमः ।

ॐ निरञ्जनाय नमः ।

ॐ नारायणाय नमः ।

ॐ अग्रण्ये नमः ।

ॐ साधवे नमः ।

ॐ जटायुप्रीतिवर्धनाय नमः ।

ॐ नैकरूपाय नमः ।

ॐ जगन्नाथाय नमः ।

ॐ सुरकार्यहिताय नमः ।

ॐ प्रभवे नमः । ३००

ॐ जितक्रोधाय नमः ।

ॐ जितारातये नमः ।

ॐ प्लवगाधिपराज्यदाय नमः ।

ॐ वसुदाय नमः ।

ॐ सुभुजाय नमः ।

ॐ नैकमायाय नमः ।

ॐ भव्याय नमः ।

ॐ प्रमोदनाय नमः ।

ॐ चण्डांशवे नमः ।

ॐ सिद्धिदाय नमः ।

ॐ कल्पाय नमः ।

ॐ शरणागतवत्सलाय नमः ।

ॐ अगदाय नमः ।

ॐ रोगहर्त्रे नमः ।

ॐ मन्त्रज्ञाय नमः ।

ॐ मन्त्रभावनाय नमः ।

ॐ सौमित्रिवत्सलाय नमः ।

ॐ धुर्याय नमः ।

ॐ व्यक्ताव्यक्तस्वरूपधृते नमः ।

ॐ वसिष्ठाय नमः । ३२०

ॐ ग्रामण्ये नमः ।

ॐ श्रीमते नमः ।

ॐ अनुकूलाय नमः ।

ॐ प्रियंवदाय नमः ।

ॐ अतुलाय नमः ।

ॐ सात्त्विकाय नमः ।

ॐ धीराय नमः ।

ॐ शरासनविशारदाय नमः ।

ॐ ज्येष्ठाय नमः ।

ॐ सर्वगुणोपेताय नमः ।

ॐ शक्तिमते नमः ।

ॐ ताटकान्तकाय नमः ।

ॐ वैकुण्ठाय नमः ।

ॐ प्राणिनां प्राणाय नमः ।

ॐ कमलाय नमः ।

ॐ कमलाधिपाय नमः ।

ॐ गोवर्धनधराय नमः ।

ॐ मत्स्यरूपाय नमः ।

ॐ कारुण्यसागराय नमः ।

ॐ कुम्भकर्णप्रभेत्त्रे नमः । ३४०

ॐ गोपिगोपालसंवृताय नमः ।

ॐ मायाविने नमः ।

ॐ व्यापकाय नमः ।

ॐ व्यापिने नमः ।

ॐ रैणुकेयबलापहाय नमः ।

ॐ पिनाकमथनाय नमः ।

ॐ वन्द्याय नमः ।

ॐ समर्थाय नमः ।

ॐ गरुडध्वजाय नमः ।

ॐ लोकत्रयाश्रयाय नमः ।

ॐ लोकभरिताय नमः ।

ॐ भरताग्रजाय नमः ।

ॐ श्रीधराय नमः ।

ॐ सङ्गतये नमः ।

ॐ लोकसाक्षिणे नमः ।

ॐ नारायणाय नमः ।

ॐ विभवे नमः ।

ॐ मनोरूपिणे नमः ।

ॐ मनोवेगिने नमः ।

ॐ पूर्णाय नमः । ३६०

ॐ पुरुषपुङ्गवाय नमः ।

ॐ यदुश्रेष्ठाय नमः ।

ॐ यदुपतये नमः ।

ॐ भूतावासाय नमः ।

ॐ सुविक्रमाय नमः ।

ॐ तेजोधराय नमः ।

ॐ धराधराय नमः ।

ॐ चतुर्मूर्तये नमः ।

ॐ महानिधये नमः ।

ॐ चाणूरमथनाय नमः ।

ॐ शान्ताय नमः ।

ॐ वन्द्याय नमः ।

ॐ भरतवन्दिताय नमः ।

ॐ शब्दातिगाय नमः ।

ॐ गभीरात्मने नमः ।

ॐ कोमलाङ्गाय नमः ।

ॐ प्रजागराय नमः ।

ॐ लोकोर्ध्वगाय नमः ।

ॐ शेषशायिने नमः ।

ॐ क्षीराब्धिनिलयाय नमः । ३८०

ॐ अमलाय नमः ।

ॐ आत्मज्योतिषे नमः ।

ॐ अदीनात्मने नमः ।

ॐ सहस्रार्चिषे नमः ।

ॐ सहस्रपादाय नमः ।

ॐ अमृतांशवे नमः ।

ॐ महीगर्ताय नमः ।

ॐ निवृत्तविषयस्पृहाय नमः ।

ॐ त्रिकालज्ञाय नमः ।

ॐ मुनये नमः ।

ॐ साक्षिणे नमः ।

ॐ विहायसगतये नमः ।

ॐ कृतिने नमः ।

ॐ पर्जन्याय नमः ।

ॐ कुमुदाय नमः ।

ॐ भूतावासाय नमः ।

ॐ कमललोचनाय नमः ।

ॐ श्रीवत्सवक्षसे नमः ।

ॐ श्रीवासाय नमः ।

ॐ वीरहने नमः । ४००

ॐ लक्ष्मणाग्रजाय नमः ।

ॐ लोकाभिरामाय नमः ।

ॐ लोकारिमर्दनाय नमः ।

ॐ सेवकप्रियाय नमः ।

ॐ सनातनतमाय नमः ।

ॐ मेघश्यामलाय नमः ।

ॐ राक्षसान्तकाय नमः ।

ॐ दिव्यायुधधराय नमः ।

ॐ अप्रमेयाय नमः ।

ॐ जितेन्द्रियाय नमः ।

ॐ भूदेववन्द्याय नमः ।

ॐ जनकप्रियकृते नमः ।

ॐ प्रपितामहाय नमः ।

ॐ उत्तमाय नमः ।

ॐ सात्त्विकाय नमः ।

ॐ सत्याय नमः ।

ॐ सत्यसन्धाय नमः ।

ॐ त्रिविक्रमाय नमः ।

ॐ सुवृत्ताय नमः ।

ॐ सुगमाय नमः । ४२०

ॐ सूक्ष्माय नमः ।

ॐ सुघोषाय नमः ।

ॐ सुखदाय नमः ।

ॐ सुहृदे नमः ।

ॐ दामोदराय नमः ।

ॐ अच्युताय नमः ।

ॐ शार्ङ्गिणे नमः ।

ॐ मथुराधिपाय नमः ।

ॐ वामनाय नमः ।

ॐ देवकीनन्दनाय नमः ।

ॐ शौरये नमः ।

ॐ कैटभमर्दनाय नमः ।

ॐ सप्ततालप्रभेत्त्रे नमः ।

ॐ मित्रवंशप्रवर्धनाय नमः ।

ॐ कालस्वरूपिणे नमः ।

ॐ कालात्मने नमः ।

ॐ कालाय नमः ।

ॐ कल्याणदाय नमः ।

ॐ कलये नमः ।

ॐ संवत्सराय नमः । ४४०

ॐ ऋतवे नमः ।

ॐ पक्षाय नमः ।

ॐ अयनाय नमः ।

ॐ दिवसाय नमः ।

ॐ युगाय नमः ।

ॐ स्तव्याय नमः ।

ॐ विविक्ताय नमः ।

ॐ निर्लेपाय नमः ।

ॐ सर्वव्यापिने नमः ।

ॐ निराकुलाय नमः ।

ॐ अनादिनिधनाय नमः ।

ॐ सर्वलोकपूज्याय नमः ।

ॐ निरामयाय नमः ।

ॐ रसाय नमः ।

ॐ रसज्ञाय नमः ।

ॐ सारज्ञाय नमः ।

ॐ लोकसाराय नमः ।

ॐ रसात्मकाय नमः ।

ॐ सर्वदुःखातिगाय नमः ।

ॐ विद्याराशये नमः । ४६०

ॐ परमगोचराय नमः ।

ॐ शेषाय नमः ।

ॐ विशेषाय नमः ।

ॐ विगतकल्मषाय नमः ।

ॐ रघुपुङ्गवाय नमः ।

ॐ वर्णश्रेष्ठाय नमः ।

ॐ वर्णभाव्याय नमः ।

ॐ वर्णाय नमः ।

ॐ वर्णगुणोज्ज्वलाय नमः ।

ॐ कर्मसाक्षिणे नमः ।

ॐ गुणश्रेष्ठाय नमः ।

ॐ देवाय नमः ।

ॐ सुरवरप्रदाय नमः ।

ॐ देवाधिदेवाय नमः ।

ॐ देवर्षये नमः ।

ॐ देवासुरनमस्कृताय नमः ।

ॐ सर्वदेवमयाय नमः ।

ॐ चक्रिणे नमः ।

ॐ शार्ङ्गपाणये नमः ।

ॐ रघूत्तमाय नमः । ४८०

ॐ मनोगुप्तये नमः ।

ॐ अहङ्काराय नमः ।

ॐ प्रकृतये नमः ।

ॐ पुरुषाय नमः ।

ॐ अव्ययाय नमः ।

ॐ न्यायाय नमः ।

ॐ न्यायिने नमः ।

ॐ नयिने नमः ।

ॐ नयाय नमः ।

ॐ श्रीमते नमः ।

ॐ नगधराय नमः ।

ॐ ध्रुवाय नमः ।

ॐ लक्ष्मीविश्वम्भराय नमः ।

ॐ भर्त्रे नमः ।

ॐ देवेन्द्राय नमः ।

ॐ बलिमर्दनाय नमः ।

ॐ बाणारिमर्दनाय नमः ।

ॐ यज्वने नमः ।

ॐ उत्तमाय नमः ।

ॐ मुनिसेविताय नमः । ५००

ॐ देवाग्रण्ये नमः ।

ॐ शिवध्यानतत्पराय नमः ।

ॐ परमाय नमः ।

ॐ पराय नमः ।

ॐ सामगेयाय नमः ।

ॐ प्रियाय नमः ।

ॐ शूरय नमः ।

ॐ पूर्णकीर्तये नमः ।

ॐ सुलोचनाय नमः ।

ॐ अव्यक्तलक्षणाय नमः ।

ॐ व्यक्ताय नमः ।

ॐ दशास्यद्विपकेसरिणे नमः ।

ॐ कलानिधये नमः ।

ॐ कलानाथाय नमः ।

ॐ कमलानन्दवर्धनाय नमः ।

ॐ पुण्याय नमः ।

ॐ पुण्याधिकाय नमः ।

ॐ पूर्णाय नमः ।

ॐ पूर्वाय नमः ।

ॐ पूरयित्रे नमः । ५२०

ॐ रवये नमः ।

ॐ जटिलाय नमः ।

ॐ कल्मषध्वान्तप्रभञ्जन-विभावसवे नमः ।

ॐ जयिने नमः ।

ॐ जितारये नमः ।

ॐ सर्वादये नमः ।

ॐ शमनाय नमः ।

ॐ भवभञ्जनाय नमः ।

ॐ अलङ्करिष्णवे नमः ।

ॐ अचलाय नमः ।

ॐ रोचिष्णवे नमः ।

ॐ विक्रमोत्तमाय नमः ।

ॐ आशवे नमः ।

ॐ शब्दपतये नमः ।

ॐ शब्दगोचराय नमः ।

ॐ रञ्जनाय नमः ।

ॐ लघवे नमः ।

ॐ निःशब्दपुरुषाय नमः ।

ॐ मायाय नमः ।

ॐ स्थूलाय नमः । ५४०

ॐ सूक्ष्माय नमः ।

ॐ विलक्षणाय नमः ।

ॐ आत्मयोनये नमः ।

ॐ अयोनये नमः ।

ॐ सप्तजिह्वाय नमः ।

ॐ सहस्रपादाय नमः ।

ॐ सनातनतमाय नमः ।

ॐ स्रग्विणे नमः ।

ॐ पेशलाय नमः ।

ॐ विजिताम्बराय नमः ।

ॐ शक्तिमते नमः ।

ॐ शङ्खभृते नमः ।

ॐ नाथाय नमः ।

ॐ गदाधराय नमः ।

ॐ रथाङ्गभृते नमः ।

ॐ निरीहाय नमः ।

ॐ निर्विकल्पाय नमः ।

ॐ चिद्रूपाय नमः ।

ॐ वीतसाध्वसाय नमः ।

ॐ सनातनाय नमः । ५६०

ॐ सहस्राक्षाय नमः ।

ॐ शतमूर्तये नमः ।

ॐ घनप्रभाय नमः ।

ॐ हृत्पुण्डरीकशयनाय नमः ।

ॐ कठिनाय नमः ।

ॐ द्रवाय नमः ।

ॐ सूर्याय नमः ।

ॐ ग्रहपतये नमः ।

ॐ श्रीमते नमः ।

ॐ समर्थाय नमः ।

ॐ अनर्थनाशनाय नमः ।

ॐ अधर्मशत्रवे नमः ।

ॐ रक्षोघ्नाय नमः ।

ॐ पुरुहूताय नमः ।

ॐ पुरस्तुताय नमः ।

ॐ ब्रह्मगर्भाय नमः ।

ॐ बृहद्गर्भाय नमः ।

ॐ धर्मधेनवे नमः ।

ॐ धनागमाय नमः ।

ॐ हिरण्यगर्भाय नमः । ५८०

ॐ ज्योतिष्मते नमः ।

ॐ सुललाटाय नमः ।

ॐ सुविक्रमाय नमः ।

ॐ शिवपूजारताय नमः ।

ॐ श्रीमते नमः ।

ॐ भवानीप्रियकृते नमः ।

ॐ वशिने नमः ।

ॐ नराय नमः ।

ॐ नारायणाय नमः ।

ॐ श्यामाय नमः ।

ॐ कपर्दिने नमः ।

ॐ नीललोहिताय नमः ।

ॐ रुद्राय नमः ।

ॐ पशुपतये नमः ।

ॐ स्थाणवे नमः ।

ॐ विंश्वामित्राय नमः ।

ॐ द्विजेश्वराय नमः ।

ॐ मातामहाय नमः ।

ॐ मातरिश्वने नमः ।

ॐ विरिञ्चिने नमः । ६००

ॐ विष्टरश्रवसे नमः ।

ॐ सर्वभूतानां अक्षोभ्याय नमः ।

ॐ चण्डाय नमः ।

ॐ सत्यपराक्रमाय नमः ।

ॐ वालखिल्याय नमः ।

ॐ महाकल्पाय नमः ।

ॐ कल्पवृक्षाय नमः ।

ॐ कलाधराय नमः ।

ॐ निदाघाय नमः ।

ॐ तपनाय नमः ।

ॐ मेघाय नमः ।

ॐ शुक्राय नमः ।

ॐ परबलापहृदे नमः ।

ॐ वसुश्रवसे नमः ।

ॐ कव्यवाहाय नमः ।

ॐ प्रतप्ताय नमः ।

ॐ विश्वभोजनाय नमः ।

ॐ रामाय नमः ।

ॐ नीलोत्पलश्यामाय नमः ।

ॐ ज्ञानस्कन्दाय नमः । ६२०

ॐ महाद्युतये नमः ।

ॐ कबन्धमथनाय नमः ।

ॐ दिव्याय नमः ।

ॐ कम्बुग्रीवाय नमः ।

ॐ शिवप्रियाय नमः ।

ॐ सुखिने नमः ।

ॐ नीलाय नमः ।

ॐ सुनिष्पन्नाय नमः ।

ॐ सुलभाय नमः ।

ॐ शिशिरात्मकाय नमः ।

ॐ असंसृष्टाय नमः ।

ॐ अतिथये नमः ।

ॐ शूराय नमः ।

ॐ प्रमाथिने नमः ।

ॐ पापनाशकृते नमः ।

ॐ पवित्रपादाय नमः ।

ॐ पापारये नमः ।

ॐ मणिपूराय नमः ।

ॐ नभोगतये नमः ।

ॐ उत्तारणाय नमः । ६४०

ॐ दुष्कृतिहने नमः ।

ॐ दुर्धर्षाय नमः ।

ॐ दुःसहाय नमः ।

ॐ बलाय नमः ।

ॐ अमृतेशाय नमः ।

ॐ अमृतवपुषे नमः ।

ॐ धर्मिणे नमः ।

ॐ धर्माय नमः ।

ॐ कृपाकराय नमः ।

ॐ भगाय नमः ।

ॐ विवस्वते नमः ।

ॐ आदित्याय नमः ।

ॐ योगाचार्याय नमः ।

ॐ दिवस्पतये नमः ।

ॐ उदारकीर्तये नमः ।

ॐ उद्योगिने नमः ।

ॐ वाङ्मयाय नमः ।

ॐ सदसन्मयाय नमः ।

ॐ नक्षत्रमानिने नमः ।

ॐ नाकेशाय नमः । ६६०

ॐ स्वाधिष्ठानाय नमः ।

ॐ षडाश्रयाय नमः ।

ॐ चतुर्वर्गफलाय नमः ।

ॐ वर्णशक्तित्रयफलाय नमः ।

ॐ निधये नमः ।

ॐ निधानगर्भाय नमः ।

ॐ निर्व्याजाय नमः ।

ॐ निरीशाय नमः ।

ॐ व्यालमर्दनाय नमः ।

ॐ श्रीवल्लभाय नमः ।

ॐ शिवारम्भाय नमः ।

ॐ शान्ताय नमः ।

ॐ भद्राय नमः ।

ॐ समञ्जयाय नमः ।

ॐ भूशायिने नमः ।

ॐ भूतकृते नमः ।

ॐ भूतये नमः ।

ॐ भूषणाय नमः ।

ॐ भूतभावनाय नमः ।

ॐ अकायाय नमः । ६८०

ॐ भक्तकायस्थाय नमः ।

ॐ कालज्ञानिने नमः ।

ॐ महापटवे नमः ।

ॐ परार्धवृत्तये नमः ।

ॐ अचलाय नमः ।

ॐ विविक्ताय नमः ।

ॐ श्रुतिसागराय नमः ।

ॐ स्वभावभद्राय नमः ।

ॐ मध्यस्थाय नमः ।

ॐ संसारभयनाशनाय नमः ।

ॐ वेद्याय नमः ।

ॐ वैद्याय नमः ।

ॐ वियद्गोप्त्रे नमः ।

ॐ सर्वामरमुनीश्वराय नमः ।

ॐ सुरेन्द्राय नमः ।

ॐ कारणाय नमः ।

ॐ कर्मकराय नमः ।

ॐ कर्मिणे नमः ।

ॐ अधोक्षजाय नमः ।

ॐ धैर्याय नमः । ७००

ॐ अग्रधुर्याय नमः ।

ॐ धात्रीशाय नमः ।

ॐ सङ्कल्पाय नमः ।

ॐ शर्वरीपतये नमः ।

ॐ परमार्थगुरवे नमः ।

ॐ दृष्टये नमः ।

ॐ सुचिराश्रितवत्सलाय नमः ।

ॐ विष्णवे नमः ।

ॐ जिष्णवे नमः ।

ॐ विभवे नमः ।

ॐ यज्ञाय नमः ।

ॐ यज्ञेशाय नमः ।

ॐ यज्ञपालकाय नमः ।

ॐ प्रभवे नमः ।

ॐ विष्णवे नमः ।

ॐ ग्रसिष्णवे नमः ।

ॐ लोकात्मने नमः ।

ॐ लोकपालकाय नमः ।

ॐ केशवाय नमः ।

ॐ केशिहने नमः । ७२०

ॐ काव्याय नमः ।

ॐ कवये नमः ।

ॐ कारणकारणाय नमः ।

ॐ कालकर्त्रे नमः ।

ॐ कालशेषाय नमः ।

ॐ वासुदेवाय नमः ।

ॐ पुरुष्टुताय नमः ।

ॐ आदिकर्त्रे नमः ।

ॐ वराहाय नमः ।

ॐ वामनाय नमः ।

ॐ मधुसूदनाय नमः ।

ॐ नरनारायणाय नमः ।

ॐ हंसाय नमः ।

ॐ विष्वक्सेनाय नमः ।

ॐ जनार्दनाय नमः ।

ॐ विश्वकर्त्रे नमः ।

ॐ महायज्ञाय नमः ।

ॐ ज्योतिष्मते नमः ।

ॐ पुरुषोत्तमाय नमः ।

ॐ वैकुण्ठाय नमः । ७४०

ॐ पुण्डरीकाक्षाय नमः ।

ॐ कृष्णाय नमः ।

ॐ सूर्याय नमः ।

ॐ सुरार्चिताय नमः ।

ॐ नारसिम्हाय नमः ।

ॐ महाभीमाय नमः ।

ॐ वज्रदंष्ट्राय नमः ।

ॐ नखायुधाय नमः ।

ॐ आदिदेवाय नमः ।

ॐ जगत्कर्त्रे नमः ।

ॐ योगीशाय नमः ।

ॐ गरुडध्वजाय नमः ।

ॐ गोविन्दाय नमः ।

ॐ गोपतये नमः ।

ॐ गोप्त्रे नमः ।

ॐ भूपतये नमः ।

ॐ भुवनेश्वराय नमः ।

ॐ पद्मनाभाय नमः ।

ॐ हृषीकेशाय नमः ।

ॐ धात्रे नमः । ७६०

ॐ दामोदराय नमः ।

ॐ प्रभवे नमः ।

ॐ त्रिविक्रमाय नमः ।

ॐ त्रिलोकेशाय नमः ।

ॐ ब्रह्मेशाय नमः ।

ॐ प्रीतिवर्धनाय नमः ।

ॐ संन्यासिने नमः ।

ॐ शास्त्रतत्त्वज्ञाय नमः ।

ॐ मन्दिराय नमः ।

ॐ गिरिशाय नमः ।

ॐ नताय नमः ।

ॐ वामनाय नमः ।

ॐ दुष्टदमनाय नमः ।

ॐ गोविन्दाय नमः ।

ॐ गोपवल्लभाय नमः ।

ॐ भक्तप्रियाय नमः ।

ॐ अच्युताय नमः ।

ॐ सत्याय नमः ।

ॐ सत्यकीर्तये नमः ।

ॐ धृतये नमः । ७८०

ॐ स्मृतये नमः ।

ॐ कारुण्याय नमः ।

ॐ करुणाय नमः ।

ॐ व्यासाय नमः ।

ॐ पापहने नमः ।

ॐ शान्तिवर्धनाय नमः ।

ॐ बदरीनिलयाय नमः ।

ॐ शान्ताय नमः ।

ॐ तपस्विने नमः ।

ॐ वैद्युताय नमः ।

ॐ प्रभवे नमः ।

ॐ भूतावासाय नमः ।

ॐ महावासाय नमः ।

ॐ श्रीनिवासाय नमः ।

ॐ श्रियःपतये नमः ।

ॐ तपोवासाय नमः ।

ॐ मुदावासाय नमः ।

ॐ सत्यवासाय नमः ।

ॐ सनातनाय नमः ।

ॐ पुष्कराय नमः । ८००

ॐ पुरुषाय नमः ।

ॐ पुण्याय नमः ।

ॐ पुष्कराक्षाय नमः ।

ॐ महेश्वराय नमः ।

ॐ पूर्णमूर्तये नमः ।

ॐ पुराणज्ञाय नमः ।

ॐ पुण्यदाय नमः ।

ॐ प्रीतिवर्धनाय नमः ।

ॐ पूर्णरूपाय नमः ।

ॐ कालचक्रप्रवर्तनसमाहिताय नमः ।

ॐ नारायणाय नमः ।

ॐ परञ्ज्योतिषे नमः ।

ॐ परमात्मने नमः ।

ॐ सदाशिवाय नमः ।

ॐ शङ्खिने नमः ।

ॐ चक्रिणे नमः ।

ॐ गदिने नमः ।

ॐ शार्ङ्गिणे नमः ।

ॐ लाङ्गलिने नमः ।

ॐ मुसलिने नमः । ८२०

ॐ हलिने नमः ।

ॐ किरीटिने नमः ।

ॐ कुण्डलिने नमः ।

ॐ हारिणे नमः ।

ॐ मेखलिने नमः ।

ॐ कवचिने नमः ।

ॐ ध्वजिने नमः ।

ॐ योद्ध्रे नमः ।

ॐ जेत्रे नमः ।

ॐ महावीर्याय नमः ।

ॐ शत्रुघ्नाय नमः ।

ॐ शत्रुतापनाय नमः ।

ॐ शास्त्रे नमः ।

ॐ शास्त्रकराय नमः ।

ॐ शास्त्राय नमः ।

ॐ शङ्कराय नमः ।

ॐ शङ्करस्तुताय नमः ।

ॐ सारथिने नमः ।

ॐ सात्त्विकाय नमः ।

ॐ स्वामिने नमः । ८४०

ॐ सामवेदप्रियाय नमः ।

ॐ समाय नमः ।

ॐ पवनाय नमः ।

ॐ सम्हिताय नमः ।

ॐ शक्तये नमः ।

ॐ सम्पूर्णाङ्गाय नमः ।

ॐ समृद्धिमते नमः ।

ॐ स्वर्गदाय नमः ।

ॐ कामदाय नमः ।

ॐ श्रीदाय नमः ।

ॐ कीर्तिदाय नमः ।

ॐ कीर्तिदायकाय नमः ।

ॐ मोक्षदाय नमः ।

ॐ पुण्डरीकाक्षाय नमः ।

ॐ क्षीराब्धिकृतकेतनाय नमः ।

ॐ सर्वात्मने नमः ।

ॐ सर्वलोकेशाय नमः ।

ॐ प्रेरकाय नमः ।

ॐ पापनाशनाय नमः ।

ॐ वैकुण्ठाय नमः । ८६०

ॐ पुण्डरीकाक्षाय नमः ।

ॐ सर्वदेवनमस्कृताय नमः ।

ॐ सर्वव्यापिने नमः ।

ॐ जगन्नाथाय नमः ।

ॐ सर्वलोकमहेश्वराय नमः ।

ॐ सर्गस्थित्यन्तकृते नमः ।

ॐ देवाय नमः ।

ॐ सर्वलोकसुखावहाय नमः ।

ॐ अक्षयाय नमः ।

ॐ शाश्वताय नमः ।

ॐ अनन्ताय नमः ।

ॐ क्षयवृद्धिविवर्जिताय नमः ।

ॐ निर्लेपाय नमः ।

ॐ निर्गुणाय नमः ।

ॐ सूक्ष्माय नमः ।

ॐ निर्विकाराय नमः ।

ॐ निरञ्जनाय नमः ।

ॐ सर्वोपाधिविनिर्मुक्ताय नमः ।

ॐ सत्तामात्रव्यवस्थिताय नमः ।

ॐ अधिकारिणे नमः । ८८०

ॐ विभवे नमः ।

ॐ नित्याय नमः ।

ॐ परमात्मने नमः ।

ॐ सनातनाय नमः ।

ॐ अचलाय नमः ।

ॐ निश्चलाय नमः ।

ॐ व्यापिने नमः ।

ॐ नित्यतृप्ताय नमः ।

ॐ निराश्रयाय नमः ।

ॐ श्यामिने नमः ।

ॐ यूने नमः ।

ॐ लोहिताक्षाय नमः ।

ॐ दीप्त्या शोभितभाषणाय नमः ।

ॐ आजानुबाहवे नमः ।

ॐ सुमुखाय नमः ।

ॐ सिम्हस्कन्धाय नमः ।

ॐ महाभुजाय नमः ।

ॐ सत्त्ववते नमः ।

ॐ गुणसम्पन्नाय नमः ।

ॐ स्वतेजसा दीप्यमानाय नमः । ९००

ॐ कालात्मने नमः ।

ॐ भगवते नमः ।

ॐ कालाय नमः ।

ॐ कालचक्रप्रवर्तकाय नमः ।

ॐ नारायणाय नमः ।

ॐ परञ्ज्योतिषे नमः ।

ॐ परमात्मने नमः ।

ॐ सनातनाय नमः ।

ॐ विश्वकृते नमः ।

ॐ विश्वभोक्त्रे नमः ।

ॐ विश्वगोप्त्रे नमः ।

ॐ शाश्वताय नमः ।

ॐ विश्वेश्वराय नमः ।

ॐ विश्वमूर्तये नमः ।

ॐ विश्वात्मने नमः ।

ॐ विश्वभावनाय नमः ।

ॐ सर्वभूतसुहृदे नमः ।

ॐ शान्ताय नमः ।

ॐ सर्वभूतानुकम्पनाय नमः ।

ॐ सर्वेश्वराय नमः । ९२०

ॐ सर्वशर्वाय नमः ।

ॐ सर्वदाऽऽश्रितवत्सलाय नमः ।

ॐ सर्वगाय नमः ।

ॐ सर्वभूतेशाय नमः ।

ॐ सर्वभूताशयस्थिताय नमः ।

ॐ अभ्यन्तरस्थाय नमः ।

ॐ तमसश्छेत्त्रे नमः ।

ॐ नारायणाय नमः ।

ॐ पराय नमः ।

ॐ अनादिनिधनाय नमः ।

ॐ स्रष्ट्रे नमः ।

ॐ प्रजापतिपतये नमः ।

ॐ हरये नमः ।

ॐ नरसिम्हाय नमः ।

ॐ हृषीकेशाय नमः ।

ॐ सर्वात्मने नमः ।

ॐ सर्वदृशे नमः ।

ॐ वशिने नमः ।

ॐ जगतस्तस्थुषाय नमः ।

ॐ प्रभवे नमः । ९४०

ॐ नेत्रे नमः ।

ॐ सनातनाय नमः ।

ॐ कर्त्रे नमः ।

ॐ धात्रे नमः ।

ॐ विधात्रे नमः ।

ॐ सर्वेषां पतये नमः ।

ॐ ईश्वराय नमः ।

ॐ सहस्रमूर्ध्ने नमः ।

ॐ विश्वात्मने नमः ।

ॐ विष्णवे नमः ।

ॐ विश्वदृशे नमः ।

ॐ अव्ययाय नमः ।

ॐ पुराणपुरुषाय नमः ।

ॐ श्रेष्ठाय नमः ।

ॐ सहस्राक्षाय नमः ।

ॐ सहस्रपादाय नमः ।

ॐ तत्त्वाय नमः ।

ॐ नारायणाय नमः ।

ॐ विष्णवे नमः ।

ॐ वासुदेवाय नमः । ९६०

ॐ सनातनाय नमः ।

ॐ परमात्मने नमः ।

ॐ परम्ब्रह्मणे नमः ।

ॐ सच्चिदानन्दविग्रहाय नमः ।

ॐ परञ्ज्योतिषे नमः ।

ॐ परन्धाम्ने नमः ।

ॐ पराकाशाय नमः ।

ॐ परात्पराय नमः ।

ॐ अच्युताय नमः ।

ॐ पुरुषाय नमः ।

ॐ कृष्णाय नमः ।

ॐ शाश्वताय नमः ।

ॐ शिवाय नमः ।

ॐ ईश्वराय नमः ।

ॐ नित्याय नमः ।

ॐ सर्वगताय नमः ।

ॐ स्थाणवे नमः ।

ॐ रुद्राय नमः ।

ॐ साक्षिणे नमः ।

ॐ प्रजापतये नमः । ९८०

ॐ हिरण्यगर्भाय नमः ।

ॐ सवित्रे नमः ।

ॐ लोककृते नमः ।

ॐ लोकभुजे नमः ।

ॐ विभवे नमः ।

ॐ ॐङ्कारवाच्याय नमः ।

ॐ भगवते नमः ।

ॐ श्रीभूलीलापतये नमः ।

ॐ प्रभवे नमः ।

ॐ सर्वलोकेश्वराय नमः ।

ॐ श्रीमते नमः ।

ॐ सर्वज्ञाय नमः ।

ॐ सर्वतोमुखाय नमः ।

ॐ सुशीलाय नमः ।

ॐ स्वामिने नमः ।

ॐ सुलभाय नमः ।

ॐ सर्वगाय नमः ।

ॐ सर्वशक्तिमते नमः ।

ॐ नित्याय नमः ।

ॐ सम्पूर्णकामाय नमः । १०००

ॐ नैसर्गिकसुहृदे नमः ।

ॐ सुखिने नमः ।

ॐ कृपापीयूषजलधये नमः ।

ॐ शरण्याय नमः ।

ॐ सर्वशक्तिमते नमः ।

ॐ श्रीमन्नारायणाय नमः ।

ॐ स्वामिने नमः ।

ॐ जगतां प्रभवे नमः ।

ॐ ईश्वराय नमः ।

ॐ मत्स्याय नमः ।

ॐ कूर्माय नमः ।

ॐ वराहाय नमः ।

ॐ नारसिम्हाय नमः ।

ॐ वामनाय नमः ।

ॐ रामाय नमः ।

ॐ रामाय नमः ।

ॐ कृष्णाय नमः ।

ॐ बौद्धाय नमः ।

ॐ कल्किने नमः ।

ॐ परात्पराय नमः । १०२०

ॐ अयोध्येशाय नमः ।

ॐ नृपश्रेष्ठाय नमः ।

ॐ कुशबालाय नमः ।

ॐ परन्तपाय नमः ।

ॐ लवबालाय नमः ।

ॐ कञ्जनेत्राय नमः ।

ॐ कञ्जाङ्घ्रये नमः ।

ॐ पङ्कजाननाय नमः ।

ॐ सीताकान्ताय नमः ।

ॐ सौम्यरूपाय नमः ।

ॐ शिशुजीवनतत्पराय नमः ।

ॐ सेतुकृते नमः ।

ॐ चित्रकूटस्थाय नमः ।

ॐ शबरीसंस्तुताय नमः ।

ॐ प्रभवे नमः ।

ॐ योगिध्येयाय नमः ।

ॐ शिवध्येयाय नमः ।

ॐ रावणदर्पहने नमः ।

ॐ शास्त्रे नमः ।

ॐ श्रीशाय नमः । १०४०

ॐ भूतानां शरण्याय नमः ।

ॐ संश्रिताभीष्टदायकाय नमः ।

ॐ अनन्ताय नमः ।

ॐ श्रीपतये नमः ।

ॐ रामाय नमः ।

ॐ गुणभृते नमः ।

ॐ निर्गुणाय नमः ।

ॐ महते नमः । १०४८

इति श्रीशतकोटिरामचरितान्तर्गते श्रीमदानन्दरामायणे वाल्मीकीये राज्यकाण्डे पूर्वार्धे श्रीरामसहस्रनामकथनं नाम प्रथमः सर्गान्तर्गतात् श्रीरामसहस्रनामस्तोत्रात् उद्धृता श्रीरामसहस्रनामावलिः समाप्ता ॥



# श्रीरामसुप्रभातम्

श्रीराम कोसलसुताजठरामृताब्धि-

पीयूषभा दशरथाङ्कविभूषणग्रथ ।

साकेतवासिजननेत्रसुधाञ्जनश्रीः ।

स्वामिन्कृपाजलनिधे तव सुप्रभातम् ॥ १॥

श्रीराम कौशिकमखावन सुन्दपत्नी -

प्राणाशुगाहिवर बालमनुष्यरूप ।

मारीचमत्तगजसिंह सुबाहुशैल-

वज्राभसायकवतस्तव सुप्रभातम् ॥ २॥

श्रीराम शङ्करशरासवरेक्षुदण्ड-

मत्तेभ मैथिलसुताननपद्मभृङ्ग ।

श्रीजामदग्न्यमदनाममहान्धकार-

सूर्याभ वीर्यजलधे तव सुप्रभातम् ॥ ३॥

श्रीराम तातवचसोज्झितयौवराज्य

श्रीमत्सुमन्त्रपरिदर्शितदिव्यरूप ।

आलिङ्गनेन दृढितातिनिषादसख्य

श्रीचित्रकूटगृहिणस्तव सुप्रभातम् ॥ ४॥


श्रीराम दण्डकवनागमनानसूया-

दत्ताङ्गरागलसितावनिजासहाय ।

हत्वा विराधमनुदृष्टमुनीन्द्रसङ्घ

सम्पूज्यमानगृहिणस्तव सुप्रभातम् ॥ ५॥

इति श्रीरामसुप्रभातं सम्पूर्णम् ।




वैकुण्ठलोकमें पार्षदोंसहित श्रीलक्ष्मी-नारायण

# इन्द्रकृतं रामस्तोत्रम्

**इन्द्र उवाच**

**भजेऽहं सदा राममिन्दीवराभं भवारण्यदावानलाभाभिधानम् ।**

**भवानीहृदा भावितानन्दरूपं भवाभावहेतुं भवादिप्रपन्नम् ॥ १॥**

**सुरानीकदुःखौघनाशैकहेतुं नराकारदेहं निराकारमीड्यम् ।**

**परेशं परानन्दरूपं वरेण्यं हरिं राममीशं भजे भारनाशम् ॥ २॥**

**प्रपन्नाखिलानन्ददोहं प्रपन्नं प्रपन्नार्तिनिःशेषनाशाभिधानम् ।**

**तपोयोगयोगीशभावाभिभाव्यं कपीशादिमित्रं भजे राममित्रम्॥ ३**

**सदा भोगभाजां सुदूरे विभान्तं सदा योगभाजामदूरे विभान्तम् ।**

**चिदानन्दकन्दं सदा राघवेशं विदेहात्मजानन्दरूपं प्रपद्ये ॥ ४॥**

**महायोगमायाविशेषानुयुक्तो विभासीश लीलानराकारवृत्तिः ।**

**त्वदानन्दलीलाकथापूर्णकर्णाः सदानन्दरूपा भवन्तीह लोके॥ ५॥**

**अहं मानपानाभिमत्तप्रमत्तो न वेदाखिलेशाभिमानाभिमानः ।**

**इदानीं भवत्पादपद्मप्रसादात्त्रिलोकाधिपत्याभिमानो विनष्टः॥६**

**स्फुरद्रत्नकेयूरहाराभिरामं धराभारभूतासुरानीकदावम् ।**

**शरच्चन्द्रवक्त्रं लसत्पद्मनेत्रं दुरावारपारं भजे राघवेशम् ॥ ७॥**

**सुराधीशनीलाभ्रनीलाङ्गकान्तिं विराधादिरक्षोवधाल्लोकशान्तिम्**

किरीटादिशोभं पुरारातिलाभं भजे रामचन्द्रं रघूणामधीशम् ॥ ८॥

लसच्चन्द्रकोटिप्रकाशादिपीठे समासीनमङ्के समाधाय सीताम् ।

स्फुरद्धेमवर्णां तडित्पुञ्जभासां भजे रामचन्द्रं निवृत्तार्तितन्द्रम्॥

॥ इति श्रीमदध्यात्मरामायणे युद्धकाण्डे त्रयोदशसर्गे

इन्द्रकृतश्रीरामस्तोत्रं सम्पूर्णम् ॥



# श्रीरामस्तोत्रं

## श्रीमहादेवकृतम्

श्रीमहादेव उवाचः ।

नमोऽस्तु रामाय सशक्तिकाय नीलोत्पलश्यामलकोमलाय ।

किरीटहाराङ्गदभूषणाय सिंहासनस्थाय महाप्रभाय ॥ १॥

त्वमादिमध्यान्तविहीन एकः सृजस्यवस्यत्सि च लोकजातम् ।

स्वमायया तेन न लिप्यसे त्वं यत्स्वे मुखेऽजस्ररतोऽनवद्यः॥ २

लीलां विधत्से गुणसंवृतस्त्वं प्रपन्नभक्तानुविधानहेतोः ।

नानावतारैः सुरमानुषाद्यैः प्रतीयसे ज्ञानिभिरेव नित्यम् ॥ ३॥

स्वांशेन लोकं सकलं विधाय तं बिभर्षि च त्वं तदधः फणीश्वरः

उपर्यधो भान्वनिलोडुपौषधीप्रवर्षरूपोऽवसि नैकधा जगत् ॥ ४॥

त्वमिह देहभृतां शिखिरूपः पचसि भक्तमशेषमजस्रम् ।

पवनमञ्चकरूपसहायो जगदखण्डमनेन बिभर्षि ॥ ५॥

चन्द्रसूर्यशिखिमध्यगतं यत्तेज ईश चिदशेषतनूनाम् ।

प्राभवत्तनुभृतामिह धैर्यं शौर्यमात्रमखिलं तव सत्त्वम् ॥ ६॥

त्वं विरिञ्चिशिवविष्णुविभेदात् कालकर्मशशिसूर्यविभागात् ।

वादिनां पृथगिवेश बिभासि ब्रह्म निश्चितमनन्यदिहैकम् ॥ ७॥

मत्स्यादिरूपेण यथा त्वमेकः श्रुतो पुराणेषु च लोकसिद्धः ।

तथैव सर्वं सदयद्विभागस्त्वमेव नान्यद्भवतो विभाति ॥ ८॥

यद्यत्समुत्पन्नमनन्तसृष्टावुत्पत्स्यते यच्च भवच्च यच्च ।

न दृश्यते स्थावरजङ्गमादौ त्वया विनाऽतः परतः परस्त्वम्॥ ९

तत्त्वं न जानन्ति परात्मनस्ते जनः समस्तास्तव माययाऽतः ।

त्वद्भक्तसेवामलमानसानां विभाति तत्त्वं परमेकमैशम् ॥ १०॥

ब्रह्मादयस्ते न विदुः स्वरूपं चिदात्मतत्वं बहिरर्थभावाः ।

ततो बुधस्त्वामिदमेव रूपं भक्त्या भजन्मुक्तिमुपैत्यदुःखः॥११॥

अहं भवन्नामगुणैः कृतार्थो वसामि काश्यामनिशं भवान्या ।

मुमूर्षमाणस्य विमुक्तयेऽहं दिशामि मन्त्रं तव रामनाम ॥ १२॥

इमं स्तवं नित्यमनन्यभक्त्या शृण्वन्ति गायन्ति लिखन्ति येवै

ते सर्वसौख्यं परमं च लब्धा भवत्पदं यान्तु भवत्प्रसादात् ॥

इति श्रीमदध्यात्मरामायणे श्रीमहादेवकृतं रामस्तोत्रं सम्पूर्णम्



# श्रीरामहृदयम्

श्री महादेव उवाच ।

ततो रामः स्वयं प्राह हनुमन्तमुपस्थितम् ।

शृणु यत्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मनाम् ॥ १॥

आकाशस्य यथा भेदस्त्रिविधो दृश्यते महान् ।

जलाशये महाकाशस्तदवच्छिन्न एव हि ।

प्रतिबिम्बाख्यमपरं दृश्यते त्रिविधं नभः ॥ २॥

बुद्ध्यवच्छिन्नचैतन्यमेकं पूर्णमथापरम् ।

आभासस्त्वपरं बिम्बभूतमेवं त्रिधा चितिः ॥ ३॥

साभासबुद्धेः कर्तृत्वमविच्छिन्नेऽविकारिणि ।

साक्षिण्यारोप्यते भ्रान्त्या जीवत्वं च तथाऽबुधैः ॥ ४॥

आभासस्तु मृषाबुद्धिरविद्याकार्यमुच्यते ।

अविच्छिन्नं तु तद्ब्रह्म विच्छेदस्तु विकल्पितः ॥ ५॥

अविच्छिन्नस्य पूर्णेन एकत्वं प्रतिपद्यते ।

तत्त्वमस्यादिवाक्यैश्च साभासस्याहमस्तथा ॥ ६॥

ऐक्यज्ञानं यदोत्पन्नं महावाक्येन चात्मनोः ।

तदाऽविद्या स्वकार्यैश्च नश्यत्येव न संशयः ॥ ७॥

एतद्विज्ञाय मद्भक्तो मद्भावायोपपद्यते

मद्भक्तिविमुखानां हि शास्त्रगर्तेषु मुह्यताम् ।

न ज्ञानं न च मोक्षः स्यात्तेषां जन्मशतैरपि ॥ ८॥

इदं रहस्यं हृदयं ममात्मनो मयैव साक्षात्कथितं तवानघ ।

मद्भक्तिहीनायशठाय नत्वया दातव्यमैन्द्रादपि राज्यतोऽधिकम्

॥ श्रीमदध्यात्मरामायणे बालकाण्डे श्रीरामहृदयं सम्पूर्णम् ॥



# श्रीमद्रामायणपठनोपक्रमोपसंहारक्रमः

श्रीमते रामानुजाय नमः ॥ श्रीमते निगमान्तमहादेशिकायनमः॥

वैष्णवानांश्रीमद्रामायणपठनोपक्रमे अनुसन्धेयाः ध्यानश्लोकाः ॥

रामानुज दयापात्रं ज्ञानवैराग्य भूषणम् ।

श्रीमद्वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम् ॥ १॥

लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम् ।

अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥ २॥

यो नित्यमच्युतपदाम्बुजयुग्मरुक्म

व्यामोहतस्तदितराणि तृणायमेने ।

अस्मद्गुरोर्भगवतोस्य दयैकसिन्धोः

रामानुजस्य चरणौ शरणं प्रपद्ये ॥ ३॥

माता पिता युवतयस्तनया विभूतिः

सर्वं यदेव नियमेन मदन्वयानाम् ।

आद्यस्य नः कुलपतेर्वकुळाभिरामं

श्रीमत् तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना ॥ ४॥

भूतं सरश्च महदाह्वय भट्टनाथ

श्रीभक्तिसार कुलशेखर योगिवाहान् ।

भक्ताङ्घ्रिरेणु परकाल यतीन्द्र मिश्रान्

श्रीमत् पराङ्कुशमुनिं प्रणतोस्मिनित्यम् ॥ ५॥

पितामहस्यापि पितामहाय

प्राचेतसादेश फलप्रदाय ।

श्रीभाष्यकारोत्तम देशिकाय

श्रीशैल पूर्णाय नमो नमस्ते ॥ ६॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।

प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ ७॥

यस्य द्विरदवक्त्राद्याः पारिषद्याः परः शतम् ।

विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥ ८॥

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।

आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥ ९॥

कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।

आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ १०॥

वाल्मीकेर्मुनिसिंहस्य कवितावनचारिणः ।

शृण्वन् रामकथानादं को न याति परां गतिम् ॥ ११॥

यः पिबन् सततं रामचरितामृतसागरम् ।

अतृप्तस्तं मुनिं वन्दे प्राचेतसमकल्मषम् ॥ १२॥

गोष्पदीकृतवाराशिं मशकीकृतराक्षसम् ।

रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥ १३॥

(हनुमान् अञ्जनासूनुः वायुपुत्रो महाबलः ।

रामेष्टः फल्गुनसखः पिङ्गाक्षोऽमितविक्रमः ॥

उदधिक्रमनश् चैव सीताशोक विनाशकः

लक्ष्मण प्रानदाताश्च दशग्रीवस्य दर्पहा ॥)

अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।

कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥ १४॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।

वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि ॥ १५॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं

यः शोकवह्निं जनकात्मजायाः ।

आदाय तेनैव ददाह लङ्कां

नमामि तं प्राञ्जलिराञ्जनेयम् ॥ १६॥

आञ्जनेयमतिपाटलाननं काञ्चनाद्रिकमनीयविग्रहम् ।

पारिजाततरुमूलवासिनं भावयामि पवमाननन्दनम् ॥ १७॥

यत्र यत्र रघुनाथ कीर्तनं तत्र तत्र कृतमस्तकाञ्जलिम् ।

बाष्पवारिपरिपूर्णलोचनं मारुतिं नमत राक्षसान्तकम् ॥ १८॥

वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।

वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना ॥ १९॥

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।

एकैकमक्षरं प्रोक्तं महापातकनाशनम् ॥ २०॥

शृण्वन् रामायणं भक्त्या यः पादं पदमेव वा ।

स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा ॥ २१॥

वाल्मीकि गिरि सम्भूता रामसागरगामिनी ।

पुनातु भुवनं पुण्या रामायण महानदी ॥ २२॥

श्लोकसारसमाकीर्णं सर्गकल्लोलसंकुलम् ।

काण्डग्राहमहामीनं वन्दे रामायणार्णवम् ॥ २३॥

यः कर्णाञ्जलि सम्पुटैरहरहः सम्यक् पिबत्यादरात्

वाल्मीकेर्वदनारविन्दगलितं रामायणाख्यं मधु ।

जन्मव्याधिजराविपत्तिमरणैरत्यन्तसोपद्रवं

संसारं स विहाय गच्छति पुमान् विष्णोः पदं शाश्वतम् ॥ २४॥

तदुपगतसमाससन्धियोगं सममधुरोपनतार्थवाक्यबद्घम् ।

रघुवरचरितं मुनिप्रणीतं दशशिरसश्च वधं निशामयध्वम्॥२५॥

श्रीराघवं दशरथात्मजमप्रमेयं

सीतापतिं रघुकुलान्वयरत्नदीपम् ।

आजानुबाहुमरविन्ददलायताक्षं

रामं निशाचरविनाशकरं नमामि ॥ २६॥

वैदेही सहितं सुरद्रुमतले हैमे महामण्डपे

मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम् ।

अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं

व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम्॥२७॥

वामे भूमिसुता पुरश्च हनुमान् पश्चात् सुमित्रासुतः

शत्रुघ्नो भरतश्च पार्श्वदलयोः वाय्वादिकोणेषु च ।

सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बवान्

मध्ये नील सरोज कोमळरुचिं रामं भजे श्यामळम् ॥

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।

लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ २८॥

धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि ।

पौरुषेचाऽप्रतिद्वन्द्वः शरैनं जहि रावणिम् ॥ २९॥

तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।

नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥ ३०॥

॥ श्रीरघुनन्दन परब्रह्मणे नमः ॥

॥इतिश्रीमद्रामायणपठनोपक्रमे अनुसन्धेयाः श्लोकाः समाप्ताः ॥



# श्रीमद्रामायणपारायणसमापनक्रमः

॥श्रीमद्रामायण पारायणसमापने अनुसन्धेयाः मङ्गलश्लोकाः ॥

एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः ।

प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ॥ १॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराभवः ।

येषामिन्दीवरश्यामो हृदये सुप्रतिष्ठितः ॥ २॥

काले वर्षतु पर्जन्यः पृथिवी सस्यशालिनी ।

देशोऽयं क्षोभरहितो ब्राह्मणाः सन्तु निर्भयाः ॥ ३॥

कावेरीवर्धतां काले काले वर्षतु वासवः ।

श्रीरङ्गनाथो जयतु श्रीरङ्गश्रीश्च वर्धताम् ॥ ४॥

स्वस्ति प्रजाभ्यः परिपालयन्तां

न्याय्येन मार्गेण महीं महीशाः ।

गोब्राह्मणेभ्यः शुभमस्तु नित्यं

लोकाः समस्ताः सुखिनो भवन्तु ॥ ५॥

मङ्गलं कोसलेन्द्राय महनीयगुणाब्धये ।

चक्रवर्तितनूजाय सार्वभौमाय मङ्गलम् ॥ ६॥

वेदवेदान्तवेद्याय मेघश्याममलमूर्तये ।

पुंसां मोहनरूपाय पुण्यश्लोकाय मङ्गलम् ॥ ७॥

विश्वामित्रान्तरङ्गाय मिथिलानगरीपतेः ।

भाग्यानां परिपाकाय भव्यरूपाय मङ्गलम् ॥ ८॥

पितृभक्ताय सततं भ्रातृभिः सह सीतया ।

नन्दिताखिललोकाय रामभद्राय मङ्गलम् ॥ १०॥

त्यक्तसाकेतवासाय चित्रकूटविहारिणे ।

सेव्याय सर्वयमिनां धीरोदाराय मङ्गलम् ॥ १०॥

सौमित्रिणा च जानक्या चापबाणासिधारिणे ।

संसेव्याय सदा भक्त्या स्वामिने मम मङ्गलम् ॥ ११॥

दण्डकारण्यवासाय खण्डितामरशत्रवे ।

गृध्रराजाय भक्ताय मुक्तिदायास्तु मङ्गलम् ॥ १२॥

सादरं शबरीदत्तफलमूलाभिलाषिणे ।

सौलभ्यपरिपूर्णाय सत्त्वोद्रिक्ताय मङ्गलम् ॥ १३॥

हनुमत्समवेताय हरीशाभीष्टदायिने ।

वालिप्रमथनायास्तु महाधीराय मङ्गलम् ॥ १४॥

श्रीमते रघुवीराय सेतूल्लङ्घितसिन्धवे ।

जितराक्षसराजाय रणधीराय मङ्गलम् ॥ १५॥

आसाद्य नगरीं दिव्यां अभिषिक्ताय सीतया ।

राजाधिराजराजाय रामभद्राय मङ्गलम् ॥ १६॥

(विभीषणकृते प्रीत्या लङ्काभीष्ट प्रदायिने ।

सर्वलोक शरण्याय श्रीराघवाय मङ्गळम् ॥

भ्रह्मादि देवसेव्याय भ्रह्मण्याय महात्मने ।

जानकी प्राणनाथाय रघुनाथाय मङ्गळम् ॥)

मङ्गलाशासनपरैः मदाचार्यपुरोगमैः ।

सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम् ॥ १७॥

कायेन वाचा मनसेन्द्रियैर्वा

बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात् ।

करोमि यद्यत् सकलं परस्मै

नारायणायेति समर्पयामि ॥ १८॥

॥ इति श्रीमद्रामायण पारायण समापने

अनुसन्धेयाः श्लोकाः समाप्ताः ॥



# श्रीरामाष्टकम् ४

श्रीराम राम रघुनन्दन राम राम

श्रीराम राम भरताग्रज राम राम ।

श्रीराम राम रणकर्कश राम राम

श्रीराम राम शरणं भव राम राम ॥ १॥

श्रीराम राम दिविजेश्वर राम राम

श्रीराम राम मनुजेश्वर राम राम ।

श्रीराम राम जगदीश्वर राम राम

श्रीराम राम शरणं भव राम राम ॥ २॥

श्रीराम राम विबुधाश्रय राम राम

श्रीराम राम जगदाश्रय राम राम ।

श्रीराम राम कमलाश्रय राम राम

श्रीराम राम शरणं भव राम राम ॥ ३॥

श्रीराम राम गुणसागर राम राम

श्रीराम राम गुणभूषण राम राम ।

श्रीराम राम गुणभाजन राम राम

श्रीराम राम शरणं भव राम राम ॥ ४॥

**श्रीराम राम शुभमङ्गल राम राम**

**श्रीराम राम शुभलक्षण राम राम ।**

**श्रीराम राम शुभदायक राम राम**

**श्रीराम राम शरणं भव राम राम ॥ ५॥**

**श्रीराम राम स्वजनप्रिय राम राम**

**श्रीराम राम सुमुनिप्रिय राम राम ।**

**श्रीराम राम सुकविप्रिय राम राम**

**श्रीराम राम शरणं भव राम राम ॥ ६॥**

**श्रीराम राम कमलाकर राम राम**

**श्रीराम राम कमलेक्षण राम राम ।**

**श्रीराम राम कमलाप्रिय राम राम**

**श्रीराम राम शरणं भव राम राम ॥ ७॥**

**श्रीराम राम दनुजान्तक राम राम**

**श्रीराम राम दुरितान्तक राम राम ।**

**श्रीराम राम नरकान्तक राम राम**

**श्रीराम राम शरणं भव राम राम ॥ ८॥**

श्रीरामचन्द्रः स पुनातु नित्यं यन्नाममध्येन्द्रमणिं विधाय ।

श्रीचन्द्रमुक्ताफलयोरुमायाश्चकार कण्ठाभरणं गिरीशः ॥ ९॥

श्रीरामचन्द्रचरणौ मनसा स्मरामि

श्रीरामचन्द्रचरणौ वचसा गृणामि ।

श्रीरामचन्द्रचरणौ शिरसा नमामि

श्रीरामचन्द्रचरणौ शरणं प्रपद्ये ॥ १०॥

रामाष्टकमिदं पुण्यं प्रातःकाले तु यः पठेत् ।

मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥

इति श्रीरामाष्टकं सम्पूर्णम् ॥



# रामाष्टकम्

भजे विशेषसुन्दरं समस्तपापखण्डनम् ।

स्वभक्तचित्तरञ्जनं सदैव राममद्वयम् ॥ १॥

जटाकलापशोभितं समस्तपापनाशकम् ।

स्वभक्तभीतिभङ्जनं भजेह राममद्वयम् ॥ २॥

निजस्वरूपबोधकं कृपाकरं भवापहम् ।

समं शिवं निरञ्जनं भजेह राममद्वयम् ॥ ३॥

सहप्रपञ्चकल्पितं ह्यनामरूपवास्तवम् ।

निराकृतिं निरामयं भजेह राममद्वयम् ॥ ४॥

निष्प्रपञ्चनिर्विकल्पनिर्मलं निरामयम्।

चिदेकरूपसन्ततं भजेह राममद्वयम् ॥ ५॥

भवाब्धिपोतरूपकं ह्यशेषदेहकल्पितम् ।

गुणाकरं कृपाकरं भजेह राममद्वयम् ॥ ६॥

महावाक्यबोधकैर्विराजमनवाक्पदैः ।

परब्रह्म व्यापकं भजेह राममद्वयम् ॥ ७॥

शिवप्रदं सुखप्रदं भवच्छिदं भ्रमापहम् ।

विराजमानदैशिकं भजेह राममद्वयम् ॥ ८॥

रामाष्टकं पठति यः सुकरं सुपुण्यं

व्यासेन भाषितमिदं शृणुते मनुष्यः ।

विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिं

सम्प्राप्य देहविलये लभते च मोक्षम् ॥ ९॥

॥ इति श्रीव्यासविरचितं रामाष्टकं सम्पूर्णम् ॥



# श्रीरामाष्टोत्तरशतनामस्तोत्रम्

ध्यानम् -

श्रीराघवं दशरथात्मजमप्रमेयं

सीतापतिं रघुकुलान्वयरत्नदीपम् ।

आजानुबाहुमरविन्ददलायताक्षं

रामं निशाचरविनाशकरं नमामि ॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे

मध्ये पुष्पकमासने मणिमये वीरासने सुस्थितम् ।

अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं

व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

ॐ श्रीरामो रामभद्रश्च रामचन्द्रश्च शाश्वतः ।

राजीवलोचनः श्रीमान् राजेन्द्रो रघुपुङ्गवः ॥ १॥

जानकीवल्लभो जैत्रो जितामित्रो जनार्दनः ।

विश्वामित्रप्रियो दान्तः शत्रुजिच्छत्रुतापनः ॥ २॥

वालिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः ।

सत्यव्रतो व्रतधरः सदा हनुमदाश्रितः ॥ ३॥

कौसलेयः खरध्वंसी विराधवधपण्डितः ।

विभीषणपरित्राता हरकोदण्डखण्डनः ॥ ४॥

सप्ततालप्रभेत्ता च दशग्रीवशिरोहरः ।

जामदग्न्यमहादर्पदलनस्ताटकान्तकः ॥ ५॥

वेदान्तसारो वेदात्मा भवरोगस्य भेषजम् ।

दूषणत्रिशिरो हन्ता त्रिमूर्तिस्त्रिगुणात्मकः ॥ ६॥

त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्रकीर्तनः ।

त्रिलोकरक्षको धन्वी दण्डकारण्यपावनः ॥ ७॥

अहल्याशापशमनः पितृभक्तो वरप्रदः ।

जितेन्द्रियो जितक्रोधो जितामित्रो जगद्गुरुः ॥ ८॥

ऋक्षवानरसंघाती चित्रकूटसमाश्रयः ।

जयन्तत्राणवरदः सुमित्रापुत्रसेवितः ॥ ९॥

सर्वदेवादिदेवश्च मृतवानरजीवनः ।

मायामारीचहन्ता च महादेवो महाभुजः ॥ १०॥

सर्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसंस्तुतः ।

महायोगी महोदारः सुग्रीवेप्सितराज्यदः ॥ ११॥

सर्वपुण्याधिकफलः स्मृतसर्वाघनाशनः ।

आदिदेवो महादेवो महापूरुष एव च ॥ १२॥

पुण्योदयो दयासारः पुराणपुरुषोत्तमः ।

स्मितवक्त्रो मिताभाषी पूर्वभाषी च राघवः ॥ १३॥

अनन्तगुणगम्भीरो धीरोदात्तगुणोत्तमः ।

मायामानुषचारित्रो महादेवादिपूजितः ॥ १४॥

सेतुकृज्जितवारीशः सर्वतीर्थमयो हरिः ।

श्यामाङ्गः सुन्दरः शूरः पीतवासा धनुर्धरः ॥ १५॥

सर्वयज्ञाधिपो यज्वा जरामरणवर्जितः ।

शिवलिङ्गप्रतिष्ठाता सर्वावगुणवर्जितः ॥ १६॥

परमात्मा परं ब्रह्म सच्चिदानन्दविग्रहः ।

परं ज्योतिः परंधाम पराकाशः परात्परः ॥ १७॥

परेशः पारगः पारः सर्वदेवात्मकः परः ॥

॥ इति श्रीरामाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥



# रामाष्टोत्तरशतनामावली

## त्यागराजविरचिता

अथ राघवाष्टोत्तरशतनामावलिः ।

ॐ जगदानन्दकारकाय नमः ।

ॐ जयाय नमः ।

ॐ जानकी-प्राणनायकाय नमः ।

ॐ गगनाधिपसत्कुलजाय नमः ।

ॐ राजराजेश्वराय नमः ।

ॐ सुगुणाकराय नमः ।

ॐ सुरसेव्याय नमः ।

ॐ भव्यदायकाय नमः ।

ॐ सदा सकलजगदानन्दकारकाय नमः ।

ॐ जयाय नमः । - १०

ॐ जानकी-प्राणनायकाय नमः ।

ॐ अमरतारकनिचयकुमुदहिताय नमः ।

ॐ परिपूर्णाय नमः ।

ॐ अनघाय नमः ।

ॐ सुरासुरभूजाय नमः ।

ॐ दधि पयोधिवास हरणाय नमः ।

ॐ सुन्दरतरवदनाय नमः ।

ॐ सुधामयवचो बृन्दाय नमः ।

ॐ गोविन्दाय नमः ।

ॐ सानन्दाय नमः । - २०

ॐ मावराय नमः ।

ॐ अजराय नमः ।

ॐ आपशुभकराय नमः ।

ॐ अऽख्केकजगदानन्दकारकाय नमः ।

ॐ जयाय नमः ।

ॐ जानकीप्राणनायकाय नमः ।

ॐ निगम नीरजामृतज पोषकाय नमः ।

ॐ अनिमिषवैरिवारिदसमीरणाय नमः ।

ॐ खगतुरङ्गाय नमः ।

ॐ सत्कविहृदालयाय नमः । - ३०

ॐ अगणितवानराधिपनतांघ्रियुगाय नमः ।

ॐ जगदानन्दकारकाय नमः ।

ॐ जय जानकीप्राणनायकाय नमः ।

ॐ इन्द्रनीलमणिसन्निभपघनाय नमः ।

ॐ चन्द्रसूर्यनयनाय नमः ।

ॐ अप्रमेयाय नमः ।

ॐ वागीन्द्रजनकाय नमः ।

ॐ सकलेशाय नमः ।

ॐ शुभ्राय नमः ।

ॐ नागेन्द्रशयनाय नमः । - ४०

ॐ शमनवैरिसन्नुताय नमः ।

ॐ जगदानन्दकारकाय नमः ।

ॐ जयाय नमः ।

ॐ जानकीप्राणनायकाय नमः ।

ॐ पादविजितमौनिशापाय नमः ।

ॐ सवपरिपालाय नमः ।

ॐ वरमन्त्रग्रहणलोलाय नमः ।

ॐ परमशान्तचित्ताय नमः ।

ॐ जनकजाधिपाय नमः ।

ॐ सरोजभववरदाय नमः । - ५०

ॐ अखिलजगदानन्दकारकाय नमः ।

ॐ जयाय नमः ।

ॐ जानकीप्राणनायकाय नमः ।

ॐ सृष्टिस्थित्यन्तकारकाय नमः ।

ॐ अमित कामित फलदाय नमः ।

ॐ असमानगात्राय नमः ।

ॐ शचीपतिनुताय नमः ।

ॐ अब्धिमदहरणाय नमः ।

ॐ अनुराग राग राजित कथासार हिताय नमः ।

ॐ जगदानन्दकारकाय नमः । - ६०

ॐ जय जानकीप्राणनायकाय नमः ।

ॐ सज्जन मनसाब्धि सुधाकराय नमः ।

ॐ कुसुमविमानाय नमः ।

ॐ सुरसा-रिपु कराब्जलालित चरणाय नमः ।

ॐ अवगुणासुरगणमदहरणाय नमः ।

ॐ सनातनाय नमः ।

ॐ अजनुताय नमः ।

ॐ जगदानन्दकारकाय नमः ।

ॐ जय जानकीप्राणनायकाय नमः ।

ॐ ॐकारपञ्जरकीराय नमः । - ७०

ॐ पुरहर सरोजभव केशवादि रूपाय नमः ।

ॐ वासवरिपुजनकान्तकाय नमः ।

ॐ कलाधराय नमः ।

ॐ कलाधराप्ताय नमः ।

ॐ घृणाकराय नमः ।

ॐ शरणागत जन पालनाय नमः ।

ॐ सुमनो रमणाय नमः ।

ॐ निर्विकाराय नमः ।

ॐ निगमसारतराय नमः ।

ॐ जगदानन्दकारकाय नमः । - ८०

ॐ जय जानकी प्राणनयकाय नमः ।

ॐ करधृतशरजालाय नमः ।

ॐ असुरमदापहरणाय नमः ।

ॐ अवनीसुर सुरावनाय नमः ।

ॐ कवीन बिलजमौनि कृतचरित्र सन्नुताय नमः ।

ॐ श्रीत्यागराजनुताय नमः ।

ॐ पुराणपुरुषाय नमः ।

ॐ नृवरात्मजाय नमः ।

ॐ आश्रितपराधीनाय नमः ।

ॐ खर-विराध-रावण विरावणाय नमः । - ९०

ॐ अनघाय नमः ।

ॐ पराशरमनोहराय नमः ।

ॐ अविकृताय नमः ।

ॐ त्यागराजसन्नुताय नमः ।

ॐ जगदानन्दकारकाय नमः ।

ॐ जय जानकीप्राणानायकाय नमः ।

ॐ अगणिकगुणाय नमः ।

ॐ कनकचेलाय नमः ।

ॐ सालविदळनाय नमः ।

ॐ अरुणाभसमानचरणाय नमः । - १००

ॐ अपारमहिम्ने नमः ।

ॐ अद्भुताय नमः ।

ॐ सुकविजनहृत्सदनय नमः ।

ॐ सुरमुनिगणविहिताय नमः ।

ॐ कलशनीरनिधिजारमणाय नमः ।

ॐ पापगजनृसिंहाय नमः ।

ॐ वर त्यागराजादिनुताय नमः ।

ॐ जगदानन्दकारकाय नमः । १०८

श्रीमत्काकर्लवंशाब्धि-चन्द्रायामल तेजसे ।

पूर्णाय पुण्यशीलाय त्यागराजाय मङ्गलम् ॥

रामब्रह्म-सुपुत्राय रामनाम-सुखात्मने ।

रामचन्द्रस्वरूपाय त्यागरजय मन्गलम् ॥

श्री सीतारामचन्द्र परब्रह्मणे नमः ॥



# श्रीरामाक्षरमालास्तोत्रम्

अखिलाधारं श्रीरामं आगमविनुतं श्रीरामम् ।

इष्टरक्षणं श्रीरामं ईप्सितफलदं श्रीरामम् ॥ १॥

उग्रपूजितं श्रीरामं ऊर्जितफलदं श्रीरामम् ।

ऋषिगणवन्द्यं श्रीरामं ॠवरपक्षं श्रीरामम् ॥ २॥

ऌचयस्तोत्रं श्रीरामं ॡ(लू)ननताघं श्रीरामम् ।

एकविक्रमं श्रीरामं ऐहिकफलदं श्रीरामम् ॥ ३॥

ओन्नुतिफलदं श्रीरामं औदार्यवरं श्रीरामम् ।

अद्भुत(अम्बुद)रूपं श्रीरामं आमुष्मिकदं श्रीरामम् ॥ ४॥

कम्बुग्रीवं श्रीरामं खरसंहारं श्रीरामम् ।

गजराड्वरदं श्रीरामं धनसद्दशाङ्गं श्रीरामम् ॥ ५॥

(१)ङज्युतिकरणं श्रीरामं चटुलास्त्रधरं श्रीरामम् ।

छन्दोविनुतं श्रीरामं जलजाताक्षं श्रीरामम् ॥ ६॥

Footnote

१. इति शिवस्य नाम । तस्य ज्युतिः द्युतिः, तस्याः कारणं झषवररूपं श्रीरामं

(२)ञी(ञे)शात्मस्थं श्रीरामम् ।

(३)टीद्दश(टिट्टिभ)हस्तं श्रीरामं

(४)ठपूजाङ्घ्रिं श्रीरामम् ॥ ७॥

(५)डापतिनाशं श्रीरामं

(६)ढम्मन्त्रहरं श्रीरामम् ।

(७)णक्रोधात्मं श्रीरामं

तपनान्वयजं श्रीरामम् ॥ ८॥

(८)थपरिपालं श्रीरामं

दशरथबालं श्रीरामम् ।

धरणीलोलं श्रीरामं

नरहरिरूपं श्रीरामम् ॥ ९॥

परमपावनं श्रीरामं

फल्गुनसुहृदं श्रीरामम् ।

बलिमददलनं श्रीरामं

(९)भण्डनसुद्दशं श्रीरामम् ॥ १०॥

मन्मथजनकं श्रीरामं

यमिजनवेद्यं श्रीरामम् ।

रघुकुलतिलकं श्रीरामं

लक्ष्मीलोलं श्रीरामम् ॥ ११॥

Footnote

२. ञः इति शुक्रस्य नाम । तस्य ईशः अधिदेवता अम्बिका, तदात्मस्थम् ।

३. टिट्टिभः पक्षिविशेषः ।

४. ठः इति शिवस्य नाम ।

तस्य पूजा यस्मिन् सः ठपूजः । ठपूजः अङ्घ्रिः यस्य तम् ।

५. डा राक्षसी । तासां पतयः राक्षसाः, तेषां नाशः येन, तम् ।

६. ढः सर्पः, तस्य मन्त्रः नागास्त्रम्, तस्य हरम् ।

७. णः न क्रोधः, अक्रोधात्मानम् ।

८. यं भयम्, भयत्रातारम् ।

९. भण्डनं युद्धम्, तस्मिन् दक्षम् ।

वदनजितेन्दुं श्रीरामं

शङ्करविनुतं श्रीरामम् ।

षट्पदकान्तं श्रीरामं

सरसिजनाभं श्रीरामम् ॥ १२॥

हतदेवारिं श्रीरामं लक्ष्मणाग्रजं श्रीरामम् ।

वनजातदृशं श्रीरामं शफरसुनयनं श्रीरामम् ॥ १३॥

षड्वर्णज्ञं श्रीरामं सरसिजनयनं श्रीरामम् ।

हतदेवारिं श्रीरामं (१०)क्षरणविरहितं श्रीरामम् ॥ १४॥

Footnote

१०. क्षरणं स्वेदः, तद्रहितम् ।

इति श्रीरामाक्षरमालास्तोत्रं सम्पूर्णम् ।



# श्रीरामोदन्तम्

॥ अथ बालकाण्डः ॥

श्रीपतिं प्रणिपत्याहं श्रीवत्साङ्कितवक्षसम् ।
श्रीरामोदन्तमाख्यास्ये श्रीवाल्मीकिप्रकीर्तितम् ॥ १॥

पुरा विश्रवसः पुत्रो रावणो नाम राक्षसः ।
आसीदस्यानुजौ चास्तां कुम्भकर्णविभीषणौ ॥ २॥

ते तु तीव्रेण तपसा प्रत्यक्षीकृत्य वेधसम् ।
वव्रिरे च वरानिष्टानस्मादाश्रितवत्सलात् ॥ ३॥

रावणो मानुषादन्यैरवध्यत्वं तथानुजः ।
निर्देवत्वेच्छया निद्रां कुम्भकर्णोऽवृणीत च ॥ ४॥

विभीषणो विष्णुभक्तिं वव्रे सत्त्वगुणान्वितः ।
तेभ्य एतान्वरान्दत्त्वा तत्रैवान्तर्दधे प्रभुः ॥ ५॥

रावणस्तु ततो गत्वा रणे जित्वा धनाधिपम् ।
लङ्कापुरीं पुष्पकं च हृत्वा तत्रावसत्सुखम् ॥ ६॥

यातुधानास्ततः सर्वे रसातलनिवासिनः ।
दशाननं समाश्रित्य लङ्कायां सुखमावसन् ॥ ७॥

मन्दोदरीं मयसुतां परिणीय दशाननः ।

तस्यामुत्पादयामास मेघनादाह्वयं सुतम् ॥ ८॥

रसां रसातलं चैव विजित्य स तु रावणः ।

लोकानाक्रमयन् सर्वाञ्जहार च विलासिनीः ॥ ९॥

दूषयन्वैदिकं कर्म द्विजानर्दयति स्म सः ।

आत्मजेनान्वितो युद्धे वासवं चाप्यपीडयत् ॥ १०॥

तदीयतरुरत्नानि पुनरानाय्य किङ्करैः ।

स्थापयित्वा तु लङ्कायामवसच्च चिराय सः ॥ ११॥

ततस्तस्मिन्नवसरे विधातारं दिवौकसः ।

उपगम्योचिरे सर्वं रावणस्य विचेष्टितम् ॥ १२॥

तदाकर्ण्य सुरैः साकं प्राप्य दुग्धोदधेस्तटम् ।

तुष्टाव च हृषीकेशं विधाता विविधैः स्तवैः ॥ १३॥

आविर्भूयाथ दैत्यारिः पप्रच्छ च पितामहम् ।

किमर्थमागतोऽसि त्वं साकं देवगणैरिति ॥ १४॥

ततो दशाननात्पीडामजस्तस्मै न्यवेदयत् ।

तच्छ्रुत्वोवाच धातारं हर्षयन्विष्टरश्रवाः ॥ १५॥

अलं भयेनात्मयोने गच्छ देवगणैः सह ।

अहं दाशरथिर्भूत्वा हनिष्यामि दशाननम् ॥ १६॥

आत्मांशैश्च सुराः सर्वे भूमौ वानररूपिणः ।

जायेरन्मम साहाय्यं कर्तुं रावणनिग्रहे ॥ १७॥

एवमुक्त्वा विधातारं तत्रैवान्तर्दधे प्रभुः ।

पद्मयोनिस्तु गीर्वाणैः समं प्रायात्प्रहृष्टधीः ॥ १८॥

अजीजनत्ततः शक्रो वालिनं नाम वानरम् ।

सुग्रीवमपि मार्ताण्डो हनुमन्तं च मारुतः ॥ १९॥

पुरैव जनयामास जाम्बवन्तं च पद्मजः ।

एवमन्ये च विबुधाः कपीनजनयन्बहून् ॥ २०॥

ततो वानरसङ्घानां वाली परिवृढोऽभवत् ।

अमीभिरखिलैः साकं किष्किन्धामध्युवास च ॥ २१॥

आसीद्दशरथो नाम सूर्यवंशेऽथ पार्थिवः ।

भार्यास्तिस्रोऽपि लब्ध्वासौ तासु लेभे न सन्ततिम् ॥ २२॥

ततः सुमन्त्रवचनादृष्यशृङ्गं स भूपतिः ।

आनीय पुत्रकामेष्टिमारेभे सपुरोहितः ॥ २३॥

अथाग्नेरुत्थितः कश्चिद्गृहीत्वा पायसं चरुम् ।

एतत्प्राशय पत्नीस्त्वमित्युक्त्वाऽदान्नृपाय सः ॥ २४॥

तद्गृहीत्वा तदैवासौ पत्नीः प्राशयदुत्सुकः ।

ताश्च तत्प्राशनादेव नृपाद्गर्भमधारयन् ॥ २५॥

पूर्णे कालेऽथ कौसल्या सज्जनाम्भोजभास्करम् ।

अजीजनद्रामचन्द्रं कैकेयी भरतं तथा ॥ २६॥

ततो लक्ष्मणशत्रुघ्नौ सुमित्राजीजनत्सुतौ ।

अकारयत्पिता तेषां जातकर्मादिकं द्विजैः ॥ २७॥

ततो ववृधिरेऽन्योन्यं स्निग्धाश्चत्वार एव ते ।

सकलासु च विद्यासु नैपुण्यमभिलेभिरे ॥ २८॥

ततः कदाचिदागत्य विश्वामित्रो महामुनिः ।

ययाचे यज्ञरक्षार्थं रामं शक्तिधरोपमम् ॥ २९॥

वसिष्ठवचनाद्रामं लक्ष्मणेन समन्वितम् ।

कृच्छ्रेण नृपतिस्तस्य कौशिकस्य करे ददौ ॥ ३०॥

तौ गृहीत्वा ततो गच्छन्बलामतिबलां तथा ।

अस्त्राणि च समग्राणि ताभ्यामुपदिदेश सः ॥ ३१॥

गच्छन्सहानुजो रामः कौशिकेन प्रचोदितः ।

ताटकामवधीद्धीमान् लोकपीडनतत्पराम् ॥ ३२॥

ततः सिद्धाश्रमं प्राप्य कौशिकः सहराघवः ।

अध्वरं च समारेभे राक्षसाश्च समागमन् ॥ ३३॥

राघवस्तु ततोऽस्त्रेण क्षिप्त्वा मारीचमर्णवे ।

सुबाहुप्रमुखान् हत्वा यज्ञं चापालयन्मुनेः ॥ ३४॥

कौशिकेन ततो रामो नीयमानः सहानुजः ।

अहल्याशापनिर्मोक्षं कृत्वा सम्प्राप मैथिलम् ॥ ३५॥

जनकेनार्चितो रामः कौशिकेन प्रचोदितः ।

सीतानिमित्तमानीतं बभञ्ज धनुरैश्वरम् ॥ ३६॥

ततो दशरथं दूतैरानाय्य मिथिलाधिपः ।

रामादिभ्यस्तत्सुतेभ्यः सीताद्याः कन्यका ददौ ॥ ३७॥

ततो गुरुनियोगेन कृतोद्वाहः सहानुजः ।

राघवो निर्ययौ तेन जनकेनोरु मानितः ॥ ३८॥

तदाकर्ण्य धनुर्भङ्गमायान्तं रोषभीषणम् ।

विजित्य भार्गवं राममयोध्यां प्राप राघवः ॥ ३९॥

ततः सर्वजनानन्दं कुर्वाणश्चेष्टितैः स्वकैः ।

तामध्युवास काकुत्स्थः सीतया सहितः सुखम् ॥ ४०॥

॥ इति श्रीरामोदन्ते बालकाण्डः समाप्तः ॥

# ॥ अथ अयोध्याकाण्डः ॥

एतस्मिन्नन्तरे गेहं मातुलस्य युधाजितः ।
प्रययौ भरतः प्रीतः शत्रुघ्नेन समन्वितः ॥ १॥
ततः प्रकृतिभिः साकं मन्त्रयित्वा स भूपतिः ।
अभिषेकाय रामस्य समारेभे मुदान्वितः ॥ २॥
कैकेयी तु महीपालं मन्थरादूषिताशया ।
वरद्वयं पुरा दत्तं ययाचे सत्यसङ्गरम् ॥ ३॥
वनवासाय रामस्य राज्याप्त्यै भरतस्य च ।
तस्या वरद्वयं कृच्छ्रमनुजज्ञे महीपतिः ॥ ४॥
रामं तदैव कैकेयी वनवासाय चादिशत् ।
अनुज्ञाप्य गुरून्सर्वान्निर्ययौ च वनाय सः ॥ ५॥
दृष्ट्वा तं निर्गतं सीता लक्ष्मणश्चानुजग्मतुः ।
सन्त्यज्य स्वगृहान्सर्वे पौराश्चानुययुर्द्रुतम् ॥ ६॥
वञ्चयित्वा तु तान्पौरान्निद्राणान्निशि राघवः ।
वाह्यमानं सुमन्त्रेण रथमारुह्य चागमत् ॥ ७॥
श्रिङ्गिबेरपुरं गत्वा गङ्गाकूलेऽथ राघवः ।
गुहेन सत्कृतस्तत्र निशामेकामुवास च ॥ ८॥

सारथिं संनिमन्त्र्यासौ सीतालक्ष्मणसंयुतः ।

गुहेनानीतया नावा सन्ततार च जाह्नवीम् ॥ ९॥

भरद्वाजमुनिं प्राप्य तं नत्वा तेन सत्कृतः ।

राघवस्तस्य निर्देशाच्चित्रकूटेऽवसत्सुखम् ॥ १०॥

अयोध्यां तु ततो गत्वा सुमन्त्रः शोकविह्वलः ।

राज्ञे न्यवेदयत्सर्वं राघवस्य विचेष्टितम् ॥ ११॥

तदाकर्ण्य सुमन्त्रोक्तं राजा दुःखविमूढधीः ।

रामरामेति विलपन्देहं त्यक्त्वा दिवं ययौ ॥ १२॥

मन्त्रिणस्तु वसिष्ठोक्त्या देहं संरक्ष्य भूपतेः ।

दूतैरानाययन् क्षिप्रं भरतं मातुलालयात् ॥ १३॥

भरतस्तु मृतं श्रुत्वा पितरं कैकयीगिरा ।

संस्कारादि चकारास्य यथाविधि सहानुजः ॥ १४॥

अमात्यैश्चोद्यमानोऽपि राज्याय भरतस्तदा ।

वनायैव ययौ राममानेतुं नागरैः सह ॥ १५॥

स गत्वा चित्रकूटस्थं रामं चीरजटाधरम् ।

ययाचे रक्षितुं राज्यं वसिष्ठाद्यैर्द्विजैः सह ॥ १६॥

चतुर्दश समा नीत्वा पुनरेष्याम्यहं पुरीम् ।

इत्युक्त्वा पादुके दत्त्वा तं रामः प्रत्ययापयत् ॥ १७॥

गृहीत्वा पादुके तस्माद्भरतो दीनमानसः ।

नन्दिग्रामे स्थितस्ताभ्यां ररक्ष च वसुन्धराम् ॥ १८॥

राघवस्तु गिरेस्तस्माद्गत्वाऽत्रिं समवन्दत ।

तत्पत्नी तु तदा सीतां भूषणैः स्वैरभूषयत् ॥ १९॥

उषित्वा तु निशामेकामश्रमे तस्य राघवः ।

विवेश दण्डकारण्यं सीतालक्ष्मणसंयुतः ॥ २०॥

॥ इति श्रीरामोदन्ते अयोध्याकाण्डः समाप्तः ॥

॥ अथ आरण्यकाण्डः ॥

व्रजन्वनेन काकुत्स्थो विराधं विधिचोदितम् ।

सदारानुजमात्मानं हरन्तमवधीत्तदा ॥ १॥

शरभङ्गाश्रमं प्राप्य स्वर्गतिं तस्य वीक्ष्य सः ।

प्रतिजज्ञे राक्षसानां वधं मुनिभिरर्थितः ॥ २॥

तस्माद्गत्वा सुतीक्ष्णं च प्रणम्यानेन पूजितः ।

अगस्त्यस्याश्रमं प्राप्य तं ननाम रघूत्तमः ॥ ३॥

रामाय वैष्णवं चापमैन्द्रं तूणीयुगं तथा ।

ब्राह्मं चास्त्रं च खड्गं च प्रददौ कुम्भसम्भवः ॥ ४॥

ततः स गच्छन्काकुत्स्थः समागम्य जटायुषम् ।

वैदेह्याः पालनायैनं श्रद्धधे पितृवल्लभम् ॥ ५॥

ततः पञ्चवटीं प्राप्य तत्र लक्ष्मणनिर्मिताम् ।

पर्णशालामध्युवास सीतया सहितः सुखम् ॥ ६॥

तत्राभ्येत्यैकदा रामं वव्रे शूर्पणखाऽभिका ।

तन्निरस्ता लक्ष्मणं च वव्रे सोऽपि निराकरोत् ॥ ७॥

राममेव ततो वव्रे कामार्ता कामसन्निभम् ।

पुनश्च धिक्कृता तेन सीतामभ्यद्रवद्रुषा ॥ ८॥

लक्ष्मणेन तदा रोषात्कृत्तश्रवणनासिका ।

सा तु गत्वा जनस्थानं खरायैतन्न्यवेदयत् ॥ ९॥

तदाकर्ण्य खरः क्रुद्धो राघवं हन्तुमाययौ ।

दूषणत्रिशिरोमुख्यैर्यातुधानैः समन्वितः ॥ १०॥

तत्क्षणं लक्ष्मणे सीतां निधाय रघुनन्दनः ।

खरं सहानुगं सङ्ख्ये जघानालघुविक्रमः ॥ ११॥

ततः शूर्पणखा गत्वा लङ्कां शोकसमन्विता ।

न्यवेदयद्रावणाय वृत्तान्तं सर्वमादितः ॥ १२॥

तच्छ्रुत्वा रावणः सीतां हर्तुं कृतमतिस्तदा ।

मारीचस्याश्रमं प्राप्य साहाय्ये तमचोदयत् ॥ १३॥

सोऽपि स्वर्णमृगो भूत्वा सीतायाः प्रमुखेऽचरत् ।

सा तु तं मृगमाहर्तुं भर्तारं समयाचत ॥ १४॥

नियुज्य लक्ष्मणं सीतां रक्षितुं रघुनन्दनः ।

अन्वगच्छन्मृगं तूर्णं द्रवन्तं काननान्तरे ॥ १५॥

विव्याध च मृगं रामः स निजं रूपमास्थितः ।

हा सीते लक्ष्मणेत्येवं रुदन्प्राणान्समत्यजत् ॥ १६॥

एतदाकर्ण्य वैदेह्या लक्ष्मणश्चोदितो भृशम् ।

तद्रक्षां देवताः प्रार्थ्य प्रययौ राघवान्तिकम् ॥ १७॥

तदन्तरे समासाद्य रावणो यतिरूपधृत् ।

सीतां गृहीत्वा प्रययौ गगनेन मुदाऽन्वितः ॥ १८॥

ततो जटायुरालोक्य नीयमानां तु जानकीम् ।

प्राहरद्रावणं प्राप्य तुण्डपक्षनखैर्भृशम् ॥ १९॥

छित्त्वैनं चन्द्रहासेन पातयित्वा च भूतले ।

गृहीत्वा रावणः सीतां प्राविशन्निजमन्दिरम् ॥ २०॥

अशोकवनिकामध्ये संस्थाप्य जनकात्मजाम् ।

रावणो रक्षितुं चैनां नियुयोज निशाचरीः ॥ २१॥

हत्वा रामस्तु मारीचमागच्छन्ननुजेरिताम् ।

वार्त्तामाकर्ण्य दुःखार्तः पर्णशालामुपागमत् ॥ २२॥

अदृष्ट्वा तत्र वैदेहीं विचिन्वानो वनान्तरे ।

सहानुजो गृध्रराजं छिन्नपक्षं ददर्श सः ॥ २३॥

तेनोक्तां जानकीवार्त्तां श्रुत्वा पश्चान्मृतं च तम् ।

दग्ध्वा सहानुजो रामश्चक्रे तस्योदकक्रियाम् ॥ २४॥

आत्मनोऽभिभवं पश्चात्कुर्वतीं पथि लक्ष्मणः ।

अयोमुखीं चकाराशु कृत्तश्रवणनासिकाम् ॥ २५॥

गृहीतौ तौ कबन्धेन भुजौ तस्य न्यकृन्तताम् ।

ततस्तु याचितौ तेन तद्देहं देहतुश्च तौ ॥ २६॥

स तु दिव्याकृतिर्भूत्वा रामं सीतोपलब्धये ।

सुग्रीवमृष्यमूकस्थं याहीत्युक्त्वा दिवं ययौ ॥ २७॥

ततः प्रीतो रघुश्रेष्ठः शबर्याश्रममभ्ययात् ।

तयाऽभिपूजितः पश्चात्पम्पां प्राप सलक्ष्मणः ॥ २८॥

॥ इति श्रीरामोदन्ते आरण्यकाण्डः समाप्तः ॥

## ॥ अथ किष्किन्धाकाण्डः ॥

हनूमानथ सुग्रीवनिर्दिष्टो रामलक्ष्मणौ ।

प्राप्य ज्ञात्वा तु वृत्तान्तं तेन तौ समयोजयत् ॥ १॥

ततो रामस्य वृत्तान्तं सुग्रीवाय निवेद्य सः ।

सख्यं च कारयामास तयोः पावकसन्निधौ ॥ २॥

प्रतिजज्ञे तदा रामो हनिष्यामीति वालिनम् ।

दर्शयिष्यामि वैदेहीमित्यन्येन च संश्रुतम् ॥ ३॥

सुग्रीवेणाथ रामाय भ्रातृवैरस्य कारणम् ।

निवेदितमशेषं च बलाधिक्यं च तस्य तत् ॥ ४॥

तत्क्षणं दुन्दुभेः कायं सुग्रीवेण प्रदर्शितम् ।

सुदूरं प्रेषयामास पादाङ्गुष्ठेन राघवः ॥ ५॥

पुनश्च दर्शितांस्तेन सालान्सप्त रघूत्तमः ।

बाणेनैकेन चिच्छेद सार्धं तस्यानुशङ्कया ॥ ६॥

किष्किन्धां प्राप्य सुग्रीवसतो रामसमन्वितः ।

जगर्जातीव संहृष्टः कोपयन् वानराधिपम् ॥ ७॥

वाली निष्क्रम्य सुग्रीवं समरेऽपीडयद्भृशम् ।

सोऽपि सम्भग्नसर्वाङ्गः प्राद्रवद्राघवान्तिकम् ॥ ८॥

कृतचिह्नस्तु रामेण पुनरेव स वालिनम् ।

रणायाह्वयत क्षिप्रं तस्थौ रामस्तिरोहितः ॥ ९॥

हेममाली ततो वाली तारयाऽभिहितं हितम् ।

निरस्य कुपितो भ्रात्रा रणं चक्रे सुदारुणम् ॥ १०॥

बाणेन वालिनं रामो विद्ध्वा भूमौ न्यपातयत् ।

सोऽपि राम इति ज्ञात्वा त्यक्त्वा देहं दिवं ययौ ॥ ११॥

पश्चात्तपन्तं सुग्रीवं समाश्वास्य रघूत्तमः ।

वानराणामधिपतिं चकाराश्रितवत्सलः ॥ १२॥

ततो माल्यवतः पृष्ठे रामो लक्ष्मणसंयुतः ।

उवास चतुरो मासान्सीताविरहदुःखितः ॥ १३॥

अथ रामस्य निर्देशाल्लक्ष्मणो वानराधिपम् ।

आनयत्प्लवगैः सार्धं हनूमत्प्रमुखैर्गिरिम् ॥ १४॥

सुग्रीवो राघवं दृष्ट्वा वचनात्तस्य वानरान् ।

न्ययुङ्क्त सीतामन्वेष्टुमाशासु चतसृष्वपि ॥ १५॥

ततो हनुमतः पाणौ ददौ रामोऽङ्गुलीयकम् ।

विश्वासाय तु वैदेह्यास्तद्गृहीत्वा स निर्ययौ ॥ १६॥

ततो हनूमत्प्रमुखाः वानरा दक्षिणां दिशम् ।

गत्वा सीतां विचिन्वन्तः पर्वतं विन्ध्यमाप्नुवन् ॥ १७॥

समयातिक्रमात्तत्र चक्रुः प्रायोपवेशनम् ।

तेऽत्र सम्पातिना प्रोक्तां सीतावार्त्तां च शुश्रुवुः ॥ १८॥

ततः प्रापुरुदन्वन्तमङ्गदाद्याः प्लवङ्गमाः ।

तं विलङ्घयितुं तेषां न कश्चिदभवत्क्षमः ॥ १९॥

स्वप्रभावप्रशंसाभिस्तदा जाम्बवदुक्तिभिः ।

संवर्धितो महेन्द्राद्रिमारुरोहानिलात्मजः ॥ २०॥

॥ इति श्रीरामोदन्ते किष्किन्धाकाण्डः समाप्तः ॥

## ॥ अथ सुन्दरकाण्डः ॥

अभिवन्द्याथ सकलानमरान्पवनात्मजः ।

पुप्लुवे च गिरेस्तस्माद्विलङ्घयितुमर्णवम् १॥

स समुल्लङ्घ्य मैनाकं सुरसामभिवन्द्य च ।

निहत्य सिंहिकां नीत्या पारं प्राप महोदधेः ॥ २॥

लङ्काधिदेवतां जित्वा तां प्रविश्यानिलात्मजः ।

सीतां विचिन्वन्नद्राक्षीन्निद्राणं निशि रावणम् ॥ ३॥

अपश्यंस्तत्र वैदेहीं विचिन्वानस्ततस्ततः ।

अशोकवनिकां गत्वा कां चिदार्तां ददर्श सः ॥ ४॥

पादपं कञ्चिदारुह्य तत्पलाशैः सुसंवृतः ।

आस्ते स्म मारुतिस्तत्र सीतेयमिति तर्कयन् ॥ ५॥

रावणस्तु तदाऽभ्येत्य मैथिलीं मदनार्दितः ।

भार्या भव ममेत्येवं बहुधा समयाचत ॥ ६॥

अहं त्वद्वशगा न स्यामित्येषा तं निराकरोत् ।

काममन्युपरीतात्मा रावणोऽपि तदा ययौ ॥ ७॥

निर्गते रावणे सीतां प्रलपन्तीं स मारुतिः ।

उक्त्वा रामस्य वृत्तान्तं प्रददौ चाङ्गुलीयकम् ॥ ८॥

तत्समादाय वैदेही विलप्य च भृशं पुनः ।

चूडामणिं ददौ तस्य करे जग्राह सोऽपि तम् ॥ ९॥

मा विषादं कृथा देवि राघवो रावणं रणे ।

हत्वा त्वां नेष्यतीत्येनामाश्वास्य स विनिर्ययौ ॥ १०॥

नीतिमान् सोऽपि सञ्चिन्त्य बभञ्जोपवनं च तत् ।

अक्षादीनि च रक्षांसि बहूनि समरेऽवधीत् ॥ ११॥

ततः शक्रजिता युद्धे बद्धः पवननन्दनः ।

प्रतापं रघुनाथस्य रावणाय न्यवेदयत् ॥ १२॥

रक्षोदीपितलाङ्गूलः स तु लङ्कामशेषतः ।

दग्ध्वा सागरमुत्तीर्य वानरान्समुपागमत् ॥ १३॥

स गत्वा वानरैः साकं राघवायात्मना कृतम् ।

निवेदयित्वा सकलं ददौ चूडामणिं च तम् ॥ १४॥

॥ इति श्रीरामोदन्ते सुन्दरकाण्डः समाप्तः ॥

॥ अथ युद्धकाण्डः ॥

अथासङ्ख्यैः कपिगणैः सुग्रीवप्रमुखैः सह ।

निर्ययौ राघवस्तूर्णं तीरं प्राप महोदधेः ॥ १॥

तदा विभीषणो भ्रात्रा त्यक्तो राममुपागमत् ।

लङ्काधिपत्येऽभ्यषिञ्चदेनं रामोऽरिमर्दनः ॥ २॥

दत्तमार्गः समुद्रेण तत्र सेतुं नलेन सः ।

कारयित्वा तेन गत्वा सुवेलं प्राप पर्वतम् ॥ ३॥

ततो राघवनिर्दिष्टा नीलमुख्याः प्लवङ्गमाः ।

रुरुधुः सर्वतो लङ्कां वृक्षपाषाणपाणयः ॥ ४॥

रावणस्य नियोगेन निर्गतान्युधि राक्षसान् ।

प्रहस्तप्रमुखान्हत्वा नेदुस्ते सिंहविक्रमाः ॥ ५॥

सुग्रीवश्च हनूमांश्च तथा राघवलक्ष्मणौ ।

राक्षसान्सुबहून्युद्धे जघ्नुर्भीमपराक्रमाः ॥ ६॥

रावणिस्तु तदाऽभ्येत्य समरे रामलक्ष्मणौ ।

ननाह नागपाशेन नागारिस्तौ व्यमोचयत् ॥ ७॥

रावणोऽपि ततो युद्धे राघवेण पराजितः ।

कुम्भकर्णं प्रबोध्याशु रामं हन्तुं न्ययुङ्क्त च ॥ ८॥

NOTE: at this point in yuddha kANDaM, after shloka 8, there are two different versions available from different editions

VERSION 1 (only 14 shlokas after shloka 8)

Reference: SiddharUpam (In Malayalam)

रक्षोभिस्सह निर्याय भक्षयन्तं प्लवङ्गमान् ।

सहानुगं कुम्भकर्णं जघानाशु स राघवः ॥ ९॥

इन्द्रजित्पुनरप्याजौ सानुजं च रघूत्तमम् ।

अमोहयद्वानरांश्च ब्रह्मास्त्रेणास्त्रकोविदः ॥ १०॥

तदैव गत्वा हनुमानानीयौषधिपर्वतम् ।

तान्सर्वान्बोधयित्वाऽऽशु तत्स्थानेऽस्थापयच्च तम् ॥ ११॥

ततो निकुम्भिलां गत्वा सौमित्रिः सविभीषणः ।

निषिद्ध्येन्द्रजितो होमं संयुगे तं जघान च ॥ १२॥

तच्छ्रुत्वा रावणः क्रुद्धो निर्याय शरवृष्टिभिः ।

प्लवङ्गमान्पीडयित्वा रामेण युयुधे भृशम् ॥ १३॥

रामोऽपि सुचिरं तेन कृत्वा युद्धं सुदारुणम् ।

ब्रह्मास्त्रेण जघानैनं ब्रह्मदत्तवरं रिपुम् ॥ १४॥

तदा शक्रादयो देवा हृष्टा रावणनिग्रहात् ।

रघूत्तमस्योत्तमाङ्गे पुष्पवृष्टिमकुर्वत ॥ १५॥

राक्षसानामधिपतिं कृत्वा रामो विभीषणम् ।

अग्निप्रवेशसंशुद्धां परिजग्राह मैथिलीम् ॥ १६॥

पुरन्दरवरेणाशु जीवयित्वा प्लवङ्गमान् ।

अतोषयद्रघुश्रेष्ठो विविधैर्धनसञ्चयैः ॥ १७॥

ततः पुष्पकमारुह्य ससीतः सहलक्ष्मणः ।

निर्ययौ वानरैस्साकं रामो रक्षोऽधिपेन च ॥ १८॥

अयोध्यां प्रत्यसौ गच्छन्प्रेषयित्वानिलात्मजम् ।

भरतस्य मतं ज्ञात्वा नन्दिग्राममुपागमत् ॥ १९॥

भ्रातृभिः सह सङ्गम्य वेषं सन्त्यज्य तापसम् ।

अयोध्यां प्राविशद्रामः प्रीतैर्बन्धुजनैस्सह ॥ २०॥

वसिष्ठोऽथ द्विजैस्साकं मन्त्रिसामन्तसन्निधौ ।

सीतया सहितं राममभ्यषिञ्चद्यथाविधि ॥ २१॥

आह्लादयञ्जगत्सर्वं पौर्णमास्यां शशी यथा ।

अयोध्यामवसद्रामः सीतया सहितश्चिरम् ॥ २२॥

VERSION 2 (60 shlokas after shloka 8)

Reference: ebook from http://hinduebooks.blogspot.com

ततो वानरसङ्घांश्च भक्षयन्तं निशाचरम् ।

ऐन्द्रेणास्त्रेण रामोऽपि निजघान रणे भृशम् ॥ ९॥

ततो रावणसन्दिष्टौ देवान्तकनरान्तकौ ।

हनूमदङ्गदाभ्यां तु निहतौ रणमूर्धनि ॥ १०॥

अथातिकायमायान्तं रथमारुह्य वाहिनीम् ।

अर्दयन्तं महाकायं लक्ष्मणश्चावधीच्छरैः ॥ ११॥

ततो रावणसन्दिष्टः शक्रजिद्राघवौ रणे ।

ब्रह्मास्त्रेण च तौ बद्ध्वा वानरांश्चावधीच्छरैः ॥ १२॥

अथ जाम्बवतो वाक्याद्गत्वा चौषधिपर्वतम् ।

मारुतिश्चौषधीस्तत्राद्दृष्ट्वा कोपं चकार सः ॥ १३॥

भूधरं तं समुत्पाट्य गृहीत्वा पुनरागतः ।

तासां गन्धेन वै सर्वान्राघवादीनजीवयत् ॥ १४॥

रावणः कपिभिर्दग्धां पुरीं वीक्ष्य रुषान्वितः ।

न्ययुङ्क्त कुम्भकर्णस्य पुत्रौ हन्तुं च राघवौ ॥ १५॥

अथार्दयन्तौ तत्सैन्यं वीक्ष्य तौ बलशालिनौ ।

कुम्भं रामोऽवधीद्बाणैर्निकुम्भं चात्मजो रवेः ॥ १६॥

ततः खरात्मजं तेन रावणेन प्रचोदितम् ।

पीडयन्तं कपीन्बाणैर्जघानास्त्रेण राघवः ॥ १७॥

ततः सन्तप्तहृदयो रावणो युद्धदुर्मदम् ।

प्रचोदयामास सुतं युद्धे हन्तुं स राघवौ ॥ १८॥

नगरान्निर्ययौ तूर्णमिन्द्रजित्समितिञ्जयः ।

मायासीतां विनिक्षिप्य सर्वेषां मोहनाय वै ॥ १९॥

वानरेष्वपि पश्यत्सु हनूमत्प्रमुखेषु च ।

जघान सीतां खड्गेन शितेन समितिञ्जयः ॥ २०॥

युद्धं त्यक्त्वा ततः सर्वैर्वानरैः स परीवृतः ।

दुःखितो हनुमांस्तत्र यत्र रमोऽव्रजल्लघु ॥ २१॥

उपगम्याब्रवीद्रामं हनूमान्निखिलं तदा ।

श्रुत्वा वृत्तान्तमखिलं रामो मोहमवाप सः ॥ २२॥

विभीषणोऽथ सम्प्राप्य दृष्ट्वा रामं च मूर्छितम् ।

विषण्णान्वानरान्वाचा सान्त्वयन्निदमब्रवीत् ॥ २३॥

मिथ्या विषादं सन्त्यज्य जगन्नायक हे प्रभो ।

शृणु मेऽभिहितं वाक्यं ज्ञात्वा रावणिमानसम् ॥ २४॥

दुरात्मना कृता माया राक्षसेन्द्रसुतेन वै ।

निकुम्भिलायां होमं तु कृतं तेनाधुना किल ॥ २५॥

लक्ष्मणं प्रेषयाद्यैव मया सह समन्त्रिणा ।

कृते होमे तत्र रिपुरजेयो भवति ध्रुवम् ॥ २६॥

उवाच रामः सौमित्रिं राक्षसेन्द्रसुतं जहि ।

गच्छेति शीघ्रं सुहृदा रावणस्यानुजेन सः ॥ २७॥

लक्ष्मणस्तु तदा राममामन्त्र्य सविभीषणः ।

निकुम्भिलां प्राप तूर्णमिन्द्रजिद्यत्र वर्तते ॥ २८॥

अदर्शयद्भ्रातृपुत्रं धर्मात्मा स विभीषणः ।

लक्ष्मणो भेदयामास राक्षसाञ्छरसञ्चयैः ॥ २९॥

कृत्वा चिरं तत्र युद्धमैन्द्रेणास्त्रेण वै रुषा ।

शिरश्चिच्छेद सौमित्रिर्दशाननसुतस्य हि ॥ ३०॥

स सुतस्य वधं श्रुत्वा रावणः शोककर्शितः ।

नष्टधैर्यो विह्वलाङ्गो विललापाकुलेन्द्रियः ॥ ३१॥

निरर्थकं तु मज्जन्म जल्पितं च निरर्थकम् ।

येनाहमद्य पश्यामि हतमिन्द्रजितं रणे ॥ ३२॥

क्व गतोऽसि हतः शूर मानुषेण पदातिना ।

राज्याद्भ्रष्टेन दीनेन त्यक्त्वा मां पुत्र जीवितम् ॥ ३३॥

इन्द्रं जित्वा तु तं बद्ध्वा लङ्कामानीय वै बलात् ।

अकरोस्त्वं प्रतापेन कारागृहनिवासिनम् ॥ ३४॥

मोचयामास ब्रह्मा त्वां सान्त्वयित्वामराधिपम् ।

तादृक्त्वं कुत्र मां त्यक्त्वा गतोऽद्य सुदुरासदः ॥ ३५॥

किं करिष्याम्यहं पुत्र क्व गच्छामि वदाधुना ।

नय मां यत्र गन्तासि तत्र ते न विलम्बनम् ॥ ३६॥

लोकेषु त्वत्समो नास्ति तादृशस्य पितास्म्यहम् ।

इत्याशया स्थितं पुत्र गर्वितेन मयात्र हि ॥ ३७॥

धूम्राक्षो वज्रदंष्ट्रश्च कुम्भकर्णः प्रतापवान् ।

राक्षसा निहताः सर्वे प्रहस्तप्रमुखा अपि ॥ ३८॥

अनादृत्य तु तान्सर्वान्राक्षसान्प्रहृतानपि ।

अवष्टभ्य बलं पुत्र सुखेनावस्थितं तव ॥ ३९॥

इत्येवं बहुधा तत्र विलप्य स तु रावणः ।

अन्तर्नियम्य दुःखानि कोपं चक्रे सुदारुणम् ॥ ४०॥

रथं सूत ममाग्रे त्वं क्षिप्रं कुरु जयैषिणः ।

रामं सलक्ष्मणं हन्तुं निर्गमिष्याम्यहं गृहात् ॥ ४१॥

इत्युक्त्वा रथमारुह्य शीघ्रं सारथिवाहितम् ।

रामेण सह सङ्गम्य युद्धं चक्रे सुदारुणम् ॥ ४२॥

ततो मातलिनानीतं रथमैन्द्रं समारुहन् ।

रराज रामो धर्मात्मा ह्युदयस्थो यथा रविः ॥ ४३॥

चकार युद्धम् तुमुलं देववृन्दे च पश्यति ।

सीताहरणजात्कोपाद्रामो धर्मभृतां वरः ॥ ४४॥

अथागस्त्यस्य वचनाद्रावणं लोककण्टकम् ।

जघान रामो लक्ष्मीवान्ब्राह्मेणास्त्रेण तं रणे ॥ ४५॥

मन्दोदरी वधं श्रुत्वा भर्तुः प्रियतरस्य सा ।

विललाप रणं गत्वा कुररीव भृशातुरा ॥ ४६॥

विभीषणोऽथ रामेण सन्दिष्टः सह राक्षसैः ।

चकार दहनं तस्य रावणस्य गतायुषः ॥ ४७॥

अथाग्निवचनात्सीतां रामो वीक्ष्य सुनिर्मलाम् ।

सन्दिष्टो देववृन्दैश्च जग्राह पितृसन्निधौ ॥ ४८॥

तवैव युक्तं कर्मैतत्सर्वलोकभयङ्करम् ।

तद्वैदेह्याः कृते राम सा तु लक्ष्मीर्भवान्स्वभूः ॥ ४९॥

इत्येवं देवसङ्घैश्च मुनिभिश्चाभिपूजितः ।

लक्ष्मणश्च तुतोषाथ रामो विश्वासमाययौ ॥ ५०॥

विभीषणस्य धर्मात्मा सत्यसन्ध उदारधीः ।

कारयामास लक्ष्मीवाननुजेनाभिषेचनम् ॥ ५१॥

ततः पुष्पकमारुह्य सह मित्रैर्जगत्पतिः ।

भार्यानुजाभ्यां सहितः किष्किन्धां प्राप राघवः ॥ ५२॥

किष्किन्धानिलयाः सर्वाः कपीनां योषितः प्रियाः ।

सीताकुतूहलात्पुष्पं विमानं ताः समारुहन् ॥ ५३॥

अथ दाशरथिः श्रीमान्भरतं द्रष्टुमिच्छया ।

भरद्वाजाश्रमं प्राप्तस्तत्र तेन निवारितः ॥ ५४॥

भरतस्यान्तिकं रामः प्रेषयामास मारुतिम् ।

रामस्यादर्शनाद्वह्निप्रवेशं काङ्क्षतो भृशम् ॥ ५५॥

तत्र तेन मुनीन्द्रेण सानुजः ससुहृद्गणः ।

सन्तोषविवशेनाथ रामोऽपि विधिपूजितः ॥ ५६॥

रामोऽथ सह सङ्गम्य भरतेनारिघातिना ।

अयोध्यां प्राविशत्तूर्णं मातृभिश्चाभिनन्दितः ॥ ५७॥

अथायोध्यानिवासास्ते जनाः सर्वेऽपि तोषिताः ।

अभिगम्याब्रुवन्रामं धन्या वयमिति द्रुतम् ॥ ५८॥

चातकास्तु घनान्दृष्ट्वा मयूराश्च यथा शिशून् ।

आसाद्य मातरस्तोषं तथा प्रापुर्जना भुवि ॥ ५९॥

अथाभिषेकं रामस्य वसिष्ठाद्या मुदाऽन्विताः ।

सहिता मन्त्रिभिश्चक्रुर्वसवो वासवं यथा ॥ ६०॥

अभिषेकोत्सवे सर्वे सुग्रीवाद्याः कपीश्वराः ।

यथार्हं पूजिताश्चासन् स्रग्गन्धाम्बरभूषणैः ॥ ६१॥

विशिष्य मुक्ताहारेण सीतया हनुमान्मुदम् ।

पूजितश्च तथा लेभे यथा सीतावलोकने ॥ ६२॥

सर्वासां वानरीणां च कौसल्या पुत्रवत्सला ।

भूषणैर्भूषयामास वस्त्रचन्दनकुङ्कुमैः ॥ ६३॥

रामाज्ञयाथ सर्वेऽपि सुग्रीवादिप्लवङ्गमाः ।

किष्किन्धां लेभिरे कृच्छ्राच्छ्रीरामविरहातुराः ॥ ६४॥

अतिभक्तो दीर्घजीवी लङ्कासमरसाधकः ।

अनुज्ञातः स रामेण लङ्कां प्रायाद्विभीषणः ॥ ६५॥

पितुस्सिंहासनं प्राप्य भ्रातृभिः सहितोऽनघः ।

विरराज तथा रामो यथा विष्णुस्त्रिविष्टपे ॥ ६६॥

लक्ष्मणानुमते रामो यौवराज्यं तु दत्तवान् ।

भरतायाप्रमेयाय प्राणात्प्रियतराय सः ॥ ६७॥

चत्वारस्ते महात्मानः सभार्या रघुसत्तमाः ।

खे सतारो यथा चन्द्रस्तथा रेजुः स्वपत्तने ॥ ६८॥

॥ इति श्रीरामोदन्ते युद्धकाण्डः समाप्तः ॥

## ॥ अथ उत्तरकाण्डः ॥

राजा पर्यग्रहीदेव भार्यां रावणदूषिताम् ।

इत्यज्ञजनवादेन रामस्तत्याज मैथिलीम् ॥ १॥

तद्विदित्वाथ वाल्मीकिरानीयैनां निजाश्रमम् ।

अन्तर्वत्नीं समाश्वास्य तत्रैवावासयत्सुखम् ॥ २॥

ऋषिभिः प्रार्थितस्याथ राघवस्य नियोगतः ।

शत्रुघ्नो लवणं युद्धे निहत्यैनानपालयत् ॥ ३॥

तपस्यन्तं ततः शूद्रं शम्बूकाख्यं रघूत्तमः ।

हत्वा विप्रस्य कस्यापि मृतं पुत्रमजीवयत् ॥ ४॥

रामे हेममयीं पत्नीं कृत्वा यज्ञं वितन्वति ।

आनीय ससुतां सीतां तस्मै प्राचेतसो ददौ ॥ ५॥

शङ्क्यमाना पुनश्चैवं रामेण जनकात्मजा ।

भूम्या प्रार्थितया दत्तं विवरं प्रविवेश सा ॥ ६॥

var - the next shloka is found only in some editions

लक्ष्मणः सभयभ्रंशाद्रामेण समुपेक्षितः ।

मानुषं देहमुत्सृज्य स्वकं रूपं समाविशत् ॥ ७॥

अथ रामस्य निर्देशात्पौरैः सह वनौकसः ।

निमज्ज्य सरयूतीर्थे देहं त्यक्त्वा दिवं ययुः ॥ ८॥

ततो भरतशत्रुघ्नौ निजं रूपमवापतुः ।

रामोऽपि मानुषं देहं त्यक्त्वा धामाविशत्स्वकम् ॥ ९॥

श्रीरामोदन्तमाख्यातमिदं मन्दधिया मया ।

समीक्ष्य निपुणैस्सद्भिः संशोध्य परिगृह्यताम् ॥ १०॥

var - the next shloka is found only in some editions

येषां प्रसादाद्रामस्य चरितं कीर्तितं मया ।

तान्गुरून्सर्वदा नौमि नारायणपरायणान् ॥ ११॥

यस्तु दाशरथिर्भूत्वा रणे हत्वा च रावणम् ।

ररक्ष लोकान्वैकुण्ठः स मां रक्षतु चिन्मयः ॥ १२॥

॥ इति श्रीरामोदन्ते उत्तरकाण्डः समाप्तः ॥

# श्रीवीरराघवप्रपत्तिः

श्रीधर्मसेननृपरम्यसुतासमेतं
श्रीभूसहायममलं श्रितपारिजातम् ।
श्रीशेषभोगशयनेऽतिसुखं शयानं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ १॥

हृत्तापनाशनसरोत्तरतीरवासं
हृत्पुण्डरीककुहरे समसन्निविष्टम् ।
श्रीशालिहोत्रमुनिपुङ्गवसेव्यमानं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ २॥

वीक्षाटवीविहरणक्षमपादपद्मं
वेद्यं सदा विजयकोटिविमानसेव्यम् ।
विश्वम्भरं विधिशिवेन्द्रनिषेव्यमाणं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ३॥

सस्नेहभक्तिभयभूकमलाकराब्ज
संवाह्यमानचरणं सरसीरुहाक्षम् ।
सौम्यं समस्तजगदेकनिवासभूतं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ४॥

पद्मोपमानपदपाणिविलोचनाढ्यं

पद्मानिवासगृहबाहुयुगान्तरालम् ।

पद्मासनायुतनिकेतनपद्मनाभं

श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ५॥

आरोग्यपुत्रविलसत्कविनाञ्जनैक

राज्याधिपत्यवरदाननिवाददीक्षम् ।

मोक्षप्रदं स्वपदवन्दकवैष्णवानां

श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ६॥

मध्येशिखं सुरवरैः परमैरशेषै-

रार्योपचित्तविभवैरतिशुद्धसत्त्वैः ।

अप्राकृतैरतिसमश्रितपादपद्मं

श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ७॥

रामानुजार्यमुखपद्मसहस्रभानुं

पूर्णार्यवर्यनयनोत्पलपूर्णचन्द्रम् ।

श्रीयामुनार्यहृदयाम्बुजचञ्चरीकं

श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ८॥

श्रीराममिश्रकमलाक्षवरार्थनाथ-
योगीन्द्रतीर्थविभवं शठकोपवन्द्यम् ।
शय्यासु सागरसुतापरिचर्यमाणं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ९॥

श्रीमच्छठारिपरकालयतीन्द्रमुख्यै-
र्दिव्यप्रबन्धनिवहैरनुबध्यमानम् ।
पूर्वैः सदा गुरुवरैः प्रथितानुभावैः
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ १०॥

हृत्तः सदानु परमं परिशुद्धदिव्यं
दुग्धाम्बुधिं सकलसंश्रितरक्षणाढ्यम् ।
हृत्तापनाशनतटीरतयावसानं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ११॥

सौम्योपयन्तृमुनिना करुणाविरक्ति
धीभक्तिशान्तिमुखसद्गुणसागरेण ।
संसेव्यमानचरणं जगतां शरण्यं
श्रीवीरराघवमहं शरणम्प्रपद्ये ॥ १२॥

इति श्रीवीरराघवप्रपत्तिः सम्पूर्णा ।

# सप्तर्षिरामायणम्

काश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।

जमदग्निर्वसिष्ठश्च सप्तैते मुनिपुङ्गवाः ॥

काश्यपः - बालकाण्डम्

जातः श्री रघुनायको दशरथान्मुन्याश्रयस्ताटकां

हत्वा रक्षितकौशिकक्रतुवरः कृत्वाप्यहल्यां शुभाम् ।

भङ्क्त्वा रुद्रशरासनं जनकजां पाणौ गृहीत्वा ततो

जित्वार्द्धाध्वनि भार्गवं पुनरगात्सीतासमेतः पुरीम् ॥

अत्रिः - अयोध्याकाण्डम्

दास्या मन्थरया दयारहितया दुर्भेदिता कैकयी

श्रीरामप्रथमाभिषेकसमये माताप्ययाचद्वरौ ।

भर्तारं भरतः प्रशास्तु धरणीं रामो वनं गच्छता-

दित्याकर्ण्य सचोत्तरं नहि ददौ दुःखेन मूर्च्छां गतः ॥

भरद्वाजः - आरण्यकाण्डम्

श्रीरामः पितृशासनाद्वनमगात् सौमित्रिसीतान्वितो

गंगां प्राप्य जटां निबध्य सगुहः सच्चित्रकूटे वसन् ।

कृत्वा तत्र पितृक्रियां सभरतो दत्वाऽभयं दण्डके

प्राप्यागस्त्यमुनीश्वरं तदुदितं धृत्वा धनुश्चाक्षयम् ॥

विश्वामित्रः - किष्किन्धाकाण्डम्

गत्वा पञ्चवटीमगस्त्यवचनाद्दत्वाऽभयं मौनिनां
छित्वा शूर्पणखास्यकर्णयुगलं त्रातुं समस्तान् मुनीन् ।
हत्वा तं च खरं सुवर्णहरिणं भित्वा तथा वालिनं
तारारत्न मवैरिराज्यमकरोत्सर्वं च सुग्रीवसात् ॥

गौतमः - सुन्दरकाण्डम्

दूतो दाशरथेः सलीलमुदधीं तीर्त्वा हनूमान् महान्
दृष्ट्वाऽशोकवने स्थितां जनकजां दत्वांगुलेर्मुद्रिकाम् ।
अक्षादीनसुरान्निहत्य महतीं लङ्कां च दग्ध्वा पुनः
श्रीरामं च समेत्य देव जननी दृष्टा मयेत्यब्रवीत् ॥

जमदग्निः - युद्धकाण्डम्

रामो बद्धपयोनिधिः कपिवरैर्वीरैर्नलाद्यैर्वृतो
लङ्कां प्राप्य सकुंभकर्णतनुजं हत्वा रणे रावणम् ।
त्सयाम् न्यस्य विभीषणं पुनरसौ सीतापतिः पुष्पका-
रूढः सन् पुरमागतः सभरतः सिंहासनस्थो बभौ ॥

**वसिष्ठः - उत्तरकाण्डम्**

हेमस्तम्भसहस्रषोडशमहासौधान्तराग्रे लस-
द्वेदिस्थं नवरत्नकीलितमहासिंहासने सीतया ।
शत्रुघ्नेन च लक्ष्मणेन भरतेनाराधितं राघवं
विश्वामित्रवसिष्ठपूर्वमुनिभिः पट्टाभिषिक्तं भजे ॥
श्री रामो हयमेधमुख्यमखकृत् सम्यक् प्रजाः पालयन्
कृत्वा राज्यमथानुजश्च सुचिरं भूरिस्वधर्मान्वितौ ।
पुत्रौ भ्रातृसमन्वितौ कुशलवौ संस्थाप्य भूमण्डले
सोऽयोध्यापुरवासिभिश्च सरयूस्नातः प्रपेदे दिवम् ॥

**सर्वे ऋषयः -**

श्रीरामस्य कथासुधातिमधुरान् श्लोकानिमानुत्तमान्
ये शृण्वन्ति पठन्ति च प्रतिदिनं तेऽघौघविध्वंसिनः ।
श्रीमन्तो बहुपुत्रपौत्रसहिता भुक्त्वेह भोगाश्चिरं
भोगान्ते तु सदार्चितं सुरगणैर्विष्णोर्ल्लभन्ते पदम् ॥

॥ इति श्रीसप्तर्षिरामायणं सम्पूर्णम् ॥

# श्रीसीताकवचम्

॥ श्रीमदानन्दरामायणान्तर्गते मनोहरकाण्डे श्रीसीताकवचम् ॥

श्रीरामदास उवाच

शृणु शिष्य प्रवक्ष्यामि सीतायाः कवचं शुभम् ।

पुरा प्रोक्तं सुतीक्ष्णाय पृच्छते कुम्भजन्मना ॥ १॥

एकदा कुम्भजन्मानं सुतीक्ष्णः प्राह वै मुनिः ।

रहः स्थितं गुरु दृष्ट्वा प्रणम्य भक्तिपूर्वकम् ॥ २॥

सुतीक्ष्ण उवाच

गुरोऽहं श्रोतुमिच्छामि सीतायाः प्रीतिदानि हि ।

यानि स्तोत्राणि कर्माणि तानि त्वं वक्तुमर्हसि ॥ ३॥

अगस्तिरुवाच-

सम्यक् पृष्टं त्वया वत्स सावधानमनाः श्रुणु ।

आदौ वक्ष्याम्यहं रम्यं सीतायाः कवचं शुभम् ॥ १॥

या सीताऽवनिसम्भवाऽथ मिथिलापालेन संवर्धिता

पद्माक्षनृपतेः सुता नलगता या मातुलिङ्गोत्भवा ।

या रत्ने लयमागता जलनिधौ या वेद वारं गता

लङ्कां सा मृगलोचना शशिमुखी मां पातु रामप्रिया ॥ २॥

अथ विनियोगः -

अस्य श्रीसीताकवचमन्त्रस्य अगस्ति ऋषिः । श्रीसीता देवता ।

अनुष्टुप् छन्दः । रामेति बीजम् । जनकजेति शक्तिः ।
अवनिजेति कीलकम् ।

पद्माक्षसुतेत्यस्त्रम् । मातुलिङ्गीति कवचम् ।
मूलकासुरघातिनीति मन्त्रः ।
श्रीसीतारामचन्द्रप्रीत्यर्थं सकलकामना सिद्ध्यर्थं जपे विनियोगः

अथ अङ्गुळीन्यासः -

ॐ ह्रां सीतायै अङ्गुष्ठाभ्यां नमः ।

ॐ ह्रीं रमायै तर्जनीभ्यां नमः ।

ॐ ह्रूं जनकजायै मध्यमाभ्यां नमः ।

ॐ ह्रैं अवनिजायै अनामिकाभ्यां नमः ।

ॐ ह्रौं पद्माक्षसुतायै कनिष्ठिकाभ्यां नमः ।

ॐ ह्रः मातुलिङ्ग्यै करतलकरपृष्ठाभ्यां नमः ॥

हृदयादिन्यासः -

ॐ ह्रां सीतायै हृदयाय नमः ।

ॐ ह्रीं रमायै शिरसे स्वाहा ।

ॐ ह्रूं जनकजायै शिखायै वषट् ।

ॐ ह्रैं अवनिजायै कवचाय हुम् ।

ॐ ह्रौं पद्माक्षसुतायै नेत्रत्रयाय वौषट् ।

ॐ ह्रः मातुलिङ्ग्यै अस्त्राय फट् ।

भूर्भुवःसुवरोमिति दिग्बन्धः ॥

अथ ध्यानम् ।

सीतां कमलपत्राक्षीं विद्युत्पुञ्चसमप्रभाम् ।

द्विभुजां सुकुमाराङ्गीं पीतकौशेयवासिनीम् ॥ १॥

सिंहासने रामचन्द्रवामभागस्थितां वराम् ।

नानालङ्कारसम्युक्तां कुण्डलद्वयधारिणीम् ॥ २॥

चूडाकङ्कणकेयूररशनानूपुरान्विताम् ।

सीमन्ते रविचन्द्राभ्यां निटिले तिलकेन च ॥ ३॥

मयूराभरणेनापि घ्राणेऽतिशोभितां शुभाम् ।

हरिद्रां कज्जलं दिव्यं कुङ्कुमं कुसुमानि च ॥ ४॥

बिभ्रन्तीं सुरभिद्रव्यं सगन्ध स्नेहमुत्तमम् ।

स्मिताननां गौरवर्णां मन्दारकुसुमं करे ॥ ५॥

बिभ्रन्तीमपरे हस्ते मातुलिङ्गमनुत्तमम् ।

रम्यवासां च बिम्बोष्ठीं चन्द्रवाहनलोचनाम् ॥ ६॥

कलानाथसमानास्यां कलकण्ठमनोरमाम् ।

मातुलिङ्गोद्भवां देवीं पद्माक्षदुहितां शुभाम् ॥ ७॥

मैथिलीं रामदयितां दासीभिः परिवीजिताम् ।

एवं ध्यात्वा जनकजां हेमकुम्भपयोधराम् ॥ ८॥

सीतायाः कवचं दिव्यं पठनीयं शुभावहं ॥ ९॥

अथ कवचम् ।

ॐ श्रीसीता पूर्वतः पातु दक्षिणेऽवतु जानकी ।

प्रतीच्यां पातु वैदेही पातूदीच्यां च मैथिली ॥ १॥

अधः पातु मातुलिङ्गी ऊर्ध्वं पद्माक्षजावतु ।

मध्येऽवनिसुता पातु सर्वतः पातु मां रमा ॥ २॥

स्मितानना शिरः पातु पातु भालं नृपात्मजा ।

पद्माऽवतु भ्रुवोर्मध्ये मृगाक्षी नयनेऽवतु ॥ ३॥

कपोले कर्णमूले च पातु श्रीरामवल्लभा ।

नासाग्रं सात्त्विकी पातु पातु वक्त्रं तु राजसी ॥ ४॥

तामसी पातु मद्वाणीं पातु जिह्वां पतिव्रता ।

दन्तान् पातु महामाया चिबुकं कनकप्रभा ॥ ५॥

पातु कण्ठं सौम्यरूपा स्कन्धौ पातु सुरार्चिता ।

भुजौ पातु वरारोहा करौ कङ्कणमण्डिता ॥ ६॥

नखान् रक्तनखा पातु कुक्षौ पातु लघूदरा ।

वक्षः पातु रामपत्नी पार्श्वे रावणमोहिनी ॥ ७॥

पृष्ठदेशे वह्निगुप्ताऽवतु मां सर्वदैव हि ।

दिव्यप्रदा पातु नाभिं कटिं राक्षसमोहिनी ॥ ८॥

गुह्यं पातु रत्नगुप्ता लिङ्गं पातु हरिप्रिया ।

ऊरू रक्षतु रम्भोरू जानुनी प्रियभाषिणी ॥ ९॥

जङ्घे पातु सदा सुभ्रूः गुल्फौ चामरवीजिता ।

पादौ लवसुता पातु पात्वङ्गानि कुशाम्बिका ॥ १०॥

पादाङ्गुळीः सदा पातु मम नूपुरनिःस्वना ।

रोमाण्यवतु मे नित्यं पीतकौशेयवासिनी ॥ ११॥

रात्रौ पातु कालरूपा दिने दानैकतत्परा ।

सर्वकालेषु मां पातु मूलकासुरघातिनी ॥ १२॥

एवं सुतीक्ष्ण सीतायाः कवचं ते मयेरितम् ।

इदं प्रातः समुत्थाय स्नात्वा नित्यं पठेत्तु यः ॥ १३॥

जानकीं पूजयित्वा स सर्वान् कामानवाप्नुयात् ।

धनार्थी प्राप्नुयाद्द्रव्यं पुत्रार्थी पुत्रमाप्नुयात् ॥ १४॥

स्त्रीकामार्थी शुभां नारीं सुखार्थि सौख्यमाप्नुयात् ।

अष्टवारं जपनीयं सीतायाः कवचं सदा ॥ १५॥

अष्टभ्यो विप्रवर्येभ्यो  नरः प्रीत्यार्पयेत् सदा ।

फलपुष्पादिकादीनि यानि यानि पृथक् पृथक् ॥ १६॥

सीतायाः कवचं चेदं पुण्यं पातकनाशनम् ।

ये पठन्ति नरा भक्त्या ते धन्या मानवा भुवि ॥ १७॥

पठन्ति रामकवचं सीतायाः कवचं विना ।

तथा विना लक्ष्मणस्य कवचेन वृथा स्मृतम् ॥ १८॥

तस्मात् सदा नरैर्जाप्यं कवचानां चतुष्टयम् ।

आदौ तु वायुपुत्रस्य लक्ष्मणस्य ततः परम् ॥ १९॥

ततः पठेच्च सीतायाः श्रीरामस्य ततः परम् ।

एवं सदा जपनीयं कवचानां चतुष्टयम् ॥ २०॥

इति श्रीशतकोटिरामायणान्तर्गते

श्रीमदानन्दरामायणे वाल्मिकीये

मनोहरकाण्डे चतुर्दशसर्गान्तर्गतं

श्रीसीताकवचं सम्पूर्णम् ॥

# सीतारामस्तोत्र

अयोध्यापुर-नेतारं मिथिलापुर-नायिकाम् ।

राघवाणामलङ्कारं वैदेहानामलङ्क्रियाम् ॥ १॥

रघूणां कुलदीपं च निमीनां कुलदीपिकाम् ।

सूर्यवंश-समुद्भूतं सोमवंश-समुद्भवाम् ॥ २॥

पुत्रं दशरथस्याद्यं पुत्रीं जनकभूपतेः ।

वशिष्ठानुमताचारं शतानन्दमतानुगाम् ॥ ३॥

कौसल्यागर्भ-सम्भूतं वेदिगर्भोदितां स्वयम् ।

पुण्डरीक-विशालाक्षं स्फुरदिन्दीवरेक्षणाम् ॥ ४॥

चन्द्रकान्ताननाम्भोजं चन्द्रबिम्बोपमाननाम् ।

मत्त-मातङ्ग-गमनं मत्त-हंस-वधू-गताम् ॥ ५॥

चन्दनार्द्र-भुजामध्यं कुङ्कुमार्द्र-कुचस्थलीम् ।

चापालङ्कृत-हस्ताब्जं पद्मालङ्कृत-पाणिकाम् ॥ ६॥

शरणागत-गोप्तारं प्रणिपाद-प्रसादिकाम् ।

कालमेघनिभं रामं कार्तस्वर-सम-प्रभाम् ॥ ७॥

दिव्य-सिंहासनासीनं दिव्य-स्रग्वस्त्र-भूषणाम् ।

अनुक्षणं कटाक्षाभ्यां अन्योन्येक्षण-काङ्क्षिणौ ॥ ८॥

अन्योन्य-सदृशाकारौ त्रैलोक्यगृहदम्पती।

इमौ युवां प्रणम्याहं भजाम्यद्य कृतार्थताम् ॥ ९॥

अनेन स्तौति यः स्तुत्यं रामं सीतां च भक्तितः ।

तस्य तौ तनुतां पुण्यास्सम्पदः सकलार्थदाः ॥ १०॥

एवं श्रीरामचन्द्रस्य जानक्याश्च विशेषतः ।

कृतं हनूमता पुण्यं स्तोत्रं सद्यो विमुक्तिदम् ।

यः पठेत्प्रातरुत्थाय सर्वान् कामानवाप्नुयात् ॥ ११॥

॥ इति हनूमत्कृत-सीताराम स्तोत्रं सम्पूर्णम् ॥

